सूर्यमगन्म ज्योतिरुत्तमम्

विश्वसंस्कृतसम्मेलनम्

WORLD SANSKRIT CONFERENCE

5-9 April, 2001 Vigyan Bhawan, New Delhi

(Under the auspices of the Ministry of Human Resource Development, Govt. of India)

PROCEEDING OF WORLD SANSKRIT CONFERENCE

VOLUME 4

(Sanskrit, Hindi and English Sections)

Editor
Prof. Vachaspati Upadhyaya

Sub Editor
Prof. Ramesh Kumar Pandey

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
विद्यया विन्दतेऽमृतम्

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
New Delhi - 110016

PROCEEDINGS
OF
World Sanskrit Conference

Volume 4

(Sanskrit, Hindi and English Sections)

Editor

Prof. Vachaspati Upadhyaya

Vice-Chancellor

S.L.B.S.R.S. Vidyapeetha, N.Delhi

President, Association of Indian Universities, Delhi

Secretary, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain

Sub Editor

Prof. Ramesh Kumar Pandey

Head, Research and Publication

S.L.B.S.R.S. Vidyapeetha, N.Delhi

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha

(Deemed University)

New Delhi-110016

Publisher :
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Katwaria Sarai, New Delhi-110016
www.slbsrsv.ac.in

Year 2007

Printed at :
Amar Printing Press
8/25, Vijay Nagar, Delhi-110009

प्रो० वाचस्पति उपाध्याय
कुलपति
Prof. Vachaspati Upadhyaya
Vice Chancellor
श्री लालबहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ
नई दिल्ली-११००१६
Shri Lal Bahadur Shastri
Rashtriya Sanskrit Vidyapeetha,
New Delhi-110016

सचिव
महर्षि सान्दीपनि
राष्ट्रीय वेदविद्या प्रतिष्ठान
(मानव संसाधन विकास मंत्रालय, भारत सरकार का स्वायत्तशासी संस्थान)
प्राधिकरण भवन, द्वितीय तल, भरतपुरी, उज्जैन 456 010 (म.प्र.)
Secretary
Maharshi Sandipani
Rashtriya Vedvidya Pratishthan
(An autonomous organisation of the Ministry of HRD, Govt. of India)
Pradhikaran Bhavan, II Floor, Bharatpuri, UJJAIN-456 010 (M.P.)

AVANT-PROPOS

It is indeed my pleasure in placing before the academic world in general and the votaries of Sanskrit in particular the proceedings of the World Sanskrit Conference held in the year 2001.

Sanskrit as a language is undoubtedly a repository and reservoir of our priceless heritage. The year 2001 was celebrated as the Sanskrit Year. It was a land mark in the annals of Sanskrit when the delegates from all over the country and abroad with great commitment, perseverance and patience gathered together with a view to exploring new horizons in the field of Sanskrit.

Inspite of various impediments to the steady development of this language coupled with the successive disturbances both at internal and external fronts which India had to bear encountering ever since the dawn of history, India has successfully held up to the World her archaic literary map and compares with the literature of any other nation of the globe. The beginnings of her civilization are yet in the obscurity. Relatively to any other language of the ancient World, the antiquity of Sanskrit has an unquestionable priority. "Yet such is the marvellous continuity" says Max Muller "between the past and the present of India, that in spite of repeated social convulsions, religious reforms and foreign invasions, Sanskrit may be said to be still the only language that is spoken over the whole extent of the vast country. So says M. Winternitz: "Sanskrit is not a 'dead' language even today. There are still at the present day a number of Sanskrit periodicals in India, and topics of the day are discussed in Sanskrit pamphlets. Also, the Mahabharata is still today read aloud

publicly. To this very day Poetry is still composed and words written in Sanskrit and it is the language in which Indian Scholars converse upon scientific questions. Sanskrit at the least plays the same part in India still, as Latin the Middle ages in Europe, or as Hebrew with the Jewsë (History of Indian Literature, I.45).

It has been quite aptly remarked that *"the Indian people and the Indian civilization were born, so to say, in the lap of Sanskrit and it went hand in hand with the historical development of the culture which have come down to our day as an inheritance of priceless order for India, may, for the entire world".* Sanskrit with its philosophical insight and humanist inclusivity has flourished and evolved through the millennia tenaciously yet flexibly in different historical periods and in different shades.

I consider it relevant to quote the Landmark Judgement of the Honéble Supreme Court of India of 1993 on Sanskrit Studies in India:

> *"So far as "We, the people of India" are concerned, they have always held in high esteem the cultural heritage of this ancient land. And to foretell our views, learning of Sanskrit is undoubtedly necessary for protection of this heritage. The stream of our culture would get dried if we were to discourage the study of Sanskrit...."*.

We may now refer to the policies and programmes as accepted by the Government of India. In the 1968 policy, the following inspiring statement regarding the importance of this language is worthy of notice. I quote:

> *"Considering the special importance of Sanskrit to the growth and development of Indian languages and its unique contribution to the cultural unity of the country facilities for its teaching at the school and university stages should be offered on more liberal basis. Development of new methods of teaching the language should be encouraged, and the possibility explored of including the study of Sanskrit in those courses (such as modern Indian Philosophy) at the first and second degree stages, where such knowledge is useful".*

In addition to the above-quoted statement; reference must be made from the 1986 policy in para 5.33: regarding the future course of action:

> *"Research in Indology, the humanities and Social Sciences will receive adequate support. To fulfil the need for the synthesis of knowledge, inter-disciplinary research will be encouraged. Efforts will be made to delve into India's ancient fund of knowledge and to relate it to contemporary reality. This effort will imply the development of facilities for the intensive study of Sanskrit".*

It has been laid down in Article 351 of our constitution that while dealing with the duty of the Union to promote the spread of Hindi, it would draw, whenever necessary or desirable, for its vocabulary, primarily on Sanskrit. Encouragement to Sanskrit is also necessary because of it being one of the languages included in the Eighth Schedule."

We live in an age of unprecedented challenges and opportunities. On the one hand, we face the grim reality of over population, hunger, ecological disasters, new devastating diseases, and the ever-present possibility of a nuclear holocaust. On the other hand, science constantly expands our intellectual horizon and helps create new technological wonders that, we hope, will solve some of our problems. Biologists are ėengineeringë genes to increase the productivity of vegetables and fruit trees; chemists are unlocking enzymes to make them usable for non-biological purposes, such as waste disposal, or to repair DNA in order to enhance and prolong life; and physicists are working on superconductivity and the use of lazer in computers. Scientists are also exploring the possibility of bionic organs, the application of electro-magnetic fields in the healing process, and artificial intelligence. **(From the Preface, In Search of The Cradle of Civilization Georg Feuerstein, Subhash Kak & David Frawley)**

In the backdrop of above-mentioned statement, it is a desideratum for votaries of Indian knowledge system to revisit the heritage passed on to us with a multi-dimensional projection.. To understand *'Shastra Parampara'*, it requires enormous grit and stamina coupled with a discerning mind. Our tradition has laid due emphasis on both *Jnan and*

Vijnan. Both are to be pursued with utmost care for liberation and not for bondage. Our endeavor in exploring the intricacies of Indian knowledge system must stand the test of time. Authoritative statements always win plaudits of unbiased Pandits.

The arena of Indian knowledge system include Logic, Philosophy of Language, Technology and Craft, Policy and Governance, Ethics and Sociological Texts, Architecture the outer Science Poetics and Aesthetics, Law and Justice, Mathematics and Astronomy, Agriculture, Trade and Commerce and Medicine and Life Science.

In order to re-examine the content and intent of above-said disciplines the different themes of the Conference were the following:

(i) The Contribution of Sanskrit towards World Civilization

(ii) Sanskrit and the Frontiers of Knowledge

(iii) Sanskrit and Contemporary challenges

(iv) Towards a new Pedagogy of Sanskrit

(v) (Sub-Theme: Sanskrit as a living language)

(vi) Prospective themes of Sanskrit Research

(vii) Sanskrit Manuscripts in the World

In addition to the above, we had also organized *'Sastra Charca Parisad'* for interaction amongst the Scholars on the advance study and research in the various fields of Sanskrit learning embedded abstruse texts of various systems.

One of the main objectives of this Conference was to provide forum for exchange of ideas between the scholars of India and abroad on the themes of the Conference. In addition to this, it was also resolved that the Status of Sanskrit Studies in different countries should be presented in a comprehensive manner at the global level. The Organizing Committee was of the view that the information contained in the articles here would be of immense value for researchers.

The conference got very encouraging response from the scholars in Indology both from India and abroad. We got an opportunity of

publishing two invaluable volumes entitled: *"Sanskrit Study in India"* and *"Sanskrit Study in Abroad"*. These two volumes were distributed to the participants to emphasize that Sanskrit was invaluable and indispensable because of its enormous academic rich resources.

Their papers are being published under the following five volumes:

Volume I : Sanskrit Language & Literature: For the sake of convenience, this volume has been divided into two parts. Part I contains papers written in Sanskrit and Hindi and covers 502 pages whereas Part II comprises articles in English and comes to 364 pages.

Volume II : This volume entitled 'Religion and Philosophy' For the sake of convenience, this volume has been divided into two parts. Part I contains papers written in Sanskrit and Hindi and covers 348 pages whereas Part II comprises articles in English and comes to 470 pages.

Volume III: This volume comprises three Sections such as Manuscriptology, Pedagogy and Technical sciences, this volume also has been divided into two parts. Part I contains papers written in Sanskrit and Hindi and covers 324 pages whereas Part II comprises articles in English and comes to 304 pages.

Volume IV: This volume covers Veda and Vedāṅga. It contains 62 articles divided as Sanskrit (22 articles), Hindi (13 articles) and English (27 articles).

Volume V : This volume consists of the topics such as Purāṇas, Āyurveda, Environmental Science and Indian Culture. Language-wise the number of the articles is Sanskrit (23 articles), Hindi (18 articles) and English (18 articles). Thus the total number of articles in this Volume comes to 59.

The papers received from the participating scholars have been published in five volumes.

The collection of the articles has been christened as *Pañcāmṛtam* according to five volumes under which all the articles have been arranged.They have further been named as *Caṣaka-s* such as *Prathama Caṣaka-s* etc. The two parts of the First Volume (*Caṣaka*) have been named as *Prathmo Binduḥ* and *Dvitīyo Binduḥ.* These articles have been arranged according to Devanāgari and English alphabets of the names/surnames of the author.

It is regretted that all the articles read at the Conference and submitted for publication could not be accommodated for various reasons. Nevertheless, I am grateful to all the participants who attended the Conference and/or presented their papers.

I am also indebted to various funding authorities, but for whose financial assistance such a huge affair as the World Sanskrit Conference could not have been organized on such a large scale and for so many days.

The idea of organising the Conference at such a large scale was mooted by Dr.Murli Manohar Joshi Ji, the then Honéble Minister of Human Resource Development, Government of India, New Delhi.

We are indebted to the officials of the Ministry of Human Resource Development for extending full co-operation due to which the conference could be arranged in the Vigyan Bhavan, New Delhi for long five days. The support made by the Rashtriya Sanskrit Sansthan under the able leadership of Prof.V.Kutumba Shastri provided a fillip for the success of the conference.

I am ending my editorial remark with a sad note. We lost Dr. K.P.A. Menon, an eminent Scholar and Administrator, who was a constant source of inspiration in each endeavor of ours before and after the World Sanskrit Conference. To me, he was my friend, philosopher and guide. I sincerely pay my tributes to the memory of Late Dr. K.P.A. Menon and pray God to give eternal peace wherever he is. During his tenure as the Chancellor of this Vidyapeeth, he guided the destiny of this infant Institution and paved way for enormous academic achievements.

I am especially indebted to Justice Ranganath Mishra, Chairman, Organising Committee who has given the benefit of his mellow wisdom in all the endeavours we have made for publication works. We are really beholden to the members of the Advisory Board of Editors, especially the Chairman Dr. V.R. Panchamukhi, Chancellor, Rashtriya Sanskrit Vidyapeetha, Tirupati and other expert members who have exhibited deep interest in going through the articles penned by eminent Scholars. We place on record our immense gratitude to our knowledgeable contributors who prepared their articles with great authenticity at a very short notice.

We would like to place on record the sincere help, encouragement and the tacit support of a host of scholars especially Prof. Ramesh Kumar Pandey, Professor (Research & Publication), Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha and Prof. Jagadamba Prasad Sinha, Ex.HoD, Department of Sanskrit, University of Lucknow, U.P.

I have the pleasure to make a special mention about the efforts put in by M/s Amar Printing Press who deserves appreciation for their sincere co-operation and qualitative approach but for which these volumes could not have seen the light of the day.

As we stand on the threshold of 21st Century, the five volumes are bound to provide the twin objectives of attempting to take stock of what has already been achieved and sending an agenda for the future. It is time to make resolution for tomorrow's World supported by the eternal values enshrined in Sanskrit, the repository of our pristine glory.

(Vachaspati Upadhyaya)

Śrāvaṇapūrṇimā

V.S. 2062

Editorial

Sanskrit language, as a vehicle for conveying the tenets of Indian culture, has been irrigating the lush green Indian land with its ever-flowing currents of thoughts. In the modern times bubbling with the feelings of universality, it is the divine language (Sanskrit) which is a panacea for quelling all sorts of perils associated with the advancement of science and technology. It is the divine language (Sanskrit) which is the remedy for all sorts of perils, it is the means for attaining all aims of human life, it is the placid water for washing the mud of mutual enmity. It is here that lies the harmless path of one's progress, it is the song of goodwill of a group of people, it is the way of cooperative understanding of the whole universe, it is like one's own feeling for all the living beings. It is the glory of science of the nature and it is the old way of modern inventions, taking shelter of the creeper of Sanskrit, glorified with variety of knowledge and science laden with the blossomed flowers and in order to make the whole universe fragrant with the heaps of their pollengrains that the year 2001 of the Christian era a five-day Special Session of the World Sanskrit Conference was convened in the famous Vijñāna Bhavana in Delhi, the capital of India, on behalf of the Department of Language of the Ministry of Human Resource Development, Government of India.

The Vice-Chancellor of Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha (Deemed University), Prof. Vachaspati Upadhyaya, whose knowledge of the scriptures is well known, was appointed its General Secretary. It was due to his efforts that this Vidyapeetha was selected the main venue of the Conference. And, it was with his personal efforts that more than one thousand scholars well-acquainted with the way of living, language, manners of different lands and capable of crossing the river of knowledge of Sanskrit

attended the Conference and participated in various sessions and lively discussions.

It was not practically possible to publish all the papers presented in the Conference. Hence, a Committee of experts was appointed to select th articles for publication. Only the articles selected by that Committee are being published in five volumes. Volume one is divided into two parts. Part First contains the articles in Sanskrit and Hindi whereas Part Second contains those in English. Other volumes contain the articles presented in Sanskrit, Hindi and English. In all the Parts/Volumes the list of contents has been given in the beginning and that of the scholars is appended at the end. The articles have been arranged according to the alphabetical order of the surnames of the scholars in every Volume/Part.

In publishing these articles I was fortunate in getting the advice and guidance of the experts of various subjects. Without getting their guidance it would not have been possible these papers. I express my sincere gratitude to these scholars who are experts in their respective fields.

Our learned Vice-Chancellor, Prof. Vachaspati Upadhyaya, encouraged me in so many ways including being good enough to write a AVANT-PROPOS to these Volumes. As Chief Editor of these Volumes he has guided and helped me at every stage of their publication. I confess that I could not have succeeded in bringing this publication without the support of Prof. J.P. Sinha. I express my heartiest gratitude to him for his constant guidance and help.

I would like to conclude with acknowledging the efforts of Sri Hiralal of the Amar Printing Press in bringing out the publication of nicely got up.

—R.K. Pandey

विषयसूची

English

हिन्दी

वेदेषु अर्थव्यवस्था

डॉ० महावीरोऽग्रवालः

वेदाः खलु सर्वासां विद्यानां सर्वस्य ज्ञानस्य वा मूलभूता इत्यस्मिन् विषये न विवदन्ते मनीषिणः । मानव-जीवनस्य परमलक्ष्यभूतं पुरुषार्थचतुष्टयमपि वेद-मन्त्रेषु विस्तरेण प्रतिपादितं वर्तते । धर्म-अर्थ-काम-मोक्षेषु निखिलं मानवजीवनं समाहितं भवति । आसीत् कोऽपि समयः यदा जनाः धर्म—मोक्षयोः सिद्ध्यर्थं प्रामुख्ये प्रयतन्ते स्म, परं साम्प्रतिके काले अर्थ-कामयोरेव प्राधान्यं तत्रापि च अर्थस्य महत्त्वं सर्वैरेव प्रतिदिनमनुभूयते । 'अर्थस्य पुरुषो दासः', 'सर्वे' गुणाः काञ्चनमाश्रयन्ते, 'यस्यास्ति वित्तं स नरः कुलिनः' इत्यादि वचनानि अर्थस्य महत्त्वं प्रतिपादयन्ति । वर्तमानसमये निखिलेऽपि संसारे अर्थार्जनमेव मानवानां प्रमुखोद्यमः, अर्थप्राप्त्यर्थं सत्य-असत्ययोः, धर्म-अधर्मयोः पुण्य-पापयोरपि नास्ति चिन्ता । परं अन्यायेन, अधर्मेण, अनृजुना वा मार्गेणार्जितं धनं न कदापि सुखं, शान्तिं च प्रयच्छति । यदि मानवाः श्रुतिप्रतिपादितां धनार्जनसरणिमाश्रयेयुः तर्हि सर्वेषामेव कल्याणं भवेत् । कृत्स्नेऽपि संस्कृतवाङ्मये दारिद्र्यं सर्वथा निन्द्यं मतम् । उक्तं केनापि विदुषा 'दारिद्र्यं षष्ठं महापातकम्' इति । वेदे सर्वत्र अर्थप्राप्त्यर्थं एवं विधाः प्रार्थनाः प्राप्यन्ते—

'अग्ने नय सुपथा राये, 'वयं स्याम पतयो रयीणाम्', 'इन्द्र श्रेष्ठानि द्रविणानि देहि अस्मासु भद्रा द्रविणानि धत्त' । एवं विधेषु मन्त्रेषु भद्रस्य, श्रेष्ठस्य, धर्ममार्गेणार्जितस्य धनस्यैव प्रार्थना वर्तते । पापलक्ष्मी न कदापि गृहेऽस्माकं प्रविशतु, केवलं पुण्यालक्ष्मीरेव समागच्छतु—

एता एना व्याकरं खिले गा विष्ठिता इव ।
रमन्तां पुण्या लक्ष्मीर्याः पापीस्ता अनीनशम् ।। अथर्व ७.११५.४

वेदेषु अर्थस्य आधारभूतानि तत्त्वानि सन्ति— भूमिः, पशवः, मनुष्याश्च । सर्वम् अर्थतन्त्रं त्रयाधीनम् ।

भूमिः— अन्नधान्यादीनामुत्पत्तिः, खनिजद्रव्याणां प्राप्तिः वृक्षादिगृहनिर्माणसाधनानि च भूमिरेव प्रयच्छति । अथर्ववेदस्य सुविख्याते भूमिसूक्ते पृथिव्याः सरसातिसरसं, गरिमामण्डितं, हृदयाह्लादी वर्णनं प्राप्यते । 'माताभूमिः पुत्रोऽहं पृथिव्याः' । इयं भूमिरस्माकं जननी, वयं च अस्याः पृथिव्याः पुत्ररूपाः । भूरियं सर्वेषां भरण—पोषण कारयित्री, समेषामैश्वर्याणां धारयित्री, आश्रयप्रदायिनी, प्रतिष्ठादायिनी च वर्तते—

विश्वम्भरा वसुधानि प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी । अथर्व-१२.१.६

भूमिसूक्ते भूमिमाता असकृत् हिरण्यवक्षा पदेन सम्मानिता । एकस्मिन् मन्त्रे कोऽपि देशभक्तः पृथिवी–वन्दनां कुर्वाणः उद्गायति—

शिला भूमिरश्मा पांसुः सा भूमिः संधृता धृता ।
तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः ॥ अथर्व० १२.१.२६

व्रीहियवादीनामन्नानां प्रदायित्रीं भूमिं नमस्कुर्वाणो वैदिकऋषिः प्रार्थयते—

यस्यामन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः ।
भूम्यै पर्जन्यपत्न्यै नामोऽस्तु वर्षमेदसे ॥ अथर्व० १२.१.२६

भूरियं नानाविधैश्वर्याणां खनिः । अस्याः गुहासु किं नास्ति ? वयं प्रार्थयामो सुमनस्यमाना पृथिवी माता अस्मान् निखिलानि वसूनि प्रयच्छतु—

निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे ।
वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाता ॥ अथर्व० १२.१.४४

पशवः— अर्थप्राप्तेः अन्यतम आधारोऽस्ति— पशुः । वैदिकसाहित्ये पशुधनस्य महत्त्वं सर्वत्र जेगीयते । कृष्याधारभूताः पशवः बहुभिः प्रकारैः राष्ट्रस्य समृद्धिवृद्धौ कारणभूताः भवन्ति । वेदमन्त्रेषु पशुरक्षायाः प्रार्थना वैदिकऋषीणां पशुप्रेमं प्रदर्शयति—

यथा—

शं नो द्विपदे शं चतुष्पदे । अथर्व. १४.२.४०

प्रिया पदानि पशवो नि पाहि । ऋ० १.६७.३

मा नो गोषु मा नो अश्वेषु रीरिषः । ऋ० १.११४.८

यद्यपि सर्वेऽपि पशवः रक्षणीयाः, उपयोगिनः, समृद्धिप्रदातारश्च भवन्ति, परं गोधनस्य महत्त्वं नूनमप्रतिमम् । वेदे गवां महत्त्वम्, अर्चनीयत्वं, समृद्धिप्रदायित्वं भूयो भूयः संघोष्यते । पुराकाले गोधनमेव समृद्धिसूचकममन्यत । गोपालनं सर्वोत्कृष्टं कर्म मन्यते स्म भारतीयैः । यथा कृषिः राष्ट्रमन्नधान्यान्वितं करोति तथैव गवां बाहुल्यमपि अन्नसमस्यामपाकरोति । गोभिः मानवजातेः जीवनं पालितं पोषितञ्च भवति । यथा गवां तथान्येषां पशूनाम् अर्थव्यवस्थायां महत्त्वं निर्विवादमेव ।

उद्योगः— उद्योगमन्तरा न कोऽपि देशः समृद्धेः चरमोत्कर्षतां प्राप्नोति । वैदिककाले भारतीयाः शिल्पविज्ञाने उद्योगादिषु च परमनिपुणाः बभूवुः । वेदे आध्यात्मिकज्ञानेन सहैव भौतिकविज्ञानमपि परां कोटिम् आटीकमानम् आसीत् । वेदे नानाविधशिल्पकलापारङ्गताः शिल्पिनः कारुपदेन अभिधीयन्ते । न केवलं पुरुषा अपितु नार्योऽपि शिल्प-विधायां निपुणा आसन् । तदानीन्तनाः राजानः शिल्पिनां कृते शिक्षणालयानां स्थापनामकार्षुः । उद्योगकला-निपुणः शिल्पिनः शस्त्रास्त्र, वस्त्र, विमान, नौका, गृह, चर्म, हिरण्य, रथादि निर्माणेन अर्थसमृद्धिम् कुर्वन् । विविधधातुभिः नानाविधानि अस्त्र-शस्त्राणि निर्मियन्ते स्म । वेद-मन्त्रेषु वज्र, तिग्मतेजा, हेति, प्रहेति,

त्रिषंधिवज्र, अयोमुखवज्र, सूचीमुखा वज्र, विकंकतीमुखा वज्र, धूमाक्षी वज्र, वृधुकर्णी वज्र, अश्रुमुखी वज्र, अग्निजिह्वा-वज्र, धूमशिखा वज्र-क्षुर-सृक-पवि-असि-निषङ्ग-धनु-पिनाक-इषु-शर-बाणवृषप्रभृतीणां शस्त्राणां वर्णनमुपलभ्यते। यजुर्वेदस्य षोडश, त्रिंशद् अध्याययो: मन्त्रेषु नानाविधशिल्पीनां वर्णनं वैदिक कालीनोद्योगस्य स्वरूपं ज्ञातुं शक्यते।

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नम:
कुलालेभ्य: कर्म्मरिभ्यश्च वो नमो। यजु० १६.२७

नृत्ताय सूतं गीताय शैलूषं... मेधायै रथकारं धैर्य्याय तक्षाणम्।

तपसे कौलालं मायायै कर्मारं रूपाय मणिकारं शुभे वपं शरव्याया इषुकारं।
हेत्यै धनुष्कारं कमणे ज्याकारं... ॥ यजु० ३०/६, ७

बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वणिजं... । यजु० ३०/१७

ऋग्वेदे प्रयुक्ता: पूषा, सिरि तन्तु, ओतु, तसर, मयूरवादि शब्दा वस्त्रोद्योगस्य स्वरूपं प्रतिपादयन्ति। तदानीन्तने काले वस्त्रवयने स्त्रीणां प्राधान्यमासीत्। ता: वस्त्रनिर्माणकलायां परं कौशलमाप्तवत्य आसन्। शतपथ-ब्राह्मणेऽस्मिन् विषये निगद्यते—

तद्यथा—

एतत्स्त्रीणां कर्म यदूर्णासूत्रम् (शतपथ १२.७.२.११)

वैदिकसंहितासु सूत्रनिर्माणसंकेता: स्पष्टरूपेण प्राप्यन्ते।

तद्यथा—

यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वातत:। ऋग् १०.५७.२

ऋतस्य तन्तुर्वितत: पवित्र आ...। ऋग् ९.७३.९

यथा वर्तमानसमये कलयन्त्रेषु विविधानि वस्त्राणि निर्मीयन्ते तथैव वैदिककालेऽपि निर्मीयन्ते स्म।

निष्क-रुक्म-मणि-कृशन्-हिरण्य-खादि-प्रतिहस्त-कंकण-स्रज-कुरीर-ओपश प्रभृतीनां, धातूनामाभूषणानां च प्रयोगेण आभूषणनिर्माणकलाया: सङ्केता: प्राप्यन्ते।

वेदमन्त्रेषु प्रयुक्ता: अयस् रौप्य-सुवर्ण-त्रपु-सीसं प्रभृतयश्शब्दा: धातूद्योगं प्रतिपादयन्ति। यथा—

हिरण्यं च मे ऽयश्च मे श्यामञ्च से लोहञ्च
मे सीसञ्च मे त्रपुश्च मे यज्ञेन कल्पन्ताम्। यजु० १८.१३

इत्थमेव चर्मोद्योगस्य, कटनिर्माणस्य, भोजनयज्ञादि पात्रनिर्माणस्य, जलयान-वायुयान-विद्युद्यानादीनां च वर्णनेन तत्कालीनमुद्योग-गौरवं ज्ञायते। वेदमन्त्रेषु वास्तुकलाया: विविधानि निदर्शनानि मनांसि मोहयन्ति।

तत्र गृहाणां गयः, कृदरः, गर्त्तः, हर्म्यम्, अस्तम्, पस्त्यम्, दुरोण: नीडम्, दुर्याः, स्वसरणि, अमा, दम, कृत्तिः, योनिः सद्म, शरणम्, वरुथम्, छर्दिः छाया, शर्म, अज्यादयोभेदाः प्रतिपादिताः सन्ति ।

वैदिककाले धनाढ्याः, अतिधनाढ्याः, सामान्याः सर्वविधाः जनाः, द्रष्टुं शक्यन्ते । ते च प्रायशः परिश्रम-शीलाः उद्योगिनो बभूवुः । यथोक्तं - न ऋते श्रान्तस्य सख्याय देवाः, उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः, इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति, यन्ति प्रमादमतन्द्राः ।

वाणिज्यम्—प्राचीनकाले यथा कृषिः समुन्नता, पशुपालनं समुन्नतं, शिल्प-विद्या परिवृढा तथैव वाणिज्यमपि समृद्धमासीत् । प्राचीनाः आर्याः रहस्यमेतद् अज्ञासिषुः यद् वाणिज्यमन्तरा अर्थव्यवस्था न सुदृढ़ा भवितुमर्हति । अथर्ववेदस्य तृतीयकाण्डस्य पञ्चदशतमे सूक्ते वाणिज्यस्य मनोहारी वर्णनं पठित्वा तत्कालीनं वाणिज्यं ज्ञातुं शक्यते । वाणिज्यविकासाय ये ये उपायाः संभवन्ति ते ते सर्वे तत्र वर्णिताः सन्ति । पदार्थविनिमयस्य रमणीयं चित्रमेकं विलोक्यताम्—

देहि मे ददामि ते निमे धेहि नि ते दधे ।
निहारं च हरासि मे निहारं निहराणि ते । यजु० ३.५०
शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन । यजु० ४.२६

ये जनाः कृषिकर्मणि, पशुपालने, उद्योग-वाणिज्यव्यवसाये अन्यस्मिन् कस्मिन्नपि वा अर्थार्जन व्यवहारे निरताः समभवन् ते सर्वे राज्येन संरक्षिताः बभूवुः ।

करव्यवस्था—अर्थव्यवस्थायां कराधानं महत्त्वपूर्णं भवति । राज्यं कराधानेन विना पदमेकं न चलितुं शक्नोति । राजा प्रजाभ्यः करग्रहणं कुर्यादित्यस्मिन् विषये बहवो मन्त्राः दृष्टिपथमायान्ति । यथा—

इन्द्र सोमं पिब ऋतुना ऽत्वा विशन्तीन्दवः ।
मत्सरासस्तदोकसः ॥ ऋग् १.१५.१

करस्य कृते बलिः शुष्क, पान, हवि भाग इत्यादी-शब्दानां प्रयोगाः मन्त्रेषु दृश्यन्ते । अथर्ववेदस्य मन्त्रे राज्ञे प्रसन्नतया करदानाय जनाः प्रेर्यन्ते—

अच्छात्वायन्तु हविनः सजाता अग्निर्दूतो अजिरः संचरातै ।
जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रतिपश्यासा उग्रः ॥ अथर्व० ३.४.३

अन्यत्रापि विषयोऽयं प्रतिपादितः—

इदं हविर्यातुधानान् नदी फेनामिवा वहत् । अथर्व० १.८.१
यातुधानस्य सोमपं जहि प्रजाम् । अथर्व० १.८.३
सोमपा अभयङ्करः । अथर्व० १.२१.१
बहुं बलिं प्रति पश्यासा उग्रः । अथर्व० ३.४.३
ध्रुवं ध्रुवेण हविषाव सोमं नयामसि । अथर्व० ७.९४.१

कराधानस्यास्य प्रयोजनन्तु प्रजा—पालनं, रञ्जनं, संवर्धनं वा। महर्षिदयानन्दः ऋग्वेदादि भाष्यभूमिकायां विषयेऽस्मिन् स्वविचारान् एवं प्रकटयामास—

राज्ञां प्रजानां राजपुरुषाणाञ्च कर्तव्यमिदं यत् ते एवंविधामर्थव्यवस्थां स्वीकुर्युः येन अप्राप्तस्य प्राप्तिः प्राप्तस्य प्रयत्नेन रक्षणं, रक्षितस्य वृद्धिः, वृद्धिं प्राप्तेन च धनेन वेदविद्यायाः धर्मस्य च प्रसारः, छात्राणां वेदमार्गोपदेशकानामसमर्थनामनाथानाञ्च पालनं भवेत्।

वेदभाष्यं कुर्वद्भिः महर्षिवर्यैः वेदमन्त्रव्याख्यायां कर-प्रयोजनमित्थं प्रतिपादितम्, ... नृपः प्रजाभ्यः करं स्वीकृत्य न पालयति सः राजा दस्युसमो वर्तते। अतएव प्रजा राज्ञे करं प्रयच्छति येन सोऽस्मान् पालयेत्, राजा च एतदर्थमेव पालनं करोति येन प्रजा करं दद्यात्।'

अथर्ववेदे राजा प्रजाभ्योऽर्जितस्य धनस्य षोडशतमभागग्रहणाय निर्दिष्टोऽस्ति—

यद् राजानो विभजन्त इष्टापूर्तस्य षोडशं यमस्यामी सभासदः।
अविस्तस्मात् प्र मुञ्चति दत्तः शितिपात् स्वधा॥ अथर्व० ३.२९

वैदिक अर्थव्यवस्थायां सन्ति ते केचिद् विलक्षणाः गुणाः येन वर्तमानकालेऽपि तस्याः महत्त्वमक्षुण्णमेव। यदि वयं परिवारेषु समाजे, देशे विश्वे वा अर्थेन सुखं प्रसारयितुमिच्छामस्तर्हि प्रचारोऽस्या व्यवस्थायास्सुतरामपेक्षते। अस्याः अर्थव्यवस्थायाः वैशिष्ट्यमिदम्—

१. त्यागभावना — **तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद् धनम्।** यजु० ४.१९

२. समत्वभावना — **अज्येष्ठासो अकनिष्ठास एते, सं भ्रातरो वावृधुः सौभगाय।** ऋ० ५.६०.५

३. प्राणिमात्रे समदृष्टिः —**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे।** यजु० ३६.१८

४. मानवकल्याणभावना — **पुमान् पुमांसं परिपातु विश्वतः।** ऋग् ६.७५.१४

५. सहभोजनम् — **सहभक्षाः स्याम।** अथर्व० ६.४७.१

सग्धिश्च मे सपीतिश्च मे। यजु० १८.९

केवलाघो भवति केवलादी। ऋग् १०.११७.६

६. अक्षनिन्दा-कृषिप्रशंसा — **अक्षैर्मा दीव्यः कृषिमित् कृषस्व।** ऋग् १०.३४.१३

७. यज्ञीय भावना —

उत्तिष्ठ ब्रह्मणस्पते देवान् यज्ञेन बोधय।
आयुः प्राणं प्रजां पशून् कीर्तिं यजमानं च वर्धय॥ अथर्व० १९.१३.१

८. दानभावना — **शतहस्त समाहर सहस्रहस्त संकिर**

भौतिकभावनाभाविते वर्तमानयुगे यदि वैदिक अर्थव्यवस्थायाः गुणाः स्वीक्रियन्ते तर्हि सर्वस्य जगत कल्याणमेव स्यात् नास्त्यत्र मनागपि संशयावसरः।

ताजिकशास्त्रे सहमविमर्शः

डॉ० इन्द्रमणिदासः

त्रिस्कन्धज्योतिषे होरास्कन्धो जातकसंज्ञया व्यवह्रियते । अस्यैवापरा शाखा कबरनृपवरपरिषदः प्रवर-पण्डितस्य नीलकण्ठस्य १५०७ शकाब्दे प्रणीता ताजिकनीलकण्ठी वर्तते । यत्रार्वीफारसीमिश्रितसुरगिरानिबद्धो ताजिकज्योतिषप्रबन्धो विराजते । तदीयात्मजो गोविन्ददैवज्ञोऽस्य प्रशस्तिपद्यं लिखति —

सीमामीमांसकानां कृतसुकृतचयः कर्कशस्तर्कशास्त्रे
ज्योतिःशास्त्रे च गर्गः फणपतिभणिति व्याकृतौ शेषनागः ।
पृथ्वीशाकब्बरस्य स्फुरदतुलसभामण्डनं पण्डितेन्द्रः
साक्षाच्छ्रीनीलकण्ठः समजनि जगती मण्डले नीलकण्ठः ॥

तत्र जातकशब्दो प्रादुर्भावार्थक "जनी" धातोः "ज्ञानजनोर्जा" इतिसूत्रेण जनी स्थाने जादेशे भूतार्थे क्त-प्रत्यये "जात" शब्दो निष्पद्यते ।

"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौवर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥"

इति भर्तृहरेर्वाक्यपदीयकारिकाबलेन वर्णविपर्यये सति "ताज" शब्दो निष्पन्नः क्त प्रत्यये "ठस्येकः" इति ठस्य इकादेशे विभक्तिकार्ये च ताजिकशब्दः साधीयान् । ताजिकजातकयोरभेदात्ताजिकशास्त्रस्यापि होरास्कन्धेऽन्तर्भावः । ताजिकशास्त्रे मनुष्यजातक, ताजिकभूषण, ताजिकमुक्तावल्यादयो बहवो ग्रन्थाः प्रसिद्धाः समग्रभारते विलसन्तितराम् ।

तत्र जन्मपत्रवर्षपत्रप्रश्नादिज्योतिस्तत्त्वानां जनगणमनोरञ्जनाय प्रत्येकप्रश्नसम्बन्धिसमस्यानां समाधा-नार्थं बहूनि सर्वोत्तमसमुत्तरणप्रकरणानि विद्यन्ते । ज्योतिषप्रियजगतोमनोरञ्जनाय द्वादशभावानां सहाय्यं प्रतिपाद-नार्थं ताजिकविदांवरैर्बहूनां सहमानां नवभव्याविष्कारो विहितः ।

अत्र सहमशब्द "सद्म" शब्दस्यैवापरोऽपभ्रंशो बोध्यः । यतो हि विशरणगत्यवसादनाद्यर्थक "षद्लृ" धातोः धात्वादेः षः सः "इति षस्य सत्वेऽनुबन्धलोपे सीदन्त्यस्मिन्नित्यर्थे" "सर्वधातुभ्यो मनिन्" इति मनिन् प्रत्ययेऽनुबन्धलोपे "सद्मन्" इतिशब्दो नान्तो नपुंसके निष्पद्यते । तस्य सद्म शब्दस्य पारसीकभाषीय दकारस्य हकारे जायमाने सहमशब्दो गृहभावादि वाचकोऽवसेयः । एवं गृहवाचकः सदनशब्दोऽपि सहनरूपेण व्यवह्रियते ।

लोकोपयोगिशतशः सहमेषु नीलकण्ठदैवज्ञेन पञ्चाशत् सहमानामेव श्लोकबद्धरचनया सोदाहरणं सफलमूहायोह पुरस्सरं विवेचनमकारि । पाश्चात्या अपि सहमानुहरणेऽपश्चिमा नाभूवन् । तैरपि भाग्यबिन्दुरूपेण THE PARS FORTCUNAE इत्याख्योऽभिनवः खेटविन्दुः जन्मकुण्डलीषु समावेशितः । यश्च लक्षणतो पुण्यसहमसमानधर्मा एवाभाति ।

ताजिकनीलकण्ठीग्रन्थे पञ्चाशत् सद्मनां (सहमानां) वर्णनमास्ते । तत्रोपकरणत्रयात्मकशोध्यशोधकयोः क्षेपकसमावेश एव प्राधान्यं स्वीकुर्वन्नस्ति । तत्र पुण्यं स्नानदानादीनां तिथिनक्षत्रयोगेष्वेव लोके प्रसिद्धम् । तिथिनक्षत्रादिपर्वणां सूर्यचन्द्रयोरेवायुतसम्बन्धो वर्तते । अतस्तत्र सूर्यचन्द्रावेवशोध्यशोधकरूपेणोपकरणभूतौगृहीतौ स्तः । एवं सर्वत्र कल्पनाश्रयो हि मूलम् । विशेषतः शोध्यशोधकयोर्मध्ये क्षेपकं प्रायेण लग्नमेव वर्तते । तत्रापि चैतदवधार्यं यत्—

शोध्यशोधकयोर्मध्ये यदाक्षेपो न दृश्यते
तदा सैकविधिर्मूलं तद्भावे नैव सैकता ।
दिवानिशोर्विभागेन व्यत्ययाद्बहुलं स्मृतम्
क्वाचित्को व्यत्ययो नास्ति तत्र हेतुर्न लक्ष्यते ॥

इत्थं त्रयो विंशति सहमेषु शोध्यशोधकयोर्दिवानिशोर्भेदेन व्यत्ययः क्षेपयोगोऽनिवार्यः । एवं पञ्चदशसहमेषु शोध्यशोधकयोर्दिवानिशोर्भेदेऽपि सादृश्यमास्ते । एकचत्वारिंशत्सहमेषु लग्नमेव क्षेपकोऽङ्गीकृतः । एवं नवसु क्षेपकभेदो दृक्पथमवतरति ।

शोध्यशोधकयोः परिवर्तनरहितानि निम्न पञ्चदशसहमानि समुपन्यस्यन्ते ।

सहमानि शोधकः—शोध्यः + क्षेपकः

१. भ्राता वृ-श + ल

२. सुतः वृ-चं + ल

३. रोगः ल-चं + श

४. बन्धुः बु-चं + ल

५. व्यापारः मं-बु + ल

६. मृत्युः अष्टमः—चं + श

७. परदेशः धर्मः-धर्मेशः + ल

८. धनम् धनं-धनेशः + ल

९. अन्यस्त्री शु - सू + ल

१०. वणिक्कर्म चं - बु + ल

११. विवाहः शु-श + ल

१२. सन्तापः शु-चं + रिपुः

१३. श्रद्धा शु-मं + ल

१४. प्रीतिः विद्या-पुण्यम् + ल

१५. दुहिता शु-चं + ल

एषु दिवारात्रिभेदेन व्यत्ययो न जायते। गुरुविद्ययोः, अम्बु-अन्यकर्मणोः, राजतातयो कलिक्षमयोः, यशोमित्रबलदेहानां च सहमानि मिथः साम्यः।

१. गुरुः सू-चं + ल

२. विद्या सू-चं + ल

३. राजः श-सू + ल

४. तातः श-सू + ल

५. अम्बुः चं-श + ल

६. अन्यकर्म चं-श + ल

७. जीवितम् वृ-मं + ल

८. कर्म वृ-मं + ल

९. यशः वृ-पुण्यम् + ल

१०. मित्रम् वृ-मं + ल

११. बलम् वृ-पुण्यम् + ल

१२ देहः वृ-पुण्यम् + ल

एषु दिवानिशोर्भेदेन शोध्यशोधकयोर्विपर्ययो विधेयः।

इदानीं द्वादशसहमानां ग्रहात्मकमात्रशोध्यशोधकयोर्भेदेन लग्नक्षेपकयुतास्वरूपणान्यस्यन्ते।

१. पुण्यम् च-सू + ल

२. आशा श-शु + ल

३. शास्त्रम् वृ-श + बु

४. माता चं-शु + ल

५. जीवितम् श-वृ + ल

६. कर्म मं-बु + ल

७. चन्दकम् चं-बु + ल

८. सूतिः वृ-बु + ल

९. जाडयम् मं-श + बु

१०. पानीयम् श-चं + ल

११. रिपुः मं-श + ल

१२. उपायः श-वृ + ल

इदानीं सर्वत्र भावभावेशसहम-उच्चनीचाद्युपकरणोपेतानामेकादशसहमानां स्वरूपाणि समुपस्थाप्यन्ते ।

१. माहात्म्यम् पुण्य-मं + ल

२. सामर्थ्यम् मं-लग्नेशः + ल

३. गौरवम् वृ-चं + सू, च-वृ + चं

४. सन्मथः चं-लग्नेशः + ल

५. कार्यसिद्धिः श-सू + सूर्यराशीशः

६. शौर्य्यम् पुष्यम्-मं + ल

७. दारिद्र्यम् पु-बु + वृ

८. गुरुता ०/९०-सू + ल, १/३-चं + ल

९. अम्बुपथः ३/१५-श + ल

१०. बन्धनम् पुण्यम्-श + ल

११. अश्वः पुण्यम्-सू + ल

शोध्यशोधकयोर्मध्ये यदि क्षेपः समापतेत् ।
तदा सैकविधिर्न स्यात् सद्मसाधनसम्मतः ।
शोध्यशोधकयोर्मध्ये यदि क्षेपो न सम्भवेत् ।
सैकत्यनियता तत्र सहमवित्सुभाषिता ॥

ग्रन्थान्तरेषु बहूनि सहमानि प्रोक्तानि तेषु कानिचिदिह प्रदर्श्यन्ते तत्रादौ यावानोक्तानि चत्वारि प्रसिद्ध-सहमानि । यथा—

१. पितृव्यः सू-श + ल

२. आखेटकः षष्ठेशः-षष्ठ + व्ययः

३. भृत्यम् चं-बु + ल

४. बुद्धिः वृ-सू + ल

एष्वपि दिवारात्रिभेदः सैकनिरेकौ च हिल्लाज ताजकोक्तानि सप्त वर्तन्ते —

१. प्राप्तिः लाभेशः-ला + ल

२. निधिः चतुर्थेशः-ल + ल

३. धैर्यम् माहात्म्यवत्

४. ज्ञातिः विद्यावत्

५. ऋणम् श-शु + ल

६. गर्भः नवमभावः-ल + सुतभावः

७. सत्यम् चं-बु + ल

एषां दिवारात्रिभेदो नास्ति

इदानीं सहमफलप्राप्तिसमयज्ञानप्रकारः प्रदर्श्यते

स्वनाथहीनं सहमं तदंशाः स्वीयोदयघ्नाविहतास्त्रिशत्या ।
तत्सद्मपाको दिवसैर्हि लब्धैः स्यात्तद्दशायां तदसम्भवे वा ॥

स्पष्टसहमराश्यादितः स्पष्टसहमेशराश्यादिकमपास्य शेषराश्यादिकस्यांशादिकं विधाय सहमस्य राशेः स्वीयोदयासुभिः संगुण्य त्रिशत्या (३००) विभज्य लब्धैर्दिवसाद्यैः वर्षारम्भकालिकस्पष्टसूर्यस्य राश्यादिना संयोज्य फलकालो वक्तव्यः ।

अथवा पात्यायिनी विंशोत्तरीय मुद्दादशायां यदा सहमराशीश्वरदशासमायाति तदा फलकालो बोध्यः ।

अथ सहमफलनिर्णयः प्रदर्श्यते

स्वोच्चादिसत्पदगतो यदि लग्नदर्शी वीर्यान्वितः सहमयो यदि नेक्षतेऽङ्गम् । नासौ बलीरविशशिश्रितमेश दर्शपूर्णान्तलग्नप बलस्य विचारणेत्थम् ॥ सहमेशः स्वर्क्ष स्वोच्चस्वहद्दृक्काणनवांशादौ शुभवर्गगतः लग्नदर्शी वा स्यात्तदा सहमेशो बलवान् बोध्यः । एवं स्वोच्चादिवर्गगतोऽपि यदि लग्नं न पश्यति तदासौ निर्बल एव ज्ञेयः । इत्थमेव पञ्चाधिकारिणां बलवत्तामपि निश्चप्रचीकृत्य अमान्तपूर्णिमान्तलग्नानामपि बलं बुद्ध्वा फलं वक्तव्यमन्यथा दैवज्ञो लोके निन्द्यतेऽपि जायते ।

सहमराशिं लग्नं मत्वां तत् स्वस्वामिना शुभग्रहैर्युक्तो वीक्षितो वा स्यात्तदा सहमस्य वृद्धिर्वक्तव्या । अन्यथा पापैनिर्बलैग्रहैर्दृष्टो युक्तः समाक्रान्तो वास्यात्तदा पुण्यसहमं पापरूपेण परिणतं सत् भाग्यहानिं पूर्वजन्मनोपार्जितं पुण्यं विनाश्य चतुष्कूटं पापमयं कृत्वा समन्ताद्धानिं सहमसम्बन्धिनं तत्त्वं विनाश्य दुर्दशापात्रं प्रत्यक्षीकरोति । येन सर्वत्रव्यापारदिषु पातनं महायातनानां मूलं भवति ।

एवं सहमभवनं लग्नादष्टमाधिपतिना युते क्षितमाक्रान्तं पापग्रहेक्षितं पापरित्थशालितं वा स्यात्तदा सहमभावस्य शुभसम्भवे सर्वत्रकार्यक्षेत्रे विलयं प्राप्नोति ।

यदि च पुण्यसहमस्य बलवत्ता शुभदृष्ट्यादिभिः प्राबल्यं स्यात्तदा धर्मसिद्धिर्भाग्यबृद्धिः राजपक्षाल्लाभः । कार्यक्षेत्रे विशेषलाभाच्च सर्वत्र यशस्वीभूय प्रतिष्ठा महत्तास्पदं पदं लब्ध्वा सुखनिद्रया शेते । लोके पराक्रमी च गण्यते ।

एतदतिरिक्तं पुण्यसहमराशिर्वर्षलग्नात्त्रिकस्थाने शुभैर्दृष्ट्या युत्याक्रान्त्या वा वर्षान्ते किञ्चित्सुखानुभवं प्रकटयति । यदि क्रूरैर्दृष्टं जुष्टं प्लुष्टं वास्यात्तदा सर्वतोमुखी हानिः दुर्घटितानि दुःस्वप्नानि । अनन्तकष्टानामापातात् सर्वपरिवारं स्वशरीरं वा दुर्घटाभिर्दुर्घटनाभिर्निपीडयति ।

कार्यसिद्धिसहमविचारः

कार्यसिद्धिसहमराशिकुण्डलीं प्रत्यक्षीकृत्यावलोकनीयं यत् सहमलग्नं शुभदृष्ट्या युक्त्या शुभैरित्थशाली वा स्यात्तदा प्रतियोगितादिषु युद्धेषु च विजयीभूय लब्धः प्रतिष्ठस्यात् । कार्यक्षेत्रेषु प्रत्यहमभिवृद्धिशीलो लोकप्रियश्च जायते । भाविनीषु कार्यसिद्धिषु च साफल्यं लब्ध्वा सुखसाधनैः सम्पन्नः स्वगृहं स्वर्गतुल्यं कर्तुं प्रभवति । अन्यथा क्रूरैर्जुष्टं कर्तरीयोगादिनां प्लुष्ठं नीचादिवर्गैः सम्बद्धं स्यात्तदा प्रचलनशीलेषु कार्यक्षेत्रेष्वपि महत्यो विपत्तयः प्रस्तुतीकृत्य गृहं नकरद्वारं परिणामयति । शत्रुभिः सह प्रचलनशीलेसु प्राचीनविजिताभियोगेष्वपि पराजयं लभते । सर्वत्रजायमान भाजनीभूय लोकं मुखं दर्शयितुं योग्योऽपि न भवति ।

कलिसहमविचारः—

कलिसहमं यदि पापग्रहैदृष्टं इत्थशालयुक्तं वा स्यात्तदा केनापि कलहकारणेन निधनतुल्यं कष्टमनुभवति महाघोरकष्टैः सहसङ्घर्षस्य कालं प्रत्यक्षी करोति । यदि कलिसहमलग्नकुण्डल्यां लग्नं शुभैर्वीक्षितं युतं समाक्रान्तं वा स्यात्तदाभियोगेषु जयः । शत्रवोऽपि मित्रता पक्षं स्वीकर्तुं प्रभवन्ति ।

विवाहसहमविचारः—

विवाहसहमेशः सौम्यग्रहैर्युतो दृष्टो मुथशिली वा स्यात् तदा शुभविवाहः स्वकुलोचितां भार्यां वरः प्राप्नोति । कन्या च प्रकृत्या स्वेष्टं पतिं लब्ध्वा सुखयुक्ता भवति । यदि शुभाशुभैर्मिश्रितैः सहमाधिपो युक्तो समवलोकितः स्यात्तदाधिकप्रयासैः परिणयः सम्भाव्यते । यदा पापैः त्रिकाधीशैर्युतो दृष्टो वा स्यात्तदा विवाहस्य कथापि न प्रचलति । जातकतत्त्वादिग्रन्थेषु विवाहसहमसदृश एव विवाहसमयाधायकः प्रकारो दृश्यते । लग्नेशसप्तमेशयोः स्पष्टराश्यादियोगे यो राशिः समायाति तस्मिन् राशौ तत्त्रिकोणराशौ गतो विबुधाधिप गुरौ विवाहः सम्पद्यते । तत्र यदि सप्तमेशलग्नेश्वरौ एकस्मिन्नेव राशौ केन्द्रकोणे वाविद्यमानौ भवेतां तस्यामेकराशौ गुरौ गते विवाहः सम्पन्नो भवतीति ज्योतिर्विदामनुभवः । यदि सप्तमेशस्य केनापि भावेनान्योन्याश्रयसम्बन्धः स्यात्तदा विवाहे विलम्बः । विवाहे सत्यापि सुखाभावो जायते ।

पुत्रसहमविचार:—

पुत्रसहमाधिप: शुभग्रहैर्युतोदृष्टो वास्यात्तदा सद्य: पुत्राप्तियोग: सम्भवति। एवं पापैर्युक्तो दृष्टो वा शुभग्रहेण सममित्थशाली स्यात् तदा प्राक्पुत्रद्वाराद्दु:खं पश्चात् सौख्याप्ति: स्यात्। एवं यदि पुत्रसहमलग्नं पापैर्युतंदृष्टं पापग्रहैरित्थशालाभावे ईसराफयोगे विद्यमानऽस्तंगतो वा स्यात्तदा पुत्रहानिर्भवति। जन्मकालिक-पञ्चमेशो यदि वर्षे पुत्रसहमेश: स्यात्तदासौशुभग्रहै: सुहृद्भिश्चदृष्ट: स्यात्तदावश्यं पुत्रलाभो भवति। एवं जातकग्रन्थेषु दृश्यते यत् पञ्चमेशलग्नेशयो: स्पष्टराश्यादियोगे यो राशिर्भवति यदि पञ्चमलग्नाधिपौ क्वचिदपि एकस्मिन्नेव राशौभवेत्ताम् तदा तस्मिन्नेव राशौ तस्मात्त्रिकोणराशौ गते गुरौ पुत्रयोगो भवति।

यश:सहमविचार:

यश: सहमाधिपो वर्षलग्नादष्टमभावे पापैर्युतो दृष्टो वा स्यात्तदा प्रवृद्धपितृपरम्परा प्राप्तयशसोऽपि विनाशको भवति। व्यसनादि प्रवृत्त्यापयशसोभागी स्यात् यश: सहमाधिपो यदिशुभ: शुभैर्दृष्टो युतो मुथशिलोसब-लो वा भवेत्तदा यशोमण्डलमण्डित: राजद्वारे उच्चास्पदं, युद्धेऽभियोगे निर्वाचनादौ जयी भवति। भवनयानशस्त्रशास्त्रलाभादिना युतो: जायते।

एवमेवाऽऽशासहमादीनां स्वामिना शुभयुतदृष्ट्या शुभैरित्थशालवशात्, स्वतोऽभीष्टधनवाहनवस्त्रादि लाभान्वित: स्यादिति वाच्यम्।

राजसहमविचार:

जन्मकाले राजयोग: पूर्णरूपेण विद्यमान: स्यात् तदा राजसहमाधिप: केन्द्रकोणाधिपेन युक्त: शुभैग्रहैर्दृष्ट: शुभैरित्थशालपरायण: स्यात्तदा राजसद:सुनिर्वाचित: मन्त्रीत्यादि पदं लब्ध्वा यशस्वी जायते।

एवं सर्वेषां सहमानां विचारो विधेय:। सहमविषयमवलम्ब्य ताजिकमतमनुसृत्य मया विदुषां पुरस्तात् संक्षेपत: प्रोक्तम्।

भारतीयपद्धत्या सहमानां यद्यपि नीलकण्ठादिभिर्ज्यौतिविवरै: कालिदासमतमनुसृत्य—

पुराणमित्येव न साधुसर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्त: परीक्ष्यान्यतरद्भजन्ते मूढ: पर प्रत्ययनेयबुद्धि:॥

यद्यपि वराहनीकण्ठप्रभृतिभि: परमुखावलोकनपरै: स्वयं विद्यापारङ्गतैरपि षड्वर्गी, पञ्चवर्गी, द्वादशवर्गी, अष्टवर्गी इकबालादियोगा:, हीनांशपात्यांशाभिर्दशा, सहमानामनुकरणम्, वृहत्पाराशरीग्रन्थेऽन्तर्दशानां षोडश-वर्गादीनां कालचक्रदशादीनां आलोडनविलोडनेष्वेव भारतीयछात्राणां बुद्धिवैक्लव्याधायकं व्यर्थपरिश्रमं स्वप्रा-चीनफलितपद्धत्यास्त्याग: ताजिकहिल्लाजादिपाश्चात्यानां मूलहीनानामनुकरणशरणं व्यर्थमेवाभाति। एतदेव विवाहादिषु दशदोषा, अष्टकूटा:, द्वादशकूटा: अष्टादशकूटा जीवशर्मसत्याचार्यजैमिनीत्यादिनां ऋषिभिन्नानां कपोलकल्पितग्रन्थानामनुकरणं न युक्तिसङ्गतमाभाति।

एतदर्थमेन सुधाकरद्विवेदिमहाभागैः गणकतरङ्गिण्यां शीघ्रबोध, मुहूर्तचिन्तामणि, नीलकण्ठ्यां या चर्चा विहिता सा चर्चा खिन्नहृदयैरेव तैः विहिता आसीत् एतत्स्थाने सिद्धान्तज्योतिषमवलम्ब्य वास्तविकफलित-तथ्यानामनुसन्धानं परमावश्यकम् ।

सप्तविंशतिनक्षत्राणां गणनापि सर्वथा वेदविरूद्धा वर्तते पाश्चात्यानामनुकरणम् । पूर्वोत्तरा युक्तानां फाल्गुनभाद्रपदानां पृथक-पृथक् कल्पनं वेदैः सहान्यायः फलितविकासवाधा समुत्पाद्यते । इदानीं कश्चिदपि गवेषणा पूर्णाध्ययनेनानुसन्धातुं न प्रवर्तते ऽपितु विद्यावारिवाचस्पतिः उपाधिप्राप्तिमेववाञ्छापरो विद्यते । केवलं द्वादशराशीनां चतुर्विंशतिनक्षत्राणां अष्टाचत्वारिंशदेव नक्षत्राणामनुसन्धानपूर्वकं गणेषणा पूर्णमनुसन्धानं स्यात्तदैव भारतीयपद्धत्या फलवाचनं सत्यसिद्धं भविष्यति । अन्यथा भाग्यविन्दुकल्पनानुसन्धान पराः समेऽपि कदाचिद् वञ्चेकानां श्रेण्यां जना योग्या एव भविष्यन्ति । उदाहरणरूपेण सर्वे नक्षत्राणां व्युत्पत्तिमाश्रित्य न क्षीयन्ते, न क्षरन्तीति नक्षत्रम् अत्रतु प्रायः प्रतिमासं नक्षत्राणां क्षयो दृश्यते यदि वयं चतुर्विंशतिनक्षत्राण्याश्रित्य वैदिकपद्धति-मनुसृत्यसमस्तभावस्पष्ट, षड्वर्गाष्टकूटद्वादशाष्टकूटानां जीवशर्म, सत्याचार्यः नीलाकंठाद् मताना तिलाञ्जलिं दत्वानुसन्धानपरायणाः तदा केवलं द्वादशलग्नैश्चतुर्विंशति, अष्टाचत्वारिंशत् सिद्धगणितागतैरेवफले प्रवृत्ता भवेम तदावश्यं नक्षत्रेश्वरोऽभगवान् अस्मान् प्रति वरदी भूत वास्तविकगणितसिद्धं ज्योतिषं प्रदास्यति वरप्रत्ययनेय-बुद्धयो वयं परमुखापेक्षणेन निष्कर्मण्या एव पङ्केगौरिव स्थिताः स्म इत्युक्त्वा सद्गणितं प्रति प्रेरयित्वा विरमामि ।

विश्वसंस्कृतौ शब्दविद्याया योगदानम्

प्रो० जानकीप्रसादद्विवेदः

या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
वर्णानन्तः प्रकटकरणैः प्राणसङ्गात् प्रसूते ।
तां पश्यन्तीं प्रथमुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ।।

सम्-उपसर्गस्य, डु कृञ् करणे-धातोः, भावे कर्मणि वा क्तिन्-प्रत्ययस्य च संयोगेन निष्पन्नः संस्कृति-शब्दो यदा अभिव्यापकार्थमङ्गीकरोति तदा विश्वस्य सर्वोत्तमामुपलब्धिमभिव्यक्तिं च स्वस्मिन् संगृह्णाति । विश्वव्यापिनी संस्कृतिरेषा विश्ववारापदेनाभिधीयते । संस्कृतेरस्याः परिशीलनेन विश्वं नीडवत् कुटुम्बवद् वाऽऽभासते । यथोक्तम् - **'यत्र विश्वं भवत्येकनीडम्, वसुधैव कुटुम्बकम्'** इत्यादि । संस्कृतिपदार्थस्य विस्पष्टीकरणप्रसङ्गे एवं वक्तुं शक्यते यत् समुपसर्गादनन्तरं कृधातौ सत्यामत्र भूषणार्थे सुडागमः प्रवर्तते — **"सम्पर्युपेभ्यः करोतौ भूषणे"** (अ ६/१/१३७) इति । भूषणं भवति शोभातिशयविधायकम्, तेन च बहवो दोषा अपकर्षा वाऽपसार्यन्ते । तस्मादद्य दोषशमनसमर्थाः संस्काराः, संस्कारविधायिनी क्रिया, ततोऽधिगता विशिष्टोप-लब्धिरभिव्यक्तिश्चेत्यर्थः जातं संस्कृतिपदेनाङ्गीक्रियते । संस्कारा भवन्तु, तद्विधायिनी क्रिया वा भवतु, उपलब्धि-रभिव्यक्तिर्वा भवतु, सर्वस्यैव तस्यार्थजातस्य आधारो भवति श्रुतिस्मृतिपुराणादिवाङ्मयमेव । संक्षेपतो यस्य तत्त्वस्य माध्यमेन मानवता आधिभौतिकीम् आधिदैविकीम् आध्यात्मिकीं च वैशिष्ट्यसन्ततिं सम्प्राप्नोति, तदेव तत्त्वं संस्कृतिपदवाच्यं भवति ।

संस्कृतेरुत्पादकं तत्त्वमद्य आचारः, विचारः, अनुभवजन्यं ज्ञानम्, बुद्धिजन्यं ज्ञानं च मन्यते । केचिद् वदन्ति यदाचारसकाशात् संस्कृतिः, विचाराच्च सभ्यता समुदेति । परं समष्ट्यभिप्रायेण समीक्षकाः समामननति यद् बहिरङ्गरूपेण आचारः, अन्तरङ्गरूपेण च विचारः संस्कृतिं समुद्भावयति । एवमप्युच्यते यदनुभवजन्यं ज्ञानं संस्कृतेः, बुद्धिजन्यं ज्ञानं च सभ्यतायाः समुत्पादाय प्रभवति । अनुभवजन्यज्ञानस्य स्थायित्वात् तदाधारेण समुद्भूता संस्कृतिरपि स्थायित्वं लभते । किं च बुद्धिजन्यं ज्ञानं परिवर्तनशीलतामावहति, तेन तदाधारिता सभ्यताऽपि शीघ्रमेव परिवर्तते ।

संस्कृतेः स्रोतः सम्प्रेरकं तत्त्वं वा भवति **'उदात्तं चरित्रम्'**। चारित्रिकश्रेष्ठताया उपादानानि सन्ति — नैतिकता, शीलम्, शिष्टाचारः, मर्यादा चेति। उदात्तचरित्रशीला मन्त्रद्रष्टार ऋषयो यज्ञसंस्थारूपेण भारतीयां संस्कृतिं संवर्धितवन्तः। उपनिषत्सु तर्कप्रधानाया विचारप्रधानाया वा संस्कृतेराश्रयणान्मोक्षप्राप्तये बलवती आकाङ्क्षा प्रवृत्ता। तस्याश्चरमपरिणतिर्दर्शनशास्त्रेषु द्रष्टुं शक्यते। पुराणेषु समन्वयात्मिकायाः संस्कृतेर्विकास उपलभ्यते। समन्वयार्थं सर्वत्र धर्मो नूनमपेक्ष्यते। तस्माद् भारतीयसंस्कृतेर्मुख्याधारो भवति धर्मः। स्मृतिभिर्नीतिनिर्धारणरूपा संस्कृतिः समाश्रिता। श्रीमद्वाल्मीकीयरामायणे सत्यपालनपरा संस्कृतिः समाद्रियते। स्वकीयवचनस्य परिपालने, मातापित्रोर्मध्ये पितुः प्राधान्याङ्गीकारे, सनातनधर्माचरणे, शरणागतस्य संरक्षणे कारुण्यपद्रर्शने च सर्वत्रैव सत्यव्यवहारे प्रमादो नैव परिलक्ष्यते। परं महाभारते सत्यानृतमिश्रितो व्यवहारः प्रायेण परिलक्ष्यते, तस्मात् तत्र प्रायश्चित्तीया संस्कृतिः सन्निहितेति समाख्यातुं शक्यते। समष्टिरूपेण भारतीयसंस्कृते रूपं सत्यं शिवं सुन्दरं च समुदीर्यते। सत्यरूपं दर्शनेषु, शिवरूपं नीतिग्रन्थेषु, सुन्दरं च रूपं दृश्यते कलाक्षेत्रे भारतीयसंस्कृतेः।

इदमवश्यमत्र ध्यातव्यं यद् व्याकरणे साधुशब्दानां साधुत्वान्वाख्यानेनासाधुशब्दानां च परिवर्जनेन लोकेऽसाधवो जनाः प्रयत्नेन हेयाः साधुजनाश्च संग्राह्या भवन्ति इति शाब्दिकाचार्यैः र्याणामभिप्रायः परिलक्ष्यते। सङ्केतितमस्तीति। कार्यमिदं तेषां संस्कृतेरुदात्ततामभिव्यनक्ति। शब्दसाधुत्वसम्पत्तये प्रत्येकं पदे प्रकृतिप्रत्ययागमादेशादिरूपा विविधाः संस्कारा आचार्यैः संकल्पिताः सन्ति, एवं मानवजीवस्य समुन्नतये विकासाय वा लोकव्यवहारे बहवः संस्कारा अनुष्ठीयन्ते। एतेन यथा संस्कारवन्तः शब्दा अभ्युदयाय प्रभवन्ति तथैव संस्कारवन्तो जना लोके समादरं लभन्ते।

वेदपुरुषस्य षडङ्गेषु मुखरूपं व्याकरणं मुख्यमङ्गं स्मर्यते। इदमेव शिष्टैःकाव्यादौ प्रयुक्तानां शब्दानां साधुत्वस्य नियामकत्वेन शब्दविद्यापदेन शब्दानुशासनपदेन चाभिधीयते। वाङ्मलानां चिकित्सितेन, मोक्षमाणानाम् ऋजुराजपद्धतिरुपेण, वेदानामपि वेदेन चानेन व्याकरणेन शब्दानां प्रकृतिप्रत्ययविभागज्ञानपूर्वकं यत् साधुत्वज्ञानम् अर्थज्ञानं चासाद्यते, तज्ज्ञानपूर्वकं शब्दानां प्रयोगेणाभ्युदयो भवति — **"शास्त्रपूर्वके प्रयोगोऽभ्युदयस्तत्तुल्यं वेदशब्देन"** इति वार्त्तिकं व्याचक्षाणो भगवान् भाष्यकारो बभाषे — **"यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति।** एवं यः शास्त्रपूर्वकंशब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते" (म० भा० — पस्पशाह्निक, पृ० ५६) इति।

अनादिसिद्धशब्दानां तत्तदर्थेषु साधुत्वपरिज्ञानं व्याकरणेनैव कर्तुं शक्यते, तेनैव प्रकृतिप्रत्ययोर्विभागस्योपपादितत्वात्। एतादृशे व्याकरणशास्त्रे व्याकरणग्रन्थेषु वा द्विविधा संस्कृतिः परिलक्ष्यते। प्रथमा शाब्दिकाचार्यैः सूत्र-वार्त्तिक-भाष्य-वृत्ति-न्यासादिरचनायां शब्दसंग्रहाय साधुत्वनियमादिविधानाय च। समादृता लोकाभिधानशिष्टपरम्परा- शब्दार्थलाघव- प्रक्रियालाघव- आर्षप्रयोग- विवक्षा-सर्ववेदपारिषदत्वादिनिर्वाहरूपा द्वितीया च संस्कृतिः सूत्र-वार्त्तिकभाष्य-वृत्त्यादिग्रन्थेषु दर्शितानामर्थानां नियमानां चोदाहरणेषु परिलक्ष्यते।

तत्र सूत्रकारादिभिराचार्यैः सूत्रादिग्रन्थेषु समादृतायाः संस्कृतेः कतिपये पक्षा अत्र क्रमेण प्रस्तूयन्ते —

१. लोकव्यवहारसमादररूपा संस्कृतिः

इदमत्रावधेयं यल्लोकशब्देन व्याकरणान्तरम्, वैयाकरणाः, वृद्धव्यवहार-परम्परा च गृह्यते । एवमुच्यते—

लोक्येते येन शब्दार्थौ लोकस्तेन स उच्यते ।
व्यवहारोऽथवा वृद्धव्यवहर्तृपरम्परा ।। (म० भा० प्र० उ० ४/१/१) ।

लोकाभिधानस्य विविधप्रवृत्तौ प्राधान्येन परिलक्ष्यते यद् व्याकरणेन लोकप्रयुक्तशब्दानामेव साधुत्वान्वाख्यानं विधीयते । यतो हि व्याकरणं भवति स्मृतिः, स्मृतेश्च मूलमस्ति लोकव्यवहारः, अभिधानं प्रयोगो वा । महाभाष्यप्रदीपकारेण तथ्यमिदं स्पष्टमुद्घोषितम् — **'प्रयोगमूलत्वाद् व्याकरणस्मृतेः'** (म० भा० प्र० ५/१/६) इति वचनं व्याहरता । एतेन यदि लोकव्यवहृतः कश्चिदर्थः शास्त्रे नोपादीयते, तेन नैव व्याख्यायते वा, तथापि स लोकव्यवहारगतत्वात् प्रामाण्यमधिगच्छति — **"शास्त्रेऽनुपात्तोऽप्यर्थः प्रयोगादेव व्यवस्थाप्यते"** (म० भा० प्र० १/४/२१) । दृश्यते यल्लोके 'प्लक्ष आनीयताम्' इत्युक्ते न्यग्रोधो नानीयते, तेन प्रयोगस्य प्राबल्यादप्रयुक्तशब्दस्य साधने लक्षणस्य योग्यता नोपद्यते । अप्रयुक्तः शब्दो लक्षणस्य विषयो न भवतीत्यर्थः । अत एव महाभाष्यकारेणोच्यते — **"यथालक्षणमप्रयुक्ते"** (म० भा० २/४/३४) इति ।

धात्वर्थनिर्देशविषयेऽपि प्रयोगस्य = लोकव्यवहारस्य प्रामाण्यमाश्रीयते । एवं दृश्यते यद् धातुपाठे प्रायेणैकस्य धातोरेक एवार्थः पठ्यते, परम् उपसर्गादियोगेन तस्य बहवोऽर्थाः जायन्ते लोकव्यवहारसंप्रयुक्ता इति । तद्विषये एवमुच्यते —

क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः ।
प्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः ।।

महाभारतदीपिकाटीकाकारदेवबोधाचार्यवचनानुसारेण समुद्रवत् संमतस्य ऐन्द्रव्याकरणस्य समक्षं पाणिनीयव्याकरणं गोष्पदायते । एतेनेदमवगम्यते यत् संक्षिप्ते पाणिनीये व्याकरणे नैव बहवः शब्दाः साधिताः सन्ति । तेषामनिर्दिष्टानां हंस-सिंह-गूढोत्मन्-पृषोदरादीनां शब्दानां वर्णागम-वर्णविपर्यय-वर्णविकृति-वर्णनाशादिभिरुपायैः साधनं निर्दिश्यते व्याख्याकारैः पाणिनिपठितं स्वीयव्याकरणसंक्षेपसूचकं **"पृषोदरादीनि यथोपदिष्टम्"** (अ ६/३/१०९) इति सूत्रमधिकृत्य । कातन्त्रव्याकरणे आचार्यः शर्ववर्मापि लोकव्यवहारवशादेव शब्दसिद्धिं प्रामाणिकीं मनुते — **"लोकोपचाराद् ग्रहणसिद्धिः"** (१/१/२३) इति सूत्रपाठेन । कातन्त्रव्याकरणे शर्ववर्मणा वैदिकशब्दानां साधुत्वाय सूत्राणि कथन्न प्रणीतानीत्यत्र व्याख्याकारा वदन्ति — ये लोकिकाः शिष्टा भवन्ति ते वैदिकपरम्परायाः सततं प्रवर्तितत्वात् ततो वैदिकशब्दसाधुत्वं विदन्त्येव । अतस्तेषां साधुत्वं वैदिकविदुषां सकाशादेवावगन्तव्यम् । परं लौकिकशब्दानामानन्त्यात्तदीयसाधुत्वविधानाय शास्त्रमवश्यमारब्धव्यं भवति —

वैदिका लौकिकज्ञैश्च ये यथोक्तास्तथैव ते ।
निर्णीतार्थास्तु विज्ञेया लोकात् तेषामसंग्रहः ।। (कात० दु० वृ० १/१/२३) ।

आचार्यहेमचन्द्रः स्वकीयशब्दानुशासनारम्भे सूत्रद्वयमुपस्थापयति — **"सिद्धिः स्याद्वादात्, लोकात्"** (१/१/२,३) इति । स्वापज्ञलघुवृत्तौ स एवं व्याचष्टे — **"अनुक्तानां संज्ञानां न्यायानां च लोकाद् वैयाकरणादेः**

सिद्धिर्ज्ञप्तिश्च वेदितव्या" इति । सारस्वतव्याकरणान्तेऽनुभूतिस्वरूपाचार्योऽसूत्रयत् — **"लोकाच्छेषस्य सिद्धिर्यथा मातरादेः"** इति । अर्थात् सारस्वतव्याकरणे ये प्रयोगा नैव साधिताः सन्ति, तेषां लोकाद् अन्यव्याकरणात् सिद्धिरवगन्व्या । अत एव पाणिन्यादिभिरनुक्तानामपि लोकप्रयुक्तानां कतिपयानां शब्दानां साधनाय शर्ववर्मभोजादिभिः शाब्दिकाचार्यैः सूत्राणि प्रणीतानि । एतत् सर्वम् आदाय अपाणिनीयप्रमाणतायां नारायणभट्ट एवं भाषते—

> **दृष्ट्वा शास्त्रगणान् प्रयोगसहितान् प्रायेण दाक्षीसुतः**
> **प्रोचे तस्य तु विच्युतानि कतिचित् कात्यायनः प्रोक्तवान् ।**
> **तदभ्रष्टान्यवदत् पतञ्जलिमुनिस्तेनाप्यनुक्तं क्वचि —**
> **ल्लोकात् प्राक्तनशास्त्रतोऽपि जगदुर्विज्ञाय भोजादयः ।।** इत्यादि ।

२. विवाक्षारूपा संस्कृतिः

विवक्षा च द्विविधा दृश्यते — प्रायोक्त्री विवक्षा, लौकिकी विवक्षा चेति । महाभाष्यकारेणोच्यते — यत्र प्रयोक्ता मृदव्या श्लक्ष्णया जिह्वया मृदूञ् शब्दान् प्रयुङ्क्ते सा भवति प्रयोक्त्री विवक्षा । यत्र प्रायस्य-लोकस्य (शिष्टस्य वृद्धस्याप्तस्य वा) सम्प्रत्ययः सा लोकिकी विवक्षाऽभिमता (म० भा० ५/१/१६) । लौकिकीयं विवक्षा कुलवधूरिवशिष्टाचारमर्यादां नैव कदाचिज्जहाति । इयं कारकाणां व्यवस्थायै कृत्-तद्धित-समासानां व्यवस्थायै चापि विशेषेण समाद्रियते । सरस्वतीकण्ठाभरणे दृश्यते सूत्रम् — **"विवक्षातः कारकाणि"** (१/२/६२) इति । अस्य हृदयहारिण्यां टीकायां नारायणदण्डनाथो वदति — **"प्रयोक्तुर्वक्तुम् इच्छया कर्मादीनि कारकाणि भवन्ति । विवक्षा च कुलवधूरिव न लोकिकीं प्रयोगमर्यादामतिक्रामति"** (सर० क० — हृ० हा० १/२/६२) ।

विवक्षावशात् क्रियमाणेन कारकव्यवहारेण विज्ञायते — कारकं न वस्तुतन्त्रं किञ्च लोकतन्त्रम् । यतो हि शक्तिः पदार्थेषु सर्वदैव वर्तते परं प्रयोगस्तु प्रयोक्तरिच्छावशादेवोपपद्यते । न च युगपदेकपदार्थोऽनेकशक्तिरूपो विवक्ष्यते । यथोक्तं भर्तृहरिणा वाक्यपदीये —

> **शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः ।**
> **सर्वदा सर्वथा भावात् क्वचित् किञ्चिद् विवक्ष्यते ।।** (वा०प० ३/७/२) इति ।

विवक्षायामर्थविधायिका बुद्धिर्हेतुत्वेन गृह्यते । अत एव धूमज्योतिःसलिलमरुतां संघातस्य मेघस्य विद्युता सहाभेदेऽपि **'बलाहकाद् विद्योतते विद्युत्, बलाहके विद्योतते विद्युत्, बलाहको विद्योतते विद्युत्'** इति प्रयोगत्रयी प्रवर्तते पृथग्भावत्वेन स्थतिरुपेणाभेदेन च विवक्षितत्वातद्य । बाल्मीकिरामायणे वचनमेकमस्ति — **'प्रदीयतां दाशरथाय मैथिली'** इति । तत्र त्यागजन्यस्वत्वफलभागित्वाभावात् सम्प्रदानं नोपपादयिंतु शक्यते, परं **'पूजापुरःसरं दानं सम्प्रदानम्'** इति विवक्षयाऽत्र समन्वयो विधीयते । 'पूजापुरःसरमेव मैथिली दीयताम्' इति प्रयोक्तुस्तात्पर्यम् । कारकत्वविवक्षातिरिक्ता लौकिकविवक्षा, भेदविवक्षा, अल्पविवक्षा, अवधिविवक्षा, योग्यताविवक्षा, बुद्धिविवक्षा चापि कातन्त्रे तत्र तत्र दृश्यते ।

३. आर्षप्रयोगरूपा संस्कृतिः

व्याकरणस्य स्मृतिरूपत्वाद् ऋषिप्रयुक्तस्य शब्दस्यासाधुत्वं नाकलनीयं, न च तद्विषये बलाल्लक्षणान्तरं प्रकल्प्य तस्यापशब्दत्वं संसाधयितुं कश्चिद् यत्न आस्थेयः इति महाभारतदीपिकाटीकाकार आचार्यो देवबोध एकेन वचनेन भावमिममित्थं प्रकाशयन् —

पदज्ञैर्नातिनिर्बन्धः कर्तव्यो मुनिभाषिते ।
अनुस्मरणतात्पर्या नाद्रियन्ते हि लक्षणम् ॥ (द्र० - व्या० द० इति, पृ० ४६६) इति ।

एतेनानेके शब्दाः, आर्षप्रयोग-ऋषिवचन-मुनिभाषित-छान्दसप्रयोग-इत्येतैर्निर्देशैः साधवो मन्यन्ते । संस्कृतिरियं समर्थ्यते कातन्त्रपरिशिष्टकारेण श्रीपतिदत्तेन 'सैव दाशरथी रामः' इत्यादौ पादपूरणे विलोपस्य प्रकृत्यभावस्य वा व्याख्यानावसरे — **"तन्त्रान्तरवृत्तिकारास्तु ऋचामेव पादेऽस्य वृत्तिं मन्यन्ते । आर्षप्रयोगास्तु यथाकथञ्चिद् विधेयाः, नित्यत्वेन संग्रहणीया इत्याहुः । तथा च एषस्यापि दृश्यते — 'एषैष रथमारुह्य मथुरां याति माधवः' । न्याय्यं चैतत् स्मृत्यन्तरे 'प्राक् छन्दसि' इति श्रुतेः । तदिहापि वाक्यमिदम् ऋषिप्रयोगेष्वेव स्मर्तव्यम्"** (कात० परि० वृ०, सन्धि० ४१) इति वचनं व्याचक्षाणेन ।

कातन्त्रव्याकरणस्य कानिचिद् वचनानि निदर्शनार्थमुद्ध्रियन्ते —

१. **भागवृत्तिकारस्तु बोभवीत्येव न छान्दसम् इति मन्यते** (कात०परि०वृ०, सन्धि० ३३) ।

२. **'निचकर्त शिरान् द्रौणिः' .... । ऋषिवचनादसो लोपो दृश्यते** (कात०टी० २/१/४) ।

३. 'अतिजरस्स्य, भिक्षुष्य' इति व्यञ्जनान्तादुकारान्ताच्च ङस् स्यः स्यादिति । **अत्राकारादेवस्यः स्यादित्युक्तत्वात् ? सत्यम् । ऋषिप्रयोगादिति चिन्त्यम्** (क०च० २/१/२२) ।

४. **'विश्वेदेवाः' इति तु छान्दसप्रयोगः** (कल० च० २/१/२५) ।

५. **ऋषिवचनात् — 'गते मृते प्रव्रजिते क्लीबे च पतिते पतौ'** (का०वृ०टी० २/१/६१) ।

६. **कथम् 'त्रीणामिव समुद्राणां युगान्तेऽम्बुसमागमः' इति, ऋषिवचनात्** (का०वृ०टी० २/१/७३) ।

७. **ऋषिवचनेषु तु संख्यादेरपि नान्ताया मो दृश्यते — 'प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति'** (का०वृ०टी० २/६/१६) ।

८. **"तहोः कुः" (२/६/३३) इति कुभावः । छन्दस्येवेत्यन्ये इति । सर्ववर्मणस्तु वचनाद् भाषायामप्यवसीयते (वि०प० २/६/३१) ।**

४. सर्ववेदपारिषदत्वाङ्गीकाररूपा संस्कृतिः

वेदानां या विविधाः शाखाः प्रतिष्ठिता आसंस्तत्रैकैकशाखाया अध्ययनार्थं चरणानि परिषदश्चापि स्थापिता आचार्यैः । कस्मिंश्चिदपि व्याकरणे एकस्याः कस्याश्चित् परिषदः परम्परा नैव प्रामाण्यरूपेण समादृताऽभूद् व्याकरणस्य सर्वपारिषदत्वात् । अत एव अर्धैकारार्धौकारविषये आक्षिप्य महाभाष्यकारः पतञ्जलिः—

"पारिषदकृतिरेषा[१] **तत्र भवताम्। नैव हि लोके नान्यस्मिन् वेदऽर्ध एकारोऽर्ध ओकारो वास्ति"**(म० भा०,आ० २, मा० सू० ३-४) इति समाधत्ते।

अस्याः संस्कृतेः समर्थकानि वचनानि कानिचित् पाणिनीयकातन्त्रव्याकरणाभ्यां संगृह्यन्ते —

१. **अवश्यं खल्वप्यस्माभिरिदं वक्तव्यम् — बहुलम्, अन्यतरस्याम्, उभयथा, एकेषाम् इति। सर्ववेद पारिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आस्थातुम्** (म० भा० २/१/५८; ६/३/१४)।

२. **(सिद्धशब्दोऽत्र नित्यार्थो निष्पन्नार्थः प्रसिद्धार्थो वा) । सर्ववेदपारिषदत्वाद् व्याकरणस्यार्थत्रयं घटते** (कात० वि० प० १/१/१)।

३. **व्याकरणस्य सर्वपारिषदत्वात् कुत्रचित् कश्चिदेव पक्ष आद्रियते इति न दोषः** (क०च० १/२/७)।

४. **'प्राप्यकारीणि इन्द्रियाणि'** इति **येषां दर्शनम्, तन्मते इन्द्रियं निर्गत्य विषयं परिच्छिनत्तीति स्फुटमवधिरस्त्येव। तर्हि निरिन्द्रियमधिष्ठानं प्राप्नोतीत्यपि पर्यनुयोगो नास्माकम्, तैरेव परिहृतत्वात्। केवलं सर्वपारिषदत्वाद् व्याकरणस्येदमुच्यते** (कात०वि०प० २/४/८)।

५. **एतेन व्याकरणस्य सर्वपारिषदत्वात् त्रिकपक्षोऽप्यादृत एव** (कात०क०च० २/४/१७)।

एवं सूत्रकारादिभिः सूत्र-वार्त्तिकादिरचनायां सिद्धान्तविशेषव्याख्याने च समादृतायाः संस्कृतेः कानिचिन्निदर्शनान्युपस्थाप्य साम्प्रतमुदाहरणादिभिरभिव्यक्ता संस्कृतिर्व्याख्यायते —

१. छात्राध्ययनसंस्कृतिः

आचार्य-प्रवक्तृ-श्रोत्रिया-ध्यापकसकाशादध्ययनपरायणाश्छात्रास्त्रिविधा दृश्यन्ते। तत्रैके एतादृशाश्चपलमतय आसन् ये गुरुकुले चिरकालं यावदुषित्वाध्ययनं नैव कुर्वन्ति स्म, ते **'तीर्थध्वाङ्क्ष-तीर्थकाक-तीर्थ-वायस'** शब्दैः समाजे क्षेपम् = निन्दामवाप्नुवन्। उक्तशब्दैः कथं क्षेपो गम्यते इति विशदयन् भाष्यकारो भाषते — **"यथा तीर्थे काका न चिरं स्थातारो भवन्ति, एवं यो गुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते-तीर्थकाक इति"**(म० भा० २/१/४२)। अविनयशीला एते छात्रा गुरुणाऽननुमताः सन्तो गृहं प्रत्यावृत्य गृहस्थाश्रमे प्रविश्य च खट्वारोहणं कुर्वन्ति स्म। तेषां निन्दाप्रवर्तनाय **'खट्वारूढो जाल्मः'** इति वचनं प्रसिद्धमासीत्। अत्र क्षेपस्य भाष्यकारीयं स्पष्टीकरणमेवं वर्तते — **"कः क्षेपो नाम? आधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वारोढव्या। य इदानीमतोऽन्यथा करोति स उच्यते खट्वारूढोऽयं जाल्मः"** (म० आ० २/१/३६) इति। अविनयशीलानामेतेषां विकृताचारो रथ-पदातिगमनेन आदेनभोजन—सक्तुपानेन च परिज्ञातुं शक्यते तद् यथा — **"स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति, स्वयं ह ओदनं भुङ्क्ते ३ उपाध्यायं सक्तून् पाययति"** (काशिका २/२/१८४) इति। अनवस्थितचेतसस्ते ओदन-कम्बल-घृतादिलोभेन विविधाचार्याणां शिष्यत्वमङ्गीकुर्वन्तो दृश्यन्ते ये महा-

१. (क) गीतिवशात् तथोच्चारणम् इत्यर्थः (प्रदीप०, प्रत्या० आ०, मा० सू० ३-४)।
(ख) शास्त्रविशेषाध्यायिनां समवायः परिषत् पर्षद् वा, तत्तद् भवा कृतिरित्यर्थः (म० भा० प्र० उ०, मा० सू० ३-४)।

भाष्ये — **'कम्बलचारायणीयाः, ओदनपाणिनीयाः, घृतरौढीयाः'** इत्युपाधिविशेषधारिणः (द्र०, म० भा० १/१/७३) उच्यन्ते ।

छात्रपदार्थव्याख्यानावसरे काशिकाकारादिभिरुक्तम् - **'गुरुदोषावरणं छत्रम्, तादृशं शीलमस्येति छात्रः'** (द्र०, काशिकावृत्तिः; सि० कौ० ४/४/६२) इति, एतेन गुरुगता दोषास्तेषामावरणं च छात्रैः करणीयमिति वचनाद् गुरुणां छात्राणां च पतनं सम्भाव्यते, परं कातन्त्रोणादिसूत्रमस्ति — **"वदेस्त्रश्छादेशश्च"** (६/४२) इति । एतेन यो वन्दते - अभिवादयते उपाध्यायं स उच्यते छात्रः । अर्थाद् उपाध्यायादिगुरुजनाभिवादनशीलत्वाच्छात्राणां प्रशंसा ध्वन्यते । न तत्र पतनादिसम्भावना काचिदस्तीति वक्तुं शक्यते ।

२. राज्यव्यवस्थायां जनपदीय शिल्पादिसंस्कृतिः

जनपदः कश्चिद् एकाधीनः राजाधीनोऽभवद् गणाधीनश्च कश्चित् । पाणिनीयं सूत्रं दृश्यते — **"श्रेण्यादयः कृतादिभिः"** (अ० २/१/५९) इति । तदुदाहरणानि भवन्ति - **'श्रेणिकृताः, एककृताः, पूगकृताः'** इत्यादीनि । एभिर्जनपदेषु प्रचलिता विविधा शासनपद्धतिः संसूच्यते । **'कुरुगार्हपतम्, वृजिगार्हपतम्'** प्रभृतिभिरुदाहरणैः कुरुवृज्यादिजनपदेषु प्रचलिता गृहपतिसंस्थाः परिज्ञायन्ते, यासु समाजोन्नयनाय कतिपये सांस्कृतिककार्यक्रमा अनुष्ठीयन्ते स्मेति वक्तुं शक्यते । बाहीकग्रामाः पाणिनिना निर्दिष्टाः **"वाहीकग्रामेभ्यश्च"** (अ० ४/२/११७) इत्येतस्मिन् सूत्रे । तदनुसारं प्राच्योदीच्यभागयोर्मध्ये भरतजनपद आसीत्, यत्र साम्प्रतं कुरुक्षेत्रं वर्तते । प्राच्योदीच्यप्रदेशयोः प्रचलिता भाषा शिष्टजनसम्माताऽवगम्यते । साधुत्वज्ञानाय यत्र क्वचिल्लोकाभिधानमुच्यते, तत्र लोकशब्देनायमेव प्रदेशः पाणिनेरभिप्रेत आसीत् । गान्धारवाहीकयोः कृते उदीच्यदेशव्यवहारः प्रवृत्तः, सिन्धुमारभ्य शतद्रुपर्यन्तं प्रसृतो भूभागो वाहीकाम्ना प्रसिद्धो बभूव । आचाराद् बहिर्भूतत्वात् ते देशा वाहीकपदभाजोऽभूवन्, यथा महाभारतस्य कर्णपर्वणि व्यासेनोक्तम् —

पञ्चानां सिन्धुषष्ठानामन्तरं ये समाश्रिताः ।
वाहीका नाम ते देशा न तत्र दिवसं वसेत् ॥ (मभार० कर्णप० ४४/७) इति ।

जनपदीयजीवने शिल्पानां विकासो दृश्यते । तदानीं शिल्पानि जनपदवृत्तेः साधनानि बभूवुरिति जानवदी भवति वृत्तिश्चेदिति (काशिका ४/१/४२) वचनेन विज्ञायते । शिल्पनैपुण्यं सामाजिकप्रतिष्ठायाः कारणमासीत् । जनपदीयशिल्पनैपुण्येन पुरुषः प्रशंसामर्हतीति निरुक्तकारेण यास्केनापि निगदितम् — **"यथा जानपदीषु विद्यातः पुरुषो वेदितृषु च भूयोविद्यः प्रशस्यो भवति"** (निरुक्तम् १/५) । एवं संन्यासिनां भिक्षु - कौक्कुटिकभिक्षु - मस्करि - श्रमण - अर्हत् - यायावर - प्रभृतयो भेदास्तदासन् । 'चान्द्रायणिक - जंजप्यते - स्थाण्डिल - वाचंयम - कुबेरबलि - पित्र्यहविष्-श्राद्ध' प्रभृतिशब्दानां प्रयोगेण धार्मिकविश्वासरूपा संस्कृतिर्विज्ञातुं शक्यते ।

समाजे केषाञ्चिद् विदुषामीदृश्यपि प्रवृत्तिः परिलक्षितुं शक्यते, यया प्रेरिता सन्तस्ते सूत्रम्, सूत्रैकदेशम्, (स्वर-व्यञ्जन-ह्रस्व-दीर्घ-नदी-घु-सर्वनामस्थान) संज्ञां वाऽभिलक्ष्य प्रश्नोत्तररूपां स्वानुभवजन्यार्थप्रकाशरूपां च विचित्रामेव संस्कृतिं परिभाषितवन्तः । यथा **'स्वयं राजते स्वरः, अन्वग् भवति व्यञ्जनम्'** इति स्वरव्यञ्जनार्थमादाय तद्वदाचारपरायणान् पुरुषानभिलक्ष्योच्यते —

एकाकिनोऽपि राजन्ते सत्त्वसाराः स्वरा इव।
व्यञ्जनानीव निःसत्त्वाः परेषामनुयायिनः ॥ (द्र०, टे० ट० टे०, पृ० १८६) इति।

"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (अ० १/२/४५) इति पाणिनीये सूत्रे ये हि चत्वारः शब्दाः सन्ति ते विद्वद्भिश्चतुर्णां प्रश्नानामुत्तराणि मन्यन्ते। यथोक्तम् —

विद्वान् कीदृग् वचो ब्रूते ? को रोगी ? कश्च नास्तिकः ?
कीदृक्चन्द्रं न पश्यन्ति तत् सूत्रं पाणिनेर्वद ॥

अत्र प्रथमप्रश्नस्योत्तरमस्ति 'अर्थवत्' इति। एवमन्येषामपि त्रमाणमुत्तराणि क्रमेणावगन्तव्यानि।

"शे षे से वा वा पररूपम्" (१/५/६) इति कातन्त्र्यसूत्रमधिकृत्य तथैव प्रश्नाः कृताः।

येषामुत्तराण्यस्मिन् सूत्रे सन्निहितानि सन्ति। तद् यथा —

क्व हरिः शेते ? का च निकृष्टा ? को बहुलार्थः ? किं रमणीयम् ?
वद कातन्त्रे कीदृक् सूत्रं शेषे सेवा वा पररूपम् ॥ (बङ्गभाष्य) इति।

कातन्त्रे ह्रस्व-दीर्घसंज्ञाविधायकं सूत्रद्वयमस्ति **"पूर्वो ह्रस्वः, परो दीर्घः"**(१/१५,६) इति, अत्र सतामसतां च स्नेहावस्था प्रकल्प्यते भिन्नरूपा विद्वद्भिर्व्याख्याकारैः —

पूर्वो ह्रस्वः परो दीर्घः सतां स्नेहो निरन्तरम्।
असतां विपरीतस्तु पूर्वो दीर्घः परो लघुः ॥ (द्र०, टे०ट०टे०, भा० १, पः० १९२)।

भोजप्रबन्धे ब्रह्मराक्षस — तान्त्रिकसंवादे पाणिनीयं सूत्रचतुष्टयं समुद्दृश्यते — **"एको गोत्रे, सर्वस्य द्वे, स्त्री पुंवच्च, वृद्धो यूना तल्लक्षणश्चेदेव विशेषः"** (अ० ४/१/९३; ८/१/१;१/२/६६;१/२/६५) इति। एतेषामुत्तरवचने तान्त्रिकस्य लोकव्यवहारानुगतः स्वानुभवविशेषः कश्चित् परिलक्ष्यते। यथा गोत्रे एक एव कश्चिदेतादृशः प्रभावशीलः पुरुषः समुत्पद्यते, यमाश्रित्यान्ये प्रतिष्ठां प्राप्नुवन्ति —

(i) "एको गोत्रे प्रभवति पुमान् यः कुटुम्बं विभर्ति"।

सुमतिः संपदे, कुमतिश्च विपदे प्रभवतीति भावः **"सर्वस्य द्वे"** इति सूत्रस्य प्रकाश्यते—

(ii) "सर्वस्य द्वे सुमतिकुमती सम्पदापत्तिहेतू।" स्त्रिया पुंवत्, पुरुषेण च स्त्रीवदाचरणं नैव कथमपि श्रेयसे संकल्पते इति भावोऽभिव्यज्यते **"स्त्री पुंवच्च"** इति सूत्रे—

(iii) "स्त्री पुंवच्च प्रभवति यदा तद्धि गेहं विनष्टम्"। कामिन्याः कस्याश्चिद् वृद्धेन युवजनेन च सह कीदृशो व्यवहारः प्रवर्तते इति प्रदर्श्यतेऽन्तिमेन सूत्रेण —

(iv) "वृद्धो यूना सह परिचयात् त्यज्यते कामिनीभिः"।

पाणिनिना ईकारान्तानां स्त्रीत्ववाचकानां शब्दानां नदीसंज्ञा विधीयते — **"यू स्त्र्याख्यौ नदी"** (अ० १/४/३) इति तदनुसारं यमुनायाः गङ्गायाश्च नदीत्वं नैव संभवति, स्थल्याश्च नदीत्वं संभवति इति वैषम्यव्यवहार एवमाक्षिप्यते —

पाणिनेर्न नदी गङ्गा यमुना वा नदी स्थली।
प्रभुः स्वातन्त्र्यमापन्ने यदिच्छति करोति तत् ॥

स्त्रीशब्दस्य नदीसंज्ञकत्वात् कथं तयोः साम्यं स्वीकर्तुं शक्यते द्रष्टव्यम्—

स्त्री नदी तदिदं सत्यं रसेनाकुलिता सती।
यतो ध्वंसं विधत्ते सा कूलवत् कुलयोरपि ॥

जामातृसम्पत्तिमचिन्तयित्वा पित्रा तु दत्ता स्वमनोऽभिलाषात्।
कुलद्वयं हन्ति मदेन नारी कूलद्वयं क्षुब्धजला नदीव ॥

अपि च —

नद्यश्च नार्यश्च सदृक्प्रभावास्तुल्यानि कूलानि कुलानि तासाम्।
तोयैश्च दोषैश्च निपातयन्ति सद्यो हि कूलानि कुलानि नार्यः ॥

घुसंज्ञा प्रभावः नैषधीयचरितकारकल्पनया कपोतध्वनौ परिलक्ष्यते (द्र०, नै०च०)। एवं **"पक्षिमत्स्यमृगान् हन्ति, परिपन्थं च तिष्ठति"** (अ० ४/४/३५,३६) इत्यादि सूत्रार्थकल्पनापि द्रष्टव्या।

केरलीयज्यौतिषस्य वैशिष्ट्यम्

श्री पी.वी. गोपकुमारः

लोके प्रायशः ज्यौतिषस्य स्वरूपं सर्वेषु देशषु साधारणं दृश्यते । तथापि केचन कालदेशकृताः भेदाः वर्तन्त एव । तत्र केरलदेशस्य वैशिष्ट्यं महत्वं च आबहो कालात् श्रद्धावतां सुपरिचितम् । ज्यौतिश्शास्त्रान्तर्गतेषु षडङ्गेषु प्रश्नपद्धति नाम यद् अङ्गं तन्निष्टमिदं वैशिष्ट्यम् । ज्यौतिषे प्रश्नपद्धत्या उपयोगः फलप्रवचने गुलिकस्य योजनं इत्येतद् द्वयं केरलज्यौतिषस्य वैभवावहं इति तु निश्चप्रचम् । वराहहोरायाः दशाध्यायी[१] नामिका व्याख्या ख्रिस्तोः परं द्वादशाब्दे उत्पन्ना । एषा व्याख्या केरलप्रश्नपद्धत्याः मूलस्रोतः भवति ।

वराहहोरायाः दशानां अध्यायानां व्याख्या एव तस्मिन् ग्रन्थे कृता । उत्तरकेरलेषु नलक्कलत्तुरदेशे जातः गोविन्दभट्टपादः अस्याः व्याख्यायाः कर्ता भवति । वराहहोरायाः स्वतन्त्रं वृहतसारगर्भं च व्याख्यानं इदं इति विद्वद्भिः परिगणितम् । होराग्रन्थेषु विद्यमानाः फलभागाः संहिताग्रन्थेषु विद्यमानानि निमित्तानि च प्रश्नपद्धतौ कथं उपयोक्तव्यानि इति अधिकारिकरूपेण निरूपितमस्मिन् व्याख्याने । मुहूर्तरत्नं, गोविन्दपद्धतिः इति पुस्तकद्वयम् अपि गोविन्दाचार्येण लिखितमस्ति ।

दशाध्यायी ग्रन्थरचनानन्तरकाले ये बहवः ग्रन्थाः निर्मिताः । ते सर्वेऽपि प्रायशः तदनुसरणात्मका एव भवन्ति । तत्र प्रथमं तावत् 'प्रश्नानुष्ठानपद्धतिः' नायं ग्रन्थः भवति । अयं ग्रन्थः ख्रिस्तोः परं पञ्चदशाब्दे निर्मितः भवेदिति विदुषां मतम् । अज्ञातकर्तृकं एनम् पुस्तकम् । प्रश्नपद्धतिः सविस्तरं प्रतिपादिता अस्मिन् ग्रन्थे । प्रश्नसंग्रहः, प्रश्नरत्नं, सन्तानदीपिका, प्रश्नमार्गः एते ग्रन्थाः दशाध्यायीं अनुसृत्य निर्मिताः प्रश्नोपयोगिनः ग्रन्थाः भवन्ति । दशाध्याय्याः माहात्म्यं प्रश्नमार्गकर्त्ता एवं कथयति ।

यथा—

"होरां वराहमिहिरस्य विनिर्गतां ये
मालामिवादधाति दैवविदः स्वकण्ठे
होरायास्तु दशाध्याय्यां व्याख्यायां क्रियतां श्रमः"
दैवज्ञेन विशेषेण फलमादेष्टुमिच्छता

१. दशाध्यायी—नलक्कलत्तूर गोविन्दभट्टपादः

एकैकोऽपि दैवज्ञः वराहहोरां इमां स्वकण्ठे पुष्पमालां इव धरेत् इत्यभिप्रैति । विशिष्य फलादेशावगमाय दैवज्ञः दशाध्यायीं व्याख्यां सम्यक् विजानीयात् । प्रत्येकस्मिन् श्लोके विद्यमानाः आशयाः किं प्रश्नपद्धतौ अपि उपयुज्यते इति विस्तरेण प्रतिपादयति । यथा—

"बुधसूर्यसुतौ नपुंसकाख्यौ
शशिशुक्रौ युवती नरास्तुशेषाः
शिखिमुखपथोमरुद्गणानां
वशिनो भूमिसुतादय क्रमेण"

श्लोकेऽस्मिन् ग्रहाणां लिङ्गचिन्तनं पञ्चभूतानां आधिपत्यनिरूपणं च दृश्यते । गोविन्दभट्टपादः प्रश्नविधौ पञ्चभूताधिपत्यस्य उपयोगः कथं कार्यं इति प्रतिपादयति । अनेन पञ्चभूतकथनेन एव ग्रहाणां राशीनां च सजलविजलात्मकत्वम् अवगन्तव्यम् । सजलविजलभेदज्ञानं विना स्थलप्रश्ने जलप्रश्ने च बहूपकाराय भवति । ग्रहाः दुःस्थाश्चेत् तत् तत् ग्रहसंबन्धिः भूतकोपेन विविधाः रोगाः प्रादुर्भवन्ति इति च उपयुक्तांशाः श्लोकव्याख्यायां स्पष्टीकृताः । प्रायशः प्रत्येकस्याऽपि श्लोकस्य अर्थद्वयं गोविन्दाचार्येण लिखितमस्ति ।

जन्मकुण्डलिम् आश्रित्य यथा फलप्रवचनं प्रवर्तते तथैव प्रश्नपद्धत्याः फलप्रवचनं भवति । अत्र अयं संशयः को वा विशेषः प्रश्नपद्धतौ इति चेत् । अत्र आचार्यवचनमिदम्—

"कस्य पंक्तिरिति ज्ञानुमिदानीं पूर्वकर्मणाम्
इहार्जितञ्च विज्ञातुं कर्म प्रश्नो विधीयते ॥"

पूर्वजन्मार्जितकर्मसु यत् फलम् इदानीं अनुभूयते इति विज्ञातुं इहजन्मार्जितपुण्यपापानां च ज्ञानार्थं प्रश्नपद्धति उपयुज्यते । जन्मकुण्डलिम् आश्रित्य प्रोक्तं फलं तथा वस्तुतः अनुभूयमानं सुखदुःखादिकं चेत्यनयोः क्वचित् विसंवादः स्यात् चेद् अयं विसंवादः कथमपि समाधातव्यः भवति । अस्मिन् कर्मणि प्रश्नपद्धत्याः महद् योगदानं सुविमृशद्भिः अवगम्यते ।

लौकिकं दैविकं चेति प्रश्नपद्धतिः द्विधा विभक्ता । लौकिकप्रश्नपद्धत्यां जन्मकुण्डलिमनुसृत्य फलप्रवचनं भवति । जातकनिमित्तगोचरान् विभागान् अपि दैवज्ञः फलप्रवचनं करोति । दैविकप्रश्नपद्धतौ तु षड् लग्नाद् आधारीकृत्य फलप्रवचनं भवति । स्वर्णारुदः, स्वर्णारुदांशकः, उदयारुदः, छातारुदः, नांबुलारुदः, चन्द्रस्थितराशिः चेति षड् लग्नाः । लौकिकप्रश्नपद्धत्यापेक्ष्या कुलंकषत्वं समग्रता, ज्ञानत्यांशबहुलत्वं च वर्तन्ते इति अस्याः दैविकप्रश्नपद्धत्याः वैशिष्ट्यम् ।

गुलको नाम कश्चन बलिष्ठः पापः केरलीयज्यौतिरशास्त्रे अङ्गीकृतः । अयं मन्दस्य अपत्यं भवति अतः मान्दिः इति च संज्ञा । गुलिकस्य उदयद्वयं वर्तते । दिवा रात्रौ च । केरलीयाः जातकेऽपि गुलिकं योजयन्ति । गुलिकयोगेन ग्रहाणां राशीनां च शुममणि फलम् अशुभप्रदं परिणमते । 'जैमिनिसूत्रं' इति ग्रन्थे प्रथमाध्याये द्वितीयपादे गुलिकः सूचितः वर्तते । अस्य ग्रन्थस्य व्याख्यायां श्रीलक्षणलालझामहोदयेन गुलिकस्वरूपं, उदयश्च विवृतमस्ति । गुलिकयोगः केवलं केरलीयैरेव आधिक्येन क्रियते ।

सूर्यादीनां क्रमेण हृदयं, शिरः, वक्षः, ऊरुः, मुखं जानुनी इत्यादिषु, शरीरायवेषु प्रभावः भवति । ग्रहाणां अनिष्टत्वे दुर्बलत्वे च उक्तावयवेषु पीडा भवति । अष्टमभावः अष्टमस्य अष्टमाधिपः अष्टमं यः पश्यति एतेषां ग्रहाणां बलाबलानुसारेण शारीरिकरोगाणां अवस्थाः संसूच्यन्ते । अष्टमाधिपपञ्चमाधिपयोः योगदृष्टि अन्योन्यकेन्द्रस्थितिं च आधारीकृत्य मनोरोगाः वक्ष्यन्ते । आगन्तुकरोगेषु दृष्टमदृष्टं इति भेदद्वयम् । षष्ठभावः षष्ठेशः षष्ठस्थः षष्ठभावं यः पश्यति, षष्ठेशं यः पश्यति, एतेषां सर्वेषां ग्रहाणां बलाबलानुसारेण आगन्तुकरोगाः विचिन्त्यन्ते । अदृष्टो नाम भूतप्रेतादिबाधया उत्पन्नो व्याधिः ।

पूर्वजन्मकृतपापफलं इहजन्मनि व्याधिरूपेण अनुभूयते । पापशान्तिं विना रोगशान्तिः न कदापि भवति । औषधसेवनेन साकं विधिवत् दानं पूजा जपः हवनं इत्यादिपुण्यकर्माणि करणीयानि भवन्ति । साष्टसहस्रम् ।

मृत्युञ्जयहवनं सर्वरोगाणां शान्त्यर्थं विशिष्टं साधनं भवति ।

केरलीयज्यौतिषे एवंरूपाः बहुविधाः विशिष्टांशाः परिदृश्यन्ते । परमत्र विस्तरभयेन न तेषां सर्वेषां समग्रोल्लेखनं कृतम् । प्रश्नपद्धत्याः आरम्भदशायां ये अंशाः साधनानि च उपयुक्ताः तेषां उल्लेखनं विवरणं च दशाध्यायीं अनुसृत्य इह किञ्चित् प्रस्तुतम् ।

सन्दर्भग्रन्थाः—

१. प्रश्नानुष्ठानपद्धतिः - अज्ञातकर्तृकम्

२. वराहहोरा - रामवार्यर्

३. गुलिकः - Prof. N.E. Muthuswamy.

४. Mandi Alias Gralika - Dr. Damadhara Menon.

५. जैमिनिसूत्रम् - श्रीलषणलालझा

६. देवप्रश्नं - ओणक्कुरशङ्करगणकः

७. प्रश्नमार्गः - पटक्काट्टः

ग्रहशान्त्युपायाः

डॉ. रामचन्द्रझा

गृह्णाति जन्तून् साध्वसाधु वा प्रवर्तयतीति ग्रहः सूर्यादिः । ग्रहधातोः 'विभाषाग्रहः'[१] इति सूत्रेण विकल्पेन णप्रत्यये तु ग्राहो जलचरे प्रयुज्यते । अत एव व्यवस्थितविभाषेयम् । तेन जलचरे ग्राह एव, ज्योतिषि (ग्रहे) ग्रह एव ।

'ग्रहवृदृनिश्चिगमश्च'[२] इति सूत्रेण अप् प्रत्ययेऽपि ग्रहशब्दः सिद्ध्यति । उभयोः स्वरे अर्थे च भेदः । घञ् प्रत्ययापवादः अप् भावे भवति । अच् तु कर्त्तरि । भावे कचग्रहः, शक्तिग्रहः शक्तिज्ञानम् । कर्त्तरि ग्रहः सूर्यः ।

शम् उपशमे इति धातोः क्तिन् प्रत्यये भावार्थे शान्तिरितिसिद्ध्यति । तदर्थस्तु प्रशमनम्, विश्रामः, विनाशश्च भवतीति ।

स्थानदृष्टियोगभावेशादिवशेन ग्रहाणां शुभाशुभफलदातृत्वं निश्चीयते । तत्र शुभफलदाः ग्रहाः शरीरधनविद्याभाग्यस्त्रीपुत्रभूमिभवनवाहनराजसुखानि प्रयच्छन्ति । अशुभफलदास्ते एव तानि सर्वाणि हरन्तीति ग्रहवैगुण्यसंसूचिताशेषारिष्टझटितिप्रशमनपूर्वकं दीर्घायुष्यबलपुष्टिनैरुज्यधनधान्यसुखसमृद्धिसौभाग्यसन्ततिलाभाद्यखिलकल्याणकामनया ग्रहशान्तिर्विधेयेत्याचार्याणामादेशः । तस्मादिहाचार्योक्तिग्रहशान्त्युपायाः प्रस्तूयन्ते —

वृहत्पाराशरहोराशास्त्रे पञ्चाशीत्यध्यायमारभ्य सप्तनवत्यध्यायपर्यन्तं शान्तिविधानं प्राप्यते । तत्र दोषकृद्ग्रहाणां प्रतिमां यथाशास्त्रवर्णितविधिना निर्माय तत्तद् ग्रहोक्तवस्त्रान्नपुष्पचन्दनादिभिः सपूज्य तत्तद् ग्रहोक्तमन्त्रकाष्ठादिभिः होमं कृत्वा यथाशास्त्रं दक्षिणां दद्यात् । एवं सति कल्याणं सम्पद्यते । तथाहि मैत्रेय उवाच—

दोषशान्त्यै न भोगानामर्चनाविधिपूर्वकम् ।
जपहोमादिकं ब्रह्मन् कृपया वक्तुमर्हसि ॥

पराशर उवाच —

भास्कराद्याः खगाः पूर्वं ये मया नव वर्णिताः ।
प्रभावितं जगदिहं समस्तमपि तैः सदा ॥

---

१. अष्टाध्यायी ३/१/१४३

२. अष्टाध्यायी ३/३/५८

तदधीनं प्राणिनां तु सुखदुःखमतो जनः ।
तच्छान्तिधनवृष्ट्यायुःकामस्तद्यज्ञमाचरेत् ॥

नवग्रहाकृतीस्ताम्रस्फटिकारुणचन्दनैः ।
स्वर्णस्वर्णराजतायः शीशकाँस्यैः क्रमाद् बुधः ॥

रचयेद् ग्रहवर्णैर्वा पट्टवस्त्रेऽथ विन्यसेत् ।
तद् तद् ग्रहोक्तासु दिक्षु मन्त्रोच्चारणपूर्वकम् ॥

तत्र सूर्यस्य स्वरूपं ध्यानञ्च —

पद्मासनः पद्मकरः पद्मवर्णसमप्रभः ।
सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥

चन्द्रस्य स्वरूपध्याने —

दशाश्वरथवाञ् शुभ्रः शुभ्रवासा गदाधरः ।
शुभ्रभूषावृतश्चन्द्रो द्विभुजश्च प्रकीर्त्तितः ॥

एवमेव कुजादीनांस्वरूपध्याने—

लोहितस्त्रग्रक्तवासाः शूलशक्तिकरः कुजः ।
चतुर्भुजोऽपि सगदोवरदोऽज सुवाहनः ॥

पीतस्त्रगम्बरश्चान्द्रिस्तालपत्रसमप्रभः ।
सिंहारुढो गदावर्मासिंहस्तो वरदो मतः ॥

सितार्यौ सितपीताभौ साक्षसूत्रौ सदण्डकौ ।
कमण्डलुशयो चापि वरदौ विबुधौ स्मृतौ ॥

नीलकान्तिर्गृध्रयानः शरचापधरोऽर्कजः ।
वरप्रदश्चतुर्बाहुः शूलभृद् गदितो बुधैः ॥

भयावहमुखो वर्म-त्रिशूलासिधरोऽशुभः ।
सिंहारुढः सुनीलाभः स्वर्भानुवरदो मतः ॥

सगदा विवृतास्याश्च द्विभुजा धूम्रवर्णिनः ।
केतवो वरदा गृध्रवाहनाः स्युर्विदां मताः ॥

ग्रहमूर्त्तिस्त्वष्टोत्तरशताङ्गुलमितोन्नता सकिरीटा वस्त्रावृता ताम्रादिधातुघटिता कर्त्तव्या। तत्राङ्गुलमानं यजमानस्यावगन्तव्यम् ।

ग्रहाणां जपसङ्ख्या क्रमेण सहस्रगुणिता ऋषि-रुद्र-दिक्-सप्त-नवेन्दु-षोडश-गुणनयन-धृति-सप्तदश-मिता पराशरेणा उक्ता ।

ग्रहाणां समिधस्तु अर्कपलाश-खदिर-अपामार्ग-पिप्पल-औदुम्बर-शमी-दूर्वाकूशाश्च कथिताः सन्ति । तत्र घृतेन मधुना दध्ना दुग्धेन वाऽभिधार्य समिधेन जुहुयात् । मन्त्रास्तु आकृष्णेन राजसेत्यादयः वैदिकाः, जपाकुसुमसंकाशं काश्येपयमित्यादयः पौराणिकाः, घृणिः सूर्य आदित्य प्रभृतयः तान्त्रिका वा भवितुमर्हन्ति ।

तत्र 'कलौ सङ्ख्या चतुर्मुथा' इत्यादिवचनैः कथितजपसंख्या चतुर्गुणा कर्त्तव्या । जपान्ते दशांशक्रमेण होमतर्पणमार्जनब्राह्मणभोजनादिकं कर्त्तव्यम् । तत्र भोजने ग्रहक्रमेण सगुडमोदनं, पायसं, हविष्यानां, षाष्टिकक्षैरेय-कम्, सभक्तदधि, सभक्तमाज्यं, सतिलचूर्णमोदनं, सामिषं चित्रान्नं प्रसिद्धम् । दक्षिणातु क्रमेण धेनु-शङ्ख-वृष-स्वर्ण वस्त्रघोटकसितधेनुलौहच्छागाः अवगन्तव्याः । एव कृते सति ग्रहाः सुप्रसन्नाः भवन्ति । तथा सति मनुजाः सुखिनोऽभ्युन्नताश्च स्युः । प्रतिकूले ग्रहे तु नरा दुःखभाजो भवन्त्यतस्तान् पूजयेत् । इयं शान्तिस्तु वृहत्पराशर-होराशास्त्रे साधुप्रतिपादितमन्यत्रापि ग्रहशान्तिः अवलोक्यते ।

अथामावस्यायां जननं पित्रोर्द्रारिद्र्यप्रदं भवतीति तद्देवताद्वयं सूर्यं चन्द्रं च क्रमेण ताम्र-राजतघटितं मूर्तिं निर्माय घटं संस्थाप्य यथोपचारैः संपूज्य रविचन्द्रमन्त्राभ्यामष्टोत्तरं हुत्वा स्वर्ण-रजत-धेनूश्च दक्षिणात्वेन दापयेत् । एवं सति क्षेमं सम्पद्यते । एवमेव कृष्णचतुर्दशीभद्राव्यतीपातयमघण्टादिदुर्योगे जातस्यापि हानिर्जायते । ततस्तत्र शान्तिर्विधेया । तत्र स्वर्णमयशिवमूर्त्तपूजनेन घटस्थापननवग्रहपूजनपूर्वकेन त्र्यम्बकमन्त्रनवग्रहमन्त्र-होमेन, रुद्रसूक्तादि पाठपूर्वकेन शिवं सम्पद्यते ।

एवमेव पित्रर्क्षजनन-संक्रान्तिजनन-ग्रहणजननशान्तिरपि कर्त्तव्येति पराशरेणोक्ता । तत्र यस्मिनृक्षे, तिथौ वा जन्म तदृक्षे तिथौ वा तच्छान्तिर्विधेया । ज्योतिषोक्तमुहूर्ते वा सा शान्तिः कर्त्तव्या ।

अथ मुहूर्त्तचिन्तामणौ पीयूषधाराटीकान्वितायां रोगकृन्नक्षत्रदेवतामूर्त्ति स्वर्णमयीं निर्माय यथाविधि-पूजनेनैब तद्दानेन रोगशान्तिर्निरूपिता ।

'अभुक्तमूलं घटिकाचतुष्टयम्', 'अथोचुरन्ये प्रथमाष्टघट्य', 'अश्विनीमघामूलादौ त्रिवेदनवनाडिकाः । रेवतीसर्पशक्रान्तेमासरुद्रारसाः क्रमादित्यादिवाक्येन गण्डान्तोत्पन्नजातकस्य शान्तिविधिरपि तत्तन्नक्षत्रेषु निरू-पिता । एवमेव त्रिपुष्करद्विपुष्करयोगयोः सोदरभजातस्य पितृभजातस्य, त्रीतर-समुत्पन्नस्य तिथिलग्नगण्डान्तयो-रन्येषु दुष्टयोगेषु वा जातस्य शान्तिरुक्ता ज्यौतिषे ।'

गोचरवशेनापि ग्रहस्याशुभफलदे सति शान्तिव्यवस्थोक्ता वशिष्ठेन-ग्रहेषु विषमस्थेषु यः शान्तिं न करोति सः अर्थहानिं मरणं चाश्नुते सर्वसङ्कटम् इति । इयं शान्तिस्तु वशिष्ठसंहितायां मत्स्यपुराणे च विस्तरेण प्रतिपादिता ।

अथ 'जन्मेत्थञ्च विलोक्य बालविधवायोग' मित्यादिना वैधव्ययोगपरिहारार्थं विष्णुमूर्त्तिपिप्पलघटैर्वि-वाहं कारयित्वा पश्चात्तस्याः पाणिग्रहणं वरायायुष्मते सह कारयेदधिकारी । तत्र न पुनर्विवाहदोषः इति शान्ति-रुक्ता ।

एवमेव यस्य ग्रहस्य यद्रत्नं यद्वस्त्रं याश्चौषधीः, यच्चान्नादिकं शास्त्रे निरूपितं तत्तद्रत्नवस्त्रान्नौषधिमूलादीनां दानधारणयथायोग्यव्यवहारादिना तत्तद्ग्रहशान्तिः सम्पद्यते । व्रतबन्धे गुरुशान्तिः विवाहे गुरुचन्द्रसूर्यशान्तिः सर्वेषु कार्येषु ताराशान्तिः चन्द्रशान्तिश्चनिरूपिता शास्त्रे विस्तरेण ।

हरिवंशश्रवणेन, शिवोपासनेन, दुर्गार्चनेन कन्यादानेन, पितृश्राद्धेन वा सन्तानलाभः इति पराशरेण स्फुटमुक्ता अथ संहिताशास्त्रानुसारमुत्पातास्त्रिविधा दिव्यान्तरिक्षभौमभेदात् निरूपिताः । तत्र स्वर्भानु-केतु नक्षत्रग्रहाद्युत्पातः दिव्यः, अन्तरिक्षे भवः वाप्वभ्रसन्ध्यापरिवेषादयः आन्तरिक्षः, भुविभवः भूकम्प-जलविकृतिचरस्थिरप्राणिसंबद्धभौम उच्यते । तत्र भौमः अल्पफलप्रदः, आन्तरिक्षः मध्यफलदः तीव्रफलदश्च दिव्य इति निरूपिता आचार्यः । तत्रोत्पातजन्माशुभफलनाशाय लोकस्य शुभाय च शान्तिव्यवस्था संप्रोक्ता ।

'तथा त्रिविधमुत्पातमाहात्म्यं शमयेन्मम', 'शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृण्ड्यान्मम,' 'उपसर्गः शमं याति ग्रहपीडाश्च दारुणा' इत्यादि मार्कण्डेयपुराणवचनेभ्यः सप्तशती पाठेनोत्पातशान्तिर्भवति । गोदानान्नस्वर्णदानरुद्रजपसावित्रीलक्षहोमकोटिहोमादिशान्तिवशेन शुभं सम्पद्यते ।

एवमेव सर्वत्र शास्त्रेषु निर्दिष्टं यद्धर्मग्रन्थानां पुराणादीनां पाठेन सकलाभीष्टसिद्धिर्जायते । अतो ग्रहशान्त्यर्थं तदनुष्ठानं नूनमेव शान्तिप्रदम् ।

पराशरेणापि सूर्यशान्त्यर्थं मृत्युञ्जयजपविधानं, चन्द्रशान्त्यर्थं श्वेतगोमहिषीदानं, कुजशान्त्यर्थं वेदपाठवृषभदानम्, राह्वर्थं दुर्गापाठमहिषीछागकृष्णगोदानम्, गुरुशान्त्यर्थं स्वर्णकपिलगोदानम्, शनिशमनार्थं मृत्युञ्जयजप-छागदान-महिषीदानविधानं, बुधशान्त्यर्थं विष्णुसहस्रनामपाठान्नरजतप्रतिमादानम्, केतुशान्त्यर्थं दुर्गापाठछागदानम्, शुक्रशान्त्यर्थं मृत्युञ्जयजपश्वेतगोमहिषीदानं च निर्दिष्टम् ।

संक्षेपतः शास्त्रेषु शान्तिविधानं परमविस्तृतं विद्यते । प्रायश्चित्तादिकमुपवासदानादिकञ्च स्मृतावपि बहु प्रतिपादितम् । शान्त्या शिवं सम्पद्यते । अतएव ज्यौतिषस्य शान्तिविधानं महत्त्वपूर्णं सर्वथा वाञ्छितप्रदञ्च विद्यते ।

आयुर्दायचिन्तनम्

डॉ. भास्करशर्मा 'श्रोत्रियः'

दरीदृश्यमाणमिदं स्थूलसूक्ष्मजगत्सर्वं अनन्तकोटिब्रह्माण्डनायकस्य श्रीसर्वेश्वरस्य परात्परब्रह्मणः अनन्तानन्तनामधेयस्य भगवतः सृष्टिस्थितिलयात्मकः गभीराश्चर्यं विदधाति ।

'अद्भ्यः संवृतः पृथिव्यैरसाच्चव्विश्वकर्मणः समवर्त्तताग्रे ।[१] विश्वात्मनः विश्वस्मिन्विश्वे व्यापकत्वात् चराचरसृष्टेरुत्पत्तिस्थितिलयक्रमः सनातनरूपेण सततं संसरत्येव । न केवलं प्राणिनः एव अपितु इन्द्राद्याः सकला-देवाः अपि क्षीणे पुण्ये मर्त्यलोकं विशन्ति, तदनन्तरं 'धाता यथापूर्वमकल्पयदिति' सिद्धान्तमनुसृत्य जीवः अत्युग्रपुण्यपापानां इहैव फलमश्नुते । विचित्रोऽयं क्रमः पुराणेष्वपि बहुत्र निर्दिष्टः वर्तते । प्राणिनां जननमरणादिकं यथा भवति तथैव स्थावर-जंगमानामपि विलक्षणगतिक्रमः भागवतादिषु पठ्यतेऽस्माभिः । अत्र च जडचेतनानां उत्पत्तिविनाशादिकं तेषां कर्मानुसारी एव भवति । कर्मणां फलप्रदानमपि भगवद्गीतामतेन भगवदधीनमेव । 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' अतः पुनरपि जननं पुनरपि मरणं' कर्मविपाकानुसारी सुखदुःखोपभोगादिकं सुनियतमास्ते । भगवतः विचित्रमायाक्रमास्यास्य भूतभविष्यद् वर्तमानादिकमखिलं मन्त्रदृष्टा ऋषिप्रवरैः पूर्वमेव वैदिकवाङ्मये सुनिबद्धम् 'षडंगो वेदोऽध्येयः', अतः शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दज्योतिषविषयाणां सम्यगध्ययनेनैव वेदानां सम्यग्ज्ञानं भवितुमर्हति नान्यथा । एष्वपि प्रमुखो वेदांगः ज्योतिर्विषयः विश्वदर्शकः, कालदर्शकः, गतिदर्शकः, क्रियादर्शकः, परिणामप्रदर्शकश्च विद्यते ।

सर्वाधिकमहत्वपूर्णमिदं ज्योतिषशास्त्रं ऋषिप्रवरैः शास्त्राचार्यैः त्रिषु विभागेषु सुविभक्तम् । 'त्रिस्कन्धं ज्यौतिषं शास्त्रं' अत्र प्रथमे गणितप्रक्रिया विविधसिद्धान्तेषु विविक्ता । एवमेवार्वाचीनाः सिद्धान्तपञ्चकेषु सूर्य-सोम-वसिष्ठ-रोमश-शाकल्योक्त ब्रह्मसिद्धान्तानां विवेचनम् उद्भटाचार्यैः विहितम् । एवञ्च पाश्चात्यैरपि महत्वपूर्णमन्वेषणं विहितम् । अंपरस्मिन् 'संहितास्कन्धे' संहिताविषयः मुहूर्त्त-सम्बन्धिग्रान्थिकविषयः ऐतिह्यञ्च विद्यते । तथा शकुनादीनामपि विवेचनमस्ति । तृतीयेऽस्मिन् जातकस्कन्धे जातकानां ग्रहैः सह सम्बन्धः मनुष्यैश्च पारस्परिकसम्बन्धः वर्णितः अस्ति । जातकशास्त्रीय-सिद्धान्तानां तथा जैमिनीपराशरादीनामभिमतं प्रश्न-रमल-स्वप्नादिताजिकवर्णनप्रधानभूतमस्ति । अस्मिन्नेव स्कन्धे जननमरणमध्ये व्यवहृयमाणकालक्रमे उत्तमाधमत्वं सुखदुःखादिकं आयुवक्षस्य वर्णनम् आचार्यैः प्रतिपादितम्, पूर्वापरजन्मनां कर्मविपाकानां फलादीनि नियतावधि-

१. यजुर्वेद ३९/१७

रूपेण भुक्तभोग्यप्रकारेण सुविभक्तमस्ति। अतः जातकानां कृते सुकृत दुष्कृतां इहैव फलमश्नुतत्वादस्य आयुर्दायपक्षस्य विषयो मयाऽत्रविहितः। आयुर्दायचिन्तने विभिन्नप्रकारात्मिका मृत्युः सुखेन मृत्यु, समरेण मृत्यु, चोर-दैत्य-पिशाचापन्नगादि मृत्युः भवतीति।

जन्मकाले गुलिको यस्य राशेर्नवांशके भवेत् तस्मात् सप्तमे राशौ चेत् यदि शुभग्रहो बलीभूतस्तिष्ठति तदा मरणकाले निश्चितमेव तस्य सुखपूर्वकं मरणं भवति। तथा मान्दिस्थितनवांशराशितः सप्ते मंगले गतवति जातस्य युद्धादिनां मरणं स्यात्। तत्र शनैश्चरे सति चौरादिभिर्धनलुब्धकैर्दानवैर्भूतप्रेतपिशाचादिभिः पन्नगादिदंशनैश्च मरणं स्यात् क्षीणे चन्द्र सति जले निमज्जितो म्रियात् इति।

लग्नात् अष्टमो वो येन बलवता ग्रहेण निरीक्षितं वति तस्य ग्रहस्य यो धातुस्तद्दोषान्मृतिर्वाच्या। तत्र सूर्येणाग्निकोपात्। चन्द्रेण जले मज्जनात् भौमेनायुधाच्छस्त्रादितः। बुधेन ज्वरकोपात्। गुरुणा कफात्। शुक्रेण क्षेधो बुभुक्षाकोपात् शनैश्चरेण तृषः कोपात् कृतैर्जातैरामयै रोगैः मरणं वाच्यम्। बहुभिर्बलिभिरवलोकितेऽष्टमे बहुभिद्दोषैर्मरणम्। अष्टमेशे गते गतवति कालस्य लग्नराशिः कालपुरुषस्य यस्मिन्नंगे भवति तज्जैः रोगैः अष्टमेशकर्तृकैर्मरणं वाच्यम्। तत्र अष्टमभावे चरराशि (१/४/७/१०) नवांशे सति देशान्तरे स्थिरराशि — (२/५/८/११) नवांशे स्वकीयदेशे, द्विस्वभावे राशिनवांशे स्वदेशादन्यत्र मार्गे मरणं वाच्यम्। अष्टम भावे बलिष्टै बलयुक्तैः सूर्यादिभिः सूर्याद्यैरष्टमं स्थानं न युक्तं नावलोकितश्च भवेत्तदा लोकरहिते गृहे तद् अष्टम भावस्य यो द्रेष्काणस्य तत्पतिना (२२ द्रेष्काणेशेनेत्यर्थः) मरणं इति। तद्द्रेष्काणपतेर्यो धातुस्तत्कोपान्मृत्युं प्राप्नोतीति भावः।

अष्टमे भावे सूर्यादि ग्रहाणां स्थितौ तत्तद्ग्रहस्य आत्मीयो यो धातुस्तगंवामयेन तदुत्पन्न रोगेण, वा तदीयखलकिंकरपीड्या तत्तद्ग्रहस्य प्रतिकूलये उपग्रहाः कालादयस्तदुत्पादित पीड्या जातो म्रियते। तत्र अशुभग्रह (र.मं., श., के., रा.) युते रन्ध्रेऽति विलापहेतुमतियातनापूर्वकं मरणं वाच्यम्। रन्ध्रे शुभग्रह (बु.वृ.शु.चं.) संयुक्ते सौख्येनाक्लेशे जातो मृत्युरपयातीति। मंगले तुलाराशौ याते सूर्ये वृषराशिगते, चन्द्रे मकरकुम्भयोरन्यतां प्राप्ते जातस्य पुरीषमये स्थाने मरणं भवेत्। निधानाश्रितेऽष्टमभावमुपागते क्षीणेन्दौ बलिना शनिना दृष्टे जातस्य गुह्यमार्गक्षेत्रे तयाः रोगेणोद्भूतया पीड्या वा शस्त्राद्याघातजनितो मृत्युः भवेत्। सूर्य-भौम-शनि-चन्द्रैः जन्मलग्नादष्टमनवमपंचमभावगतैर्जातस्य पर्वतात्पतनेन वा बज्र इन्द्रायुधः (बिजली) तस्मात्, कुड्योभित्तिः (दिवाल) तदादिभिर्मृत्युः स्यात्। अर्थात् मरणसमये तस्योपरि बज्रः कुड्यो वा पतति।

मंगलसूर्यौ यदि परस्परराशियुक्तौ, (भौमः, सिंहे, सूर्यो मेषे वा वृश्चिके) भवेत्। तथा अष्टमभावेशग्रहात् केन्द्र — (१/४/७/१०) स्थितौ भवेतां तदा जातो नरोमरण समये नृपस्य वैमुख्यात् कुन्तादिभिर्निधनं अर्थात् मरणं समेति। अस्मिन् योगे जातं नृपो मारयति शूलादिनेति भावः।

लग्नगते सूर्ये निर्बलेविबले (नीचादिगते) सत्यष्टमस्य बृहस्पतौ लग्नाद् व्यये (१२) गते, भौमशनिग्रहयोरव्यतरेलग्नाच्चतुर्थभावगते यस्य जन्म भवति, तस्य जातस्य खट्वादितश्च्युत-हेतु मृत्युः अर्थात् पतननिमित्तकं मरणं वा शस्त्रेणं मरणं वा रात्रौ निषादश्चाण्डाल "निषादश्चपचावन्ते वासिचाण्डालपुक्कसाः" इत्यमरोक्तेः। तत्कृतेन मृत्युः स्याद् इति।

जन्मलग्नपतौ **जन्म लग्नस्थित नवांशाच्चतु:षष्टितनवांशगते** । लग्न मत्सङ्ख्ये नवांशे जन्म तत्सङ्ख्य एवनवांशेऽष्टम अवस्येत्यर्थ: । **वा लग्नेशे सूर्येण सहास्तंगते** वा लग्नात्षष्ठगते जातस्य आत्मीयजनविहीने महीतले बुभुक्षोद्भूत **पीड्या मरणं जायत इति** ।

अष्टमेशलग्नेशौ बलेन निर्बलौ चेद्भवेतां धराधूनुभौम: षष्ठेशेन युक्तश्च भवेत् तदा तस्य जातस्य सङ्ग्रामे शस्त्रेण मरणं विद्वांसो वदन्ति । लग्नपतौ चतुर्थेशेन शुक्ते द्वितीयभावेशेन च युते जातस्याजीर्णावधिक-भुक्तस्यापरिकात् मरणं भवेत् वा सप्तमेशे वाहनवित्तनाशाभ्या चतुर्थेशद्वितीयेशाभ्याम् सहितेतु अजीर्णान्मरणं भवेद् इति ।

दशमभावस्य नवांशे शनिना युक्तो वा दु:स्थानगो (षष्ठे वा अष्टमे वा द्वादशे) भवेत् तदा जातस्य विषं गरलं तस्य भक्षणेन मरणं । राहुणा वा शिखिना सह युक्तो भवेत् तदा तस्य जातस्य रज्ज्वा गुणेन (रस्सी) निबन्धनेन मृत्यु: भवेत् इति । उक्तं[१] —

> **"भुक्त्यंगपौ भानुसुतेन युक्तौ दु:स्थानगौ वा विषभक्षणेन ।**
> **राहुध्वजाभ्यां सहितौ च दु:स्थावुद्बन्धनात्तस्य मृतिं वदन्ति ॥"**

क्षीणबले चन्द्र, भौमाहिमन्दानामन्यतमेन युक्ते निधनस्थिते च पिशाच पीडाग्नि जले विपन्मरणं स्यात् । अष्टमस्थे क्षीणचन्द्रे भौमे युक्ते पिशाच पीड्या, राहुणा युक्ते अग्नौ शिनना युद्धे जले मरणं वाच्यम् । तथा क्षीणे शशांके तथा भूते दु:स्थे (६/८/१२) तदा तु अपस्मारभयात्, अपस्मारो मृगीरोग: तस्य भयान्मृत्यु: स्याद् इति ।

हस्तादिविच्छेदयोगा:

लग्नान्नवमे भावे शनौ, अथ च गुरौ तृतीये भावे विद्यमाने, वा तौ शनिगुरु क्रमेण निधनेऽष्टमे, द्वादशे भवेतां तदाजात: करच्छिदो भवति । तस्य जातस्य करच्छेदो जायते । यदि राहुशनिबुधा: दशमभावगता भवेयु: तर्हि अत्र अस्मिन्योगे जात: करच्छेदयुतो भवति । असौ जातो हस्तरहितो भवेत् इत्यर्थ: ।

> **धर्मे शनौ वा सगुरौ तृतीये करच्छिदोऽर्के निधने व्यये वा ।**
> **विधौ कलत्रे निधनान्विते वा कुजेन युक्ते यदि वा सजीवे ॥**

अष्टमभावेशे शुक्रेण दृष्टे, सूर्ये वा शनौ राहुणा युक्ते वा पापादि षष्ठ्यंशेन समन्विते (अशुभषष्ट्यंशगत इत्यर्थ:) यदि जन्म भवति तदा तस्य जातस्य शिरसो विच्छेदनम् भवति । अस्मिन्योगे जातो नर: शिरच्छेदेन म्रियते इति भाव: ।

उक्तं च —

> **"शुक्रेज्यदृष्टे दिवसाधिनोसारे शनौ वा फणिनाथयुक्ते"**[२]

---

१. सर्वार्थचिन्तामणि: ।

२. सर्वार्थचिन्तामणि: ।

शनौ जन्मलग्ने सप्तमभावे राहुयुक्ते शुक्रे कन्याराशिगते कृष्णचन्द्रे च सप्तमभावगते जातः चरणेन सार्द्धविच्छिन्नहस्तो भवति। उक्तयोगे जातो नरो हि करचरणरहितो भवेत् इत्यर्थः।

मन्दे विलग्ने मदने सराहौ कर्मान्वितौ भार्गवनन्दने च।
कृष्णे शशांको मदराशियुक्तै विच्छिन्नहस्तः सभवेत्पदेन॥[१] **इति**

मेषवृश्चिकयोरन्यतरे राशौ लग्नेवा मेषस्य वृश्चिकस्य वा नवांशे लग्नपते, तत्र सूर्ये गतवति कृष्णपक्षस्य **चक्रे** तु राहुबुधाभ्यां संसुते सिंहेविधमाने। सूर्यो लग्ने भौमगृहे वा भौमनवांशे भवेत्, क्षीणचन्द्रराहुबुधाः सिंहे **भवेयुः**। अस्मिन् योगे यदि जन्म भवेत्तर्ह्योदरप्रभेदनमित्तस्य जातस्य कुक्षिभेदेन मरणं भवेत् इति।

कथितं च —

फणीशचन्द्रात्मजसंयुतेऽर्करश्म्याभिभूतेह्युदरस्य भेदः।[२]

लग्नगते शनौवित्यर्थः सौमादृशा शुभग्रहदृष्टिरहिते राहुसूर्याभ्यां युक्ते क्षीणचन्द्र (सूर्य युक्तश्चन्द्रोऽमायामेव भवति। यदि जन्म स्यात् तदा जातस्य नाभिप्रदेशे उदरस्य भेदं शस्त्रेण पराशरादिमहर्षय आहुः।

दूर्मरणयोगाः

चन्द्र (६/८/१२) मन्यतमे गते जन्मलग्नपतिना वीक्षिते, शनिगुलिकराहुभिः संयुक्तश्च यस्य जन्म भवति तस्य दुर्मरणमपमृत्युः भवतीति वदेत्।

सूर्ये मेषूरस्थे (लग्नाद्दशमभावगते भौमे चतुर्थे न च शुभग्रहैः युद्धे शुभग्रहयोगरहित) बुधे तु जन्मलग्नस्थे यदि जन्म स्यात् तदा जातस्य गोशृंगतो वा शूलनिपाततो मृत्युमुपदिशेत्। अस्मियोगे जातं नरं गौः शृंगेण व्यापादयेत् वा कश्चित् शूलेन भेद्येदिति भावः।

ग्रहाः लग्नाद्दशमचतुर्थप्रथमाष्टमभावगताः पापग्रहैर्दृष्टाश्च भवेयुस्तदा जातस्य शूलपातात्कृन्तादिकेन मृतिर्मरणं स्यात्। चन्द्रे लग्नगते शनौ चतुर्थभावस्थे मंगले दशमभावगते कलहजनितदोषैर्विवादोत्पन्न दोषैर्मरणं स्यात्।

सूर्ये लग्नं गतं चन्द्रजायामुपगते पापग्रहावलोकिते कलहभयात् तोयभ्या मृतिः स्यात्। जन्मलग्ने सूर्याचन्द्रमसौ भवेतामन्ये ग्रहा भौमादयो द्वि शरीरके (३/६/९/१२) यथासम्भवं पापग्रहेणावलोकिताश्च यदि भवेयुस्तदा बहूदकेऽऽगाधजले प्रबूडाच्छृंगिणां द्रष्टाद्वा मरणं स्यादिति।

चन्द्राधिष्ठितभावान्नवमतनयराशौ (९/५) भावे पापग्रहे गतवति, तस्मिन्यायखेटे स्थिते पापग्रहावलोकिते च वा पक्षान्तरेण जन्मसमये यल्लग्नं तस्मात् अष्टमे भावे जन्मतुल्यद्रेष्काणो (जन्म लग्ने यदि प्रथम द्रेष्काणं

---

१. सर्वार्थचिन्तामणिः।
२. तत्रैव।

तदाऽष्टमेऽपि प्रथम द्रेष्काण मिति) सर्पनिगडपाशसञ्ज्ञकद्रेष्काणानामन्यतमे सति जातस्योद्धन्धनेनर कारागारादिना) मृत्युः स्यात् ।

चन्द्रसूर्यौ यदि मीनलग्ने भौमशन्योरन्यतरेण सहितौ भवेतां तथा मंगले वा शनौ लग्नादृष्टये च विद्यमाने (अत्र पापेक्षिते इत्यपि पाठान्तरम् । तदा लग्ने पापग्रहेण केनचिद्वलोकिते इति व्याख्येयम्) जातस्य स्त्रीजनितं मरणं स्यात् । उक्त योगे जातस्य स्त्री विद्वेषान्मरणं जायत इति भावः । भौमे चतुर्थभावे यदि वा सूर्ये सप्तम भावगते शनौ चन्द्रे चाष्टमे गतवति जातस्य कस्यचिदन्नविशेषस्य (कोद्र वादेः) भक्षणान्मरणं वाच्यमिति ।

जन्म लग्नादष्टमे भावे, नीचेगते शत्रुगृहगते वा चन्द्रे दशमे भावे सूर्ये चतुर्थे भावे विद्यमाने सति जातस्य निर्धारितकाष्ठा पतनाद्यातेन मृत्युः भवति । जन्मलग्नस्वामिनि, सकेन्द्रे इति पाठान्तरे, केन्द्रेण (१/४/७/१०) भावानामन्यतमेन सिहत इति व्याख्येयम् पापग्रहयोरन्तरेऽर्थाल्लग्नेशदिकः पापो द्वितीयेऽन्यो द्वादशे च विद्यमानो भवेत् तथा लग्नात् अष्टमे भावे केनचित् पापग्रहेण युते सति स्वामातुर्वैमुख्यान्मृत्युर्भवति । अत्र योगे जातस्य माता दुष्टा भवत्यतरतत्कोपान्मरणमिति ।

पापग्रहैः चतुर्थदशमभावगतैरथवा नवमपंचमभावगैः अष्टमभावेशे भौमेन सह जन्मलग्नेगते सति जातस्योत्कारागृहादौ बन्धनेन मरणं वाच्यम् । इति

लग्ने रवौ सुते मन्दे रन्ध्रस्थे तूडुनायके ।
धर्मं गते धरासूनौ वृक्षा शनिभयान्मृति ।।

अस्मिन्योगे जातस्योपरिवृक्षनिपातेन वज्रनिपातेन वा मरणं वाच्यम्/

एवमेव होरासारे[१] —

अर्कोदयेऽर्कपुत्रे, सुतगे रन्ध्रे विधौ, कुजे भाग्ये ।

वृक्षाशनि कुडयपातै[२] —

योगे जातस्य निर्दिशेन्मरणम् ।। इति

सूर्यभौमशनिषु लग्नाद्दशमचतुर्थभावगतेषु, कृष्णे चन्द्रे लग्नात् छिद्रस्थान राशरिंगतेऽष्टमभावे यो राशिस्तद्गते (अष्टमभावगत इत्यर्थः) जातस्य यात्राकाले शत्रुदोषद्वेरिविद्वेषान्मृतिः स्यात् ।

शनिर्लग्ने, द्वादशे च सूर्यचन्द्रबुधाः, सप्तमभावगता भवेयुस्तथा जातस्तु देवमन्दिरे आरामे वनप्रदेशे स्वनिवासभूमौ वा म्रियते ।

अत्रहोरासारे —

१. होरासारे ।
२. तत्रैव ।

"अर्ककुजो व्ययसंस्थौ, राहुः शशी सप्तमे, गुरुः केन्द्रे ।
जातस्य मृतिं विन्द्यात्प्रवासभूमौ सुरालयोद्याने । इति ।।"

लग्नादष्टमे भावे पापग्रहेण युते द्वादशभावगते अथवा लग्नेशः चरे दुर्बलेन केनचिद्ग्रहेण युक्ते केन्द्र-(१/४/७/१०) गते यदि जन्म भवेत् तदा जातस्य दुर्मार्गदोषात् मृत्युः भवेत् । उक्तलक्षणे योगे जातो नरः कुपथे गच्छन्मृत्युमुपैतीति भावः । चन्द्रे मंगलशनैश्चरयोः क्षेत्राणा (१/८/१०/११) मन्यतमे याते केनचित् पापग्रहेणा-वलोकिते, तथा पाखगयोरन्तरे मध्ये स्थिते, अथवा शशांको कन्यागृहे चतुर्थभावे चोपगते जातस्य अग्निदाहेन शास्त्रादिपातेन वा मरणं वदेत् प्राज्ञः, इति ।

भौमार्कजभवनेऽब्जे पापद्वयमध्यगे न सौम्ययुते ।
कन्यायां हिमगौ वा ज्वराग्नि सम्पातशस्त्रदोषैर्वा ।। इति[1]

यदि चेत् विषघटिकायां, प्रति नक्षत्रं केचित् चत्वारो दण्डा विषघटिका उच्यन्ते । तथाहि मुहूर्त्तमार्त्तण्डे[2]— "पंचाशज्जिनरनाग्नयश्च खकृता आखण्डला मूर्च्छनाः इत्यादिनाम् । तस्यां विषघटिकायां तथा अष्टमे भावे पापग्रहयुक्ते जन्म भवति तस्य विषं गरलम्, शिखी अनलम्, शिवस्तस्य शूलं तैर्गरलानलशूलैः मरणं जायते अष्टम-भावेशेन सहिते लग्नेशे बहुभिर्विचरैर्ग्रहैर्युक्ते प्रजातो नरः बहवो जना म्रियन्ते यस्मिन्काले (महमारी प्रभृतिरोगोप-द्रवे) तस्मिन्काले म्रियते जन्म लग्नपतिस्तिष्ठति यस्य नवांशे तस्य राशेः कोपोद्भवामयैः (तस्य नवांशराशेर्यो धातुस्तद्धातुविकाररोगैरित्यर्थः) तस्य जातस्य मृत्युमेके हौरिशास्त्रविदो महर्षयो वदन्ति मेषादि द्वादशराश्यंशगते लग्नेशे जातस्य निर्याणकारणान्युच्यन्ते जन्म लग्नेशे मेषराशौ वंशगते वा नवांशस्थिते तु जातस्य तापज्वराग्न्यु-द्भवैः रोगमरणं स्यात् । वृषनवांशे श्वासविकारशूलजनितैः रोगैः मिथुने शिरोवेदनाभिः कर्कराशौ वातोन्मादभवैः सिंहे विषस्फोटकैः कन्यायां जठराग्निगुह्यजनितैः तुलायां शोकचतुष्पदज्वरभवैः, वृश्चिके अश्मशस्त्रादिभिः धनुषि तीव्रमरुद्भवैरति वातरोगैः मकरे व्याघ्रादि शूलामवैः कुम्भे व्याघ्रकृतेः मीने तोयातिसारैः जातस्य मृत्युं वदेत् । यस्य राशेर्या प्रचारधरणी तस्यां मरणमिति । तथा च नवांशगता या संचरभूमिः (लग्नगतनवांशाच्चतुःषष्टितमो नवांशो पत्रसंचरति) सा भूमिः जातस्य मृत्युप्रदा भवति ।

"लग्नादष्टमराशेः स्वभावदोषोद्भवं बिजानीयात् । इत्यादिनाम् ।"[3]

---

१. होरासारे
२. मुहूर्त्तमार्त्तण्डे
३. होरासारे ।

ज्यौतिषस्य महत्त्वम्

डा. कालीकान्तमिश्रः

के नहि जानन्ति, यत् संस्कृतं ज्ञानागारम् ? संस्कृतमन्तरा भाषा-ज्ञानान्मुक्तिरिदमुद्घोषणेऽसमर्था-स्सन्ति । सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयारितिवाक्यं विशालमर्थबोधकम् । विश्वेऽस्मिन् सर्वासु भाषासु बहुसमृद्धशास्त्रं संस्कृतं परिधयश्चापरिमिताः । संस्कृतभाषा सर्वासां भाषाणां जननी इत्युक्तिमपि सर्वैः समाद्रियन्ते । संस्कृतं विना स्थाणुरिव निष्प्राणाः सकलाः जनाः भविष्यन्ति । विश्वस्यप्राणः संस्कृतम् । संस्कृतं विना संस्कृतेरभावः ब्रह्माण्डगोलेऽस्मिन् सृष्टेर्मूलमन्त्रस्यापौरुषेयवेदस्य भाषा एव प्रमाणमिति सर्वत्र सर्वैः मन्यन्ते । वेदस्यापि षडङ्गानि । षट्स्वङ्गेषु प्रत्यक्षं शास्त्रम् ज्योतिषं नेत्रत्वात् महत्त्वपूर्णमस्तीति ।

विज्ञानं ज्योतिश्शास्त्रम् । शास्त्रस्यास्यापरनाम ज्योतिर्विज्ञानम् । नास्त्यत्र कश्चन सन्देहावसरः । यतो हि कालात्मकं शास्त्रमिदम् । कालज्ञानं विना किमपि न भवितुं शक्यते । शास्त्रस्यास्य साक्षिणौ सूर्यचन्द्रौ स्तः । वचनमपि —

अप्रत्यक्षाणि शास्त्राणि विवादस्तत्र केवलम् ।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥

तत्र किन्नाम ज्यौतिषम् ? ज्योतिः पिण्डं ज्यौतिषम् । कुत्र वर्त्तते ? भूमेरुपरि एकोनपञ्चाशद्योजनान्तरे प्रवहानिलोवायुस्तत्र-प्रवहानिलस्थ ज्योतिः पिण्डं ज्यौतिषम् । अथवा सविता स्वरूपं ज्यौतिषम् ।

शास्त्रस्यास्याष्टदशप्रवर्तकानां मध्ये प्रथमं सूर्यस्य स्थानम् । यथा-सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।

कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ॥
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशह्येते ज्योतिश्शास्त्रप्रवर्त्तकाः ॥ इति

स्वयं त्रैलोक्यदीपो रविर्यस्य शास्त्रस्य प्रवर्त्तकः तस्य वैशिष्ट्यं स्वयम्भूरस्तीति ।

कालाधीनं जगत्सर्वम्-इति सर्वे वदन्ति । जगतः सर्वाणि कार्याणि कालाधीनानि । कालज्ञानं विना न किमपि भवितुं शक्यते । कालबोधकज्योतिषशास्त्रस्याधिपतिः सूर्यः । सूर्य आत्मा जगतस्तस्थुषश्च । एवमेव— सूर्यमगन्म ज्योतिरुत्तमम् । इतिप्रमाणं शास्त्रस्यास्य सिद्धान्त-होरा-संहितेति स्कन्धत्रये विभक्तम् ।

सिद्धान्तात्-खगोलीय ग्रहनक्षत्रादीनां बोधः। ग्रहाणां गतिः, त्रुटिकालतः प्रलयान्त कालं यावत् कालगणना दिग्ज्ञानं लम्बांशाक्षांशाः भाभ्रममार्गं भूमौ भूभाग्रहणादि ज्ञानम्भवति। स्कन्धत्रयेषु सिद्धान्तस्य महनीयं पदम्।

होराशास्त्रात् जातकादिक्रियाकलापस्य शुभाशुभफलानि विवेचनानि भवन्ति। सूक्ष्मकालज्ञानाल्लग्नं बोध्यम्। लग्नकुण्डल्यां ग्रहस्थापनम्। ततो लग्नवशाज्जातकस्य स्वरूपः, संस्कारः, आयुः, भ्रातृ-भगिन्यादीनां संख्या-मातृपितृपितामहादीनां च फलानि विवेचनीयानि। कति विवाहयोगाः, कीदृशं दाम्पत्यजीनम्, भाग्यकर्मादीनां चापि विचारः सुस्पष्टः।

प्रश्नकुण्डलीतः प्रश्नानामुत्तराणि, भूत-वर्तमान-भविष्यत् कालफलानि सुस्पष्टानि। येषां यस्मिन् कस्मिन्नपि विषयाणां परीक्षाकर्त्तुराकाङ्क्षा भवेत्तेषां पूर्णसन्तोषजनकमुत्तराणि होराशास्त्राधिगतानि स्युः।

दिन-पक्ष-मासादीनां गणाना सर्वैः क्रियन्ते। तेषु रव्यनन्तरं सोमस्तदनन्तरं कुजादि व्यवस्थाऽपि अस्मादेव शास्त्रात्भवति। शुक्ल-कृष्णपक्ष-चैत्रवैशाखादिमासानां व्यवस्था ज्योतिषशास्त्रादेव। संहिताशास्त्रात्-शकुनादिविचारः, भूकम्पादिविचारः स्पष्टरूपेण भवति। कस्य विज्ञानस्य एतादृशं वैशिष्ट्यम्? येन कालोद्भवं सर्वं शुभाशुभनिरूपसामर्थ्यम्। अत आदिकालादेव ज्यौतिषस्य विशेषं महत्वम्। प्रत्यक्षं विज्ञानशास्त्रम्। भारतीयज्योतिषस्य प्राचीनता विषयेऽपि विदुषमभिमतान्यपि यत्र कुत्रापि स्पष्टरूपेण मिलन्ति। यथा—

प्रो. मैक्समूलरः — इण्डिया हाट कैन इट टीच अस-३६०-३६६ पृष्ठे, फ्रान्सीसी पर्यटक-फ्राक्वीसवर्नियरट्रावेल्स-इन-दी मुगल इम्पायर पृ. ३२९, डॉ राबर्टसन-"भारतीय सभ्यता और उसका विश्वव्यापी प्रभाव" ग्रन्थे — ११७ पृष्ठे इति।

ऋग्वेदे यजुर्वेदे अथर्ववेदे च विशदरूपेण ज्यौतिषस्य विषयः समुपलभ्यते। वेदाङ्ग ज्योतिषग्रन्थे-लगधमुनिना कथितम्। यथा—

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्॥

शास्त्रादस्मात्-खगोलीयज्ञानम्, जातकादिज्ञानम्, भूकम्पादिज्ञानमपि भवति। शुभफलानि अपि लभन्ते जनाः। यथा —

ज्योतिश्चक्रं तु लोकस्य सर्वस्योक्तं शुभाशुभम्।
ज्योतिर्ज्ञानं तु यो वेद स याति परमाङ्गतिम्॥

अपि च

दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता, त्रिदिनजनितदोषं तन्त्रविज्ञः स एव।
करण-भगणवेत्ता हन्त्यहोरात्रदोषं जनयति बहुपापं तत्र नक्षत्रसूची॥

यदि भारतशासनेन सम्यग् वेधशालादिव्यवस्थाभवेत्तदा स्वल्पश्रमैरल्पवित्तैरल्पकालैरेव सर्व-भूकम्प उत्पातादि-विविधपराभवादेर्ज्ञानं पूर्वमेव भविष्यति। महत् गुणमिश्रितं ज्योतिर्विज्ञानम्।

राष्ट्रियसमस्याः वैदिकसमाधानञ्च

—डॉ० राजेश्वरमिश्रः

वेदेषु तपोनिष्ठऋषीणां मनीषीणाञ्च गभीरचिन्तनं स्वानुभूतान्यनेकानि तथ्यानि च निहितानि, यानि जागतिक-व्यवहारार्थं मानवकल्याणाय च परमावश्यकानि सन्ति भारतीयसंस्कृतेश्च मूलाधारत्वेन स्वीकृतानि। वेदेषु पदे-पद उपदिष्टानां नैतिकमूल्य-सदाचार-परस्पर-स्नेहभावनां 'सर्वजनहिताय सर्वजनसुखाय' इत्येतस्य सङ्कल्पस्य च सर्वथा परित्यागादेवाद्यत्वे समग्रमपि भारतराष्ट्रं साम्प्रदायिक-हिंसा-जातीयवैमनस्यधार्मिकासहिष्णुतोग्रवादादिभिरनेकाभिः समस्याभिरभिग्रस्तं वर्तते। वेद आप्तप्रमाणत्वेन स्वीक्रियत इति विदितचरमेव। अतो वेदोपदिष्टाः नैतिकनियमाः सदाचाराश्च प्रभुसम्मितोपदेशत्वेनाङ्गी क्रियन्ते। परमाधुनिके काले तेषां सर्वथावहेलनादेवाखिलं राष्ट्रं परस्परेर्ष्या-द्वेष-वैमनस्य-जाति-धर्मगतभेदभावादि-भिरनेकाभिः समस्याभिः सङ्क्रान्तम्। सर्वे मानवाश्च परस्परं शत्रुभावं गताः। अतो वेदे स्थले-स्थले निर्दिष्टानि परस्परं सामञ्जस्य भावनोत्पादकान्युपदेशपरकाणि वचनानि समस्या समाधाने निश्चयेन समर्थानि विद्यन्ते।

अथर्ववेदीय भूमिसूक्तस्य—"जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्"[१] इति मन्त्रोऽयं धर्म-भाषा-व्याजेन राष्ट्रं विखण्डयितुमहर्निशं प्रयतमानानां साम्प्रदायिकदुर्भावनोपहतमानसानां तेषां नरभक्षकाणां कृते प्रेरणादायकः स्वीकरणीयश्चोपदेशः ये स्वनिर्दोषदेशवासिनो नृशंसतया हिंसितुं तत्पराः सन्ति। मन्त्रोऽयमद्यत्वेऽपि विविधतायामेकताया उद्घाटनं करोति। भिन्न भाषा-भाषिभ्यो विविधधर्मावलम्बिनेभ्यश्च जनसमुदायेभ्यः सौहार्दपूर्णसहास्तित्वस्य बन्धुत्वस्य च प्रेरकोऽस्ति; यतो ह्यस्मिन्मन्त्रे ऋषिः विविधभाषा भाषिभ्यो विविधधर्मावलम्बिभ्यश्च जनसमुदायेभ्यः पृथिव्यां तथैव निवसनायोपदिशति यथा कुटुम्बिनो जनाः परस्परं सौहार्दमनुभवन्त एकगृह एव वासं विदधति।

कस्यचिदपि राष्ट्रस्य सततमभ्युदयाय तस्य सर्वेष्वपि वर्गेषु परस्परं मैत्रीभावोऽनिवार्यो वर्तते। अतो वेदे ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेभ्यः सर्वेभ्यः वर्णेभ्यः परस्परं स्नेहभावः समुपदिष्टः। राष्ट्रे निवसत्सु ब्राह्मण-क्षत्रिय-वैश्य-शूद्रात्मकेषु सर्वेष्वपि वर्णेषु परस्परं प्रेमभावमुत्पादयन्तमेतन्मन्त्रद्वयं द्रष्टव्यम्—

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।
प्रिय सर्वस्य पश्यत उत शूद्र उतार्ये॥ (अथर्ववेद, १९.६१.१)

१. अथर्व., १२.१.४५।

रूचं नो धेहि ब्राह्मणेषु रूच राजसु नस्कृधि ।
रूचं विश्येषु शूरेषु मयि धेहि रूचा रूचम् ॥ (वाजसनेयि-संहिता, १८.४८)

मन्त्रावेतौ समग्रे मानवसमुदायेऽन्योन्यं सौमनस्यजनकौ । अतो महामन्त्राविति भणितुं शक्येते । मन्त्रयोरेतयोऋषिणा काम्यते यत् ब्राह्मणेषु क्षत्रियेषु वैश्येषु शुद्रेषु चास्माकं प्रीतिर्भूयादस्माकं मनसि च सर्वान्प्रति प्रेमोत्पत्तिर्भूयात् । एतेषु वर्णेष्वपि ब्राह्मणानां क्षत्रियाणाञ्चाऽन्योन्यं सहयोगोऽपि वेदे सम्यक् प्रतिपादितः । वस्तुतस्तु ब्राह्मणाः समाजस्य बौद्धिकपक्षस्य क्षत्रियाश्च शक्तिपक्षस्य प्रतिनिधित्वेन वर्तन्ते । अतस्तेषां सम्यगाचरणात्सहयोगाच्चान्ये जना वर्णा वा स्वत एव नियन्त्रिताः सम्यगाचरणशीलाः भविष्यन्ति, यथोक्तं वाजसनेयिसंहितायाम्—

यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ।
तल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥[१]

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥[२]

मन्त्रद्वयेऽस्मिन्नृषिणा निर्दिष्टं यद्यत्र ब्राह्मणाः राजन्यश्च सम्यगाचरन्ति परस्परं मैत्रीभावेन कार्यञ्च कुर्वन्ति तं राष्ट्रं पुण्यं विज्ञेयमिति । पुनश्च तेन काङ्क्षितं यद् ब्राह्मणाः क्षत्रियाश्च श्रीसमन्विता भवेयुः । राष्ट्रस्य समाजस्य च सर्वाङ्गविकासायानिवार्यरूपेण सकलानां प्रजाजनानां भोजनादिविषयकानां प्राथमिकानामावश्यकतानाञ्च सम्पूर्तिर्भवेदित्येतस्मादेव हेतोः ऋग्वेदे समेषां कृतेऽन्नप्राप्तिरन्नरक्षा चोपदिष्टे ।[३]समाजे साम्यं विधत्तुं क्षुद्रादपि क्षुद्रस्य प्रजाजनस्यापि प्रगतिरनिवार्या भवति । अतो वेदे क्षुद्रस्यापि समृद्धय इन्द्रः प्रार्थ्यते—"असि दभ्रस्यं चिद् वृधः ।"[४] एतद्व्यतिरिक्तं सबलैर्जनैर्दुर्बलान् प्रत्यत्याचारः न करणीयः तस्य शोषणञ्च न कर्तव्यमिति भावनाप्यथर्ववेदेऽभिव्यक्ता—'यत्र शुल्को न क्रियते अबलेन बलीयसे' ।[५] अतो वेदे सार्वत्रिकी मङ्गलकामनैव सर्वजनकल्याणस्योद्घोषत्वेन प्रतिपादिता ।

एवमेव ऋग्वेदीये संज्ञानसूक्ते (१०.१९१.२-४)ऽथर्ववेदीये संज्ञानसूक्ते (६.६४. १-३) चापि राष्ट्रस्य समेषां मानवानां क्रियाकलापेषु मनबुद्धिविचारेषु च पूर्णसामञ्जस्य भावो दृग्गोचरो भवति । निखिलेषु मनुष्येषु सांमनस्यभावमिच्छता वैदिकऋषिणात्र तेषां व्यवहारे परस्परं विरोधं विहाय सौमनसं काम्यते । एतदर्थमेभिर्मन्त्रैर्जनाः सङ्गमनाय, सम्भाषाय, समानान्तःकरणाय, समानकार्याकार्यपर्यालोचनाय, कार्येषु समानप्रवृत्तये, कर्मस्वेक-

१. वाजसनेयिसंहिता, २०.२५ ।

२. तदेव, ३१.१६ ।

३. ऋ., १.६९.७ : न किष्ट एता व्रता मिनन्ति नभ्यो यदेभ्यः श्रुष्टिं चकर्थं. तदेव, १.१०४.७ : क्षुध्यद्भ्यो वय आसुतिं दाः । तदेव, १०.१०१.८ : मा वः सुस्रोच्चमसो दृंहता तम् ।

४. तदेव, १.८१.२ ।

५. अथर्व., ३.२९.३ ।

रूपत्वाय, समानचित्ताय, सम्भूय यज्ञानुष्ठानाय, समानसङ्कल्पाय समानहृदयत्वाय, शोभनसहास्तित्वाय सांमनस्याय चादिष्टाः—

स गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥

समानी वः आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥[१]

कस्यचिद् राष्ट्रस्य वास्तव्येषु चेदेतादृशी हार्दिकी मानस्यैकरूपता विद्वेषशून्यता च स्यात्तर्हि तत्र समस्यानां वासो खलु कथं भवितुं शक्यते, कदापि नहि । अथर्ववेदेऽन्यस्मिन्सांमनस्य सूक्तेऽपि (३.३० १-७) मनुष्याणां हृदयेष्वेतादृशी भावनोद्बोधनायैव तेषां कृते सौहार्दस्य, सांमनस्यस्याविद्वेषस्यान्योन्यमभिकाम्यायाः, समानमनसो, मधुरभाषणस्य, संज्ञानस्य, समञ्जनायाः, समानव्रतस्य, परस्परमनुसरणस्य, सचित्तेः, सौमनसस्य, परस्परमनुरागवशेनैकत्रान्नपानादिकस्य, समानस्नेहबन्धनस्य, सहकारित्वस्याहर्निशं शोभनमनस्कत्वस्य सङ्गतेश्च शिक्षा प्रदत्तां—

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्योऽन्यमभिहर्यत वत्सं जातमिवान्घ्या ॥

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ॥

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसां ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥

येन देवा न वियन्ति नो च विद्वषते मिथः ।
तत्कृष्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ॥

ज्यायस्वन्तश्चित्तिनो मा वियौष्ट संराधयन्तः सधुराश्चरन्तः ।
अन्योऽन्यस्मै वल्गु वदन्त एतं सध्रीचीनान्वः संमनसस्कृणोमि ॥

समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः ॥

१. ऋ.,१०.१९१.१-४ अथर्व.,६.६४.१-३ ।

सध्रीचीनान्वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान्।
दगेवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु॥[१]

वेदस्यास्यैतादृशी शिक्षा जनसमुदायस्य मनस्सु विश्वसख्यस्य, सर्वविधशान्तेः विश्वकल्याणस्यैक्यस्य च भावमुत्पादयति। कौशिकसूत्रोऽप्यस्य प्रमाणमुपस्थापयति तदनुसारं सूक्तमिदं मानसिकैक्योत्पत्यर्थं विनियुक्तम्।[२] यजुर्वेदेऽपि सहभोजस्य सपीतेश्च निर्देशोपलभ्यते।[३] अथर्ववेदेऽन्यत्रापि सहभक्षस्य कामना कृता।[४]वेदेऽस्मिन्नैक्यस्यैतादृश्युदात्तभावनोद्भावकमेकमन्यदपि सांमनस्यसूक्तं (६.७४.१-३) ध्यातव्यम्। सूक्तेऽस्मिन्नपि शारीरिकं मानसिकं व्रतसम्बन्धि च समानज्ञानजननमैक्यं वा सांमनस्यञ्चोपदिष्टं यत् मानवसमाजे विश्वबन्धुत्वस्यैकतायाश्चोद्घोषं करोति—

सं वः पृच्यन्तां तन्व सं मनांसि समु व्रता।
सं वोऽयं ब्रह्मणस्पतिर्भगः सं वो अजीगमत्॥

संज्ञपनं मनसोऽथो संज्ञपनं हृदः।
अथो भगस्य यच्छ्रान्तं तेन संज्ञपयामि वः॥

यथादित्या वसुभिः संबभूवुर्मरुद्भिरुग्रा अहृणीयमानाः।
एव त्रिणामन्नहृणीयमान इमान्जनान्संमनसंस्कृधीह॥[५]

अनेन प्रकारेण वेदे जना विद्वेषपरिहाराय परस्परं रक्षणाय च सम्प्रेरिताः,[६] द्वेषभावाच्च निवारिताः,[७] मानवमात्रं प्रति सुमतेः सद्भावनायाश्च शिक्षापि प्रदत्ता।[८] इतोप्यधिकं सर्वान् प्रति मित्रस्य चक्षुषा दर्शनमप्यादिष्टम्—

"मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे॥[९]"

मानवेनेतरेभ्यो जनेभ्यो भोजनं प्रदायैव भोक्तव्यमित्येतस्य निर्देशेऽपि वेद उपलभ्यते। यतो हि तदनुसारं स्वयमेव भोक्ता मानवः केवलो नितान्तः पापभागेव खलु भवति।[१०] परमन्येषां भोजयितुर्नरस्य गृहं पुष्करिणीव

१. अथर्व., ३.३०-१-७।
२. कौशिक सूत्र, ११.५ द्रष्टव्यः।
३. यजु., १८.९ : सन्धिश्च मे सपीतिश्च मे।
४. अथर्व., ६.४७.१ : आयुष्मन्तः सहभक्षाः स्याम।
५. तदेव, ६.७४.१-३
६. ऋ., ६.७५.१४ : पुमान्पुमांस परिपातु विश्वतः।
७. अथर्व. १२.१.२३-१५ : मानो द्विक्षत् कश्चन।
८. तदेव, १७.१.७ : यांश्च पश्यामि यांश्च न तेषु सुमति कृधि।
९. यजु., ३६.१८
१०. ऋ., १०.११७.६ : केवलाघो भवति केवलादी।

शोभनं भवति ।[१] अतः परेषामुपकारः करणीयः । वेदोक्तैरेतैर्वचनैर्मानवजातं प्रति मैत्री, शान्तिः, सर्वकल्याणकामना चाभिव्यक्तिमापन्ना ।

अतः मनसा-वाचा-कर्मणैतादृशानां वैदिकोपदेशानां पालनेन मानवमात्रं प्रति सद्भावनया मैत्रीभावेन च सार्वत्रिक्यभयभावनोदेति । अथर्ववेदेऽस्या अभयभावनाया अभिव्यक्तिरनेकत्र विद्यते ।[२] मन्त्रैरेतैः सर्वत्राभयं काम्यते । एकस्मिन्मन्त्रे तु प्राच्याद्याः दिश उपद्रवविरहिता भवन्त्वित्यस्य कामनापि कृता । यतो हि तदा सपत्नविषयेऽपि जनैर्द्वेषो न क्रियते स्म । अतः समेषां कृते भयराहित्यं काङ्क्षितम् ।[३] निदर्शनार्थमत्र मन्त्रद्वयमुदाह्रियते—

अभयं न करत्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे ।
अभयं पश्चादभयं पुरस्तादुत्तरादधरादभ्यं नो अस्तु ॥
अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः ।
अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ॥[४]

मन्त्रद्वयेनैतेन सर्वेषु लोकेषु सर्वासु दिक्षु च मित्रादमित्राद् वा परिचितादपरिचिताद् वा दूरस्थाद्समीपस्थाद्वा जनादभयं काङ्क्षितम्, सर्वा दिशो मम मित्रं भवन्त्वित्यपि चाभिलषितम् । एवञ्च वेदेऽनेकत्र विश्वमखिलमेकनीडमेकरूपञ्चेति मत्वा समग्रे राष्ट्रे ऐक्यस्योद्घोषोऽपि कृतः । यजुर्वेदीय-वाजसनेयि-संहितानुसारं निखिलं विश्वमेकनीडं विद्यते ।[५] ऋग्वेदाथर्ववेदानुसारं जगदेतदेकरूपञ्च स्वीकृतम् ।[६] इयमेव भावना विश्वमानववादस्य दृढाधारशिला भारतीयसंस्कृतेर्मूलञ्च वर्तते ।

अतो वैदिकानां सर्वकल्याणोपदेशवचसां सर्वथानुकरणेन विश्वस्मिन्नपि विश्वे मानवतावादस्य, विश्वकल्याणस्य, विश्वबन्धुत्वस्य, नैतिकसाम्यवादस्य, समाजवादस्य च स्थापना अनायासेन भवितुं शक्यते । यदि जना आप्तप्रमाणरूपाणि क्षेमकराणि वैदिकवचांसि सर्वथानुकुर्वन्ति तर्हि सर्वा दिशो नः मित्राणि भविष्यन्तीत्यत्र नास्ति कश्चिदपि सन्देहलवलेशः । एवञ्चाखिले राष्ट्रे सुरसैव विस्फारितवदना साम्प्रदायिकहिंसादुर्भावाद्याः सर्वा अपि समस्याश्च स्वत एव सर्वथा निर्मूलत्वं गमिष्यन्तीति मे विश्वासः । अतः वयं सर्वे परस्परं भेदभावं परित्यज्य राष्ट्रियसमस्यासमाधाने पुरोगामिनो भूत्वा"वयं राष्ट्रे जागृयाम पुरोहिताः"[७] इत्युद्घोषं सफली करवामः ।

---

१. तदेव,१०.१०७.१० : भोजस्येदं पुष्करिणीव वेश्म ।
२. अथर्व.६.४०;१९.१४.१,१९.१५.१,५-६;१९.१६.१ ।
३. तदेव,१९.१४.१ : असपत्नाः प्रदिशो मे भवन्तु न वै त्वां द्विष्मो अभयं बोद्धास्तु ।
४. तदेव,१९.१५.५-६ ।
५. यजु.,३२.८ : यत्र विश्वं भवत्येकनीडम् ।
६. अथर्व.२.१.१ : यत्र विश्वं भवत्येकरूपम् । एवम् ऋ.,८.५८.२ : एकं वा इदं वि बभूव सर्वम् ।
७. वाजसनेयि संहिता,९.२३ ।

श्रीः संस्कृतव्याकरणे सम्भावितशोधसरणिः

प्रो. आजादमिश्रः

अद्यत्वे प्रणीयमानेषु शोधग्रन्थेषु केचन विषयविवेचनपराः, अपरे साम्यवैषम्यनिरूपकाः, अन्ये विकीर्ण-विषयसंग्रहकाश्च शोधग्रन्थाः प्रायः प्रस्तूयन्ते। व्याकरणे पुनः प्रकाशिता प्रकाशितपाणिनीयव्याख्याग्रन्थस्य तुलनात्मकमध्ययनम्, तेषां वैशिष्ट्यख्यापनम्, विकीर्णतथ्यसंकलनम्, पाणिनीयेतरव्याकरणग्रन्थैः सह समीक्षणं वा अधिकृत्य प्रायोऽनुसन्धित्सवः शोधकर्मणि प्रवर्तन्ते। तदेतत्सर्वमनुसन्धानमस्ति आवश्यकं समुपयोगि । परमेनाम् आवश्यकतामुपयोगितां च विस्तारयितुम् अभिनवायामे तामवतारयितुम् आधुनिकसन्दर्भेण सह योजयितुं च व्याकरणशोधस्य क्षेत्रान्तराण्यपि आश्रयणीयानीति प्रासङ्गिकोऽयं विचारः।

इदमवधेयम्—संस्कृतव्याकरणस्य धातुपाठः गणपाठः खिलपाठः वाक्यपाठः लिङ्गानुशासनं चेत्यङ्गानि व्याकरणग्रन्थेषु पाणिनीय-चान्द्र-जैनेन्द्र-काशकृत्स्न-कातन्त्र-शाकटायन-हैम-कविकल्पद्रुमादिषु सन्ति निरूपितानि। तत्र सर्वेषु धातुपाठः प्रधानः, शब्दशरीरे धातोः प्राधान्यात्। दधाति नामरूपं चेति धातुः। स एव निरुक्ते आख्यातपदेन व्यपदिष्टः 'नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च' इति। महाभाष्येऽपि 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्(३.३.१) इति प्रोक्तम्। भाषोत्पत्तौ धातुवादगोऽपि कश्चिदन्यतमः पक्षो भाषानये। क्रियाप्रधानं वाक्यमिति लोके, व्यापारमुख्यविशेष्यकः शाब्दबोध इति व्याकरणदर्शने, विधेयस्यापूर्वस्य क्रियारूपत्वं क्रियायाश्च धातुवाच्यत्वमित्येतत्सर्वं वक्तव्यं धातोः प्राधान्यं स्मारयति।

धातुपाठेषु प्रायः द्विसहस्रं धातवः सन्ति परिगणिताः, तत्र तेषामर्थादिवैशिष्ट्यमपि निर्दिष्टम्। तत्र निर्दिष्टानां बहूनां समानार्थानां धातूनां सूक्ष्मार्थानुसन्धानम्, एकार्थे निर्दिष्टानां धातूनामनेकार्थावधारणं प्रयोगपुरस्कारेण विधेयम्।

जानन्ति भवन्तः, गत्यर्थे प्रायः चत्वारि शतानि धातवः सन्ति निर्दिष्टाः। एवमेव शब्दे भाषायां भासने हिंसायामपि शताधिकाः धातवः दृश्यन्ते। समानार्थेष्वपि तेषु मिथः सूक्ष्मो भेदः वैशिष्ट्यं चावश्यं विद्यते। तच्च वैशिष्ट्यं प्रयोगद्वारैवावगच्छेत्। न हि 'देवदत्तो गच्छति' इत्यर्थे सरति अकति चकति प्लवते वेत्यादि प्रयोक्तव्यम्। गतिस्तु सर्वत्र भवति-धावति भ्रमति उपविशति तरति उड्डयते इत्यादिषु बहुविधा गतिः। तत्र-तत्र प्रयोगेणैव तासां मिथो भेदो विभाव्यते। तदुक्तं भाष्यकारेण-न हि गोधा: सर्पन्ति, सर्पणादहिर्भवति-इति। [किञ्च 'गत्यर्थाः' ज्ञानार्थाः' इत्यप्याचार्यैरुक्तम्। तत्रापि विमर्शनीयम्, गत्यर्थेषु के के धातव उपसर्गवलात् केवला वा ज्ञानार्थं प्रकटयन्ति इति। तदिह एकैकं धातुमाश्रित्य आप्तप्रयोगद्वारा कृतमर्थविश्लेषणं भाषा सम्बन्धं विस्तारक्षेत्रं

चावगमयेत्। यथा—'अकति मन्दाकिनी, चकति मन्दाकिनी' इत्युभयत्रापि वाक्ययोः उपात्तौ अक चक धातू गत्यर्थकौ। तत्र मन्दाकिनीजलस्य आवर्तं प्रकटयितुम् 'अकति' इति तथा तस्य उच्छलनं बोधयितुं चकतीति प्रयुक्तम्। एवमेव 'ढौकते लङ्घते लिङ्गति ध्वजति व्रजति शलति अञ्चति चञ्चति खेलति सवति चलति स्पन्दते प्लवते श्वयते रणति फणति' इत्यादयः प्रायः विशिष्टगति क्रियामेव प्रयुज्यन्ते। [तत्र केचन केवलं नामशब्देषु केचित्तु केवलं क्षेत्रीयभाषास्वेव व्यवह्रियन्ते। यथा—'लोलिता वसुधा सर्वा न च पश्यामि जानकीम्' इति रामायणसुन्दरकाण्डवाक्ये 'लोलिता' इत्यत्र क्तानतो लोल् धातुः गुप्तागारान्वेषणे प्रयुक्तः। अस्माद् धातोर्निष्पन्नः लोलः = चञ्चलः इति विशेषण शब्दः लोलार्ककुण्डम् इत्यादिषु दृष्टः, परमयं धातुः पाणिनीयधातुपाठे न दृश्यते। तत्स्थाने उलयोरभेदात् लोडृ = लोडति इति धातुपाठः। तस्य 'आलोडति = हिण्डति जलम्, विलोडति दधि' इत्यादि रूपं प्रसिद्धम्। किञ्चेह समानेऽप्यर्थे लोलति लोडति मृगयते अन्वेषयति गवेषयति इत्यादि प्रयोगेषु स्थानप्रकारादिकृद्वैशिष्ट्यमपि विभावनीयम्। एवम् मन्दगतौ मन्दते इत्यस्य प्रयोगः 'मन्दं मन्दं नुदति पवनः' इत्यादौ क्रियाविशेषणे दृष्टः, न तु तिङन्ते।

केचन अप्रयुक्ता धातवः पुनः क्षेत्रीयभाषामात्रगोचराः सन्ति। यथा—तडागे ब्रूडति इति प्रयोगः 'बूड़ऽता' इति भोजपुर्याम्, हिन्द्यां तु वर्णव्यत्ययेन 'डूबना' इति। स्पन्दते पुनः स्पन्दति ततः फन्दति इति प्राकृते ततः फाँदना-कूदना इति भाषाविभाषासु ज्ञेयम्। एवञ्च समानार्थे निर्दिष्टानां धातूनाम् एकैकशोऽध्ययनं क्षेत्रीयभाषा सहकारेणावश्यकम्।

किञ्च एकार्थत्वेऽपि धातूनां नानार्थकत्वं सर्वै वैयाकरणैरङ्गीक्रियते। अतो धात्वर्थनिर्देशस्तेषामुपलक्षणमवगन्तव्यम्। तदुक्तं साथणेन माधवीयधातुवृत्तौ-उपलक्षणमर्थनिर्देशः-इति। तद्यथा सत्तातिरिक्तार्थे भूधातोः प्रयोगः-हिमवतो गङ्गा प्रभवति, मल्लो मल्लाय प्रभवति, ग्रामस्य प्रभवति, परान् पराभवति, इदमेव सम्भवति, स्थाली तण्डुलान् सम्भवति, शममनुभवति—इत्यादौ निस्सरणपर्याप्त्यैश्वर्याभिभवोत्प्रेक्षान्तर्भावनसंवेदनादीनामवगमात्। तदुक्तं चान्द्रे—

क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः।
प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः॥ इति।

प्रहाराहारसंहारविहारपरिहारादिषु उपसर्गवशादर्थभेदेऽपि तेऽर्थाः सर्वे धातोरेव, उपसर्गास्तु तेषां द्योतकाः, अत एव कर्मणि लकारो व्यवस्थीयेत इति वैयाकरणकृतान्तः।

अस्यां दिशि धातूनधिकृत्य अल्पमेव शोधकार्यं प्रकाशितम्। तद्यथा—डॉ. भगीरथप्रसादत्रिपाठिनः पाणिनीयधातुपाठसमीक्षा तथा धात्वर्थविज्ञानम्, श्रीचारुदेवशास्त्रिणः पाणिनीये धातुपाठेऽर्थनिर्देशः, श्रीयुधिष्ठिर मीमांसकस्य काशकृत्स्नधातुव्याख्यानम्, श्री जी.बी.पल्सुलेमहाशयस्य द संस्कृत धातुपाठाज्-ए क्रिटिकल स्टडी, श्रीशचन्द्रचक्रवर्तिनोधातुप्रदीपः, हिटनीमहोदयस्य रुट्स बर्क-फार्म्स एण्ड प्राइमरी डैरिवेटिब्स, डॉ. माया ए. चैनानमहोदयायाः धातुपाठों में अर्थनिर्देश-इत्यादि प्रमुखाः शोधप्रबन्धाः सन्ति प्रकाशिताः। एतेषु सर्वेषु पुस्तकेषु परिगणिता एव धातवो विमर्शकोटिमाटीकिताः। तत्रोदाहरणान्यप्यल्पान्येव प्रमुखग्रन्थेभ्य उद्धृतानि। किञ्चात्र

अपरामृष्टा एव अधिका धातवः । परं मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्माकं गतिं सततं प्रवर्तयितुं दिङ्निर्देशाय एते शोध-ग्रन्थाः प्रभवन्तीति नूनमवधेयास्ते ।

अपि चेदानीं व्याकरणदृशा साहित्यग्रन्थानां पुराणानां चाध्ययनं प्रवर्तते, परं तत्र केवला सुबन्तादिपदानां रूपसिद्धौ, प्रकृतिप्रत्ययप्रदर्शने, अर्थनिरूपणे वा औपचारिकता वराकी नयनपथगोचरी भवति; प्रयोगस्थ गङ्गानाथ-झाकेन्द्रीयसंस्कृतविद्यापीठस्य भाषानुभागे संस्कृतमूलकानां समानार्थध्वनिकानां पञ्जाबी-संस्कृत शब्दानांशब्द-कोशोऽस्माभिः संकलितः प्रकाशितश्च । तत्र हि द्वादशसहस्राणि शब्दाः सन्ति संकलिताः । तानाधृत्य पञ्जाबी क्षेत्रस्य कृते पाठ्यपुस्तकमपि निर्मितम्, परं तत्प्रकाशितं न वेति न जाने । प्रकाशितमपि तत् तस्मिन् क्षेत्रे विद्यालयेषु पाठयेत् इत्येतदर्थं महान् प्रयासो विधेयः, अन्यथा तत्सर्वमपि कार्यं व्ययं च निरुद्देश्यं निरर्थकं स्यात् ।

पञ्जाबीशब्दसंकलनकालेऽनुभूतं यदस्यां भाषायं संस्कृतोद्भवशब्दानामाधिक्यम् किं वा प्रायः सर्वे तद्भवा एव अत एवेयं संस्कृतेन साक्षात्संबद्धा समीपतमा च । पश्यन्तु तावदङ्गवाचकान् शब्दान्-हस्त-हत्थ-हाथ, अक्षि-अक्ख-आँख, कर्ण-कन्न-कान, मस्तक-मत्था-माथा, इत्यादि । अनेन स्पष्टम्, हिन्दी शब्दाः पञ्जाबीशब्दात्प-रभूता सन्तीति ।

अध्ययनेन ईदृशेन ध्वनिपरिवर्तनस्यानेके व्यापकाः सूक्ष्माश्च नियमाः परिस्फुरन्ति । यथा पञ्जाबी-भाषायां संयुक्तादौ सकारलोपः—

स्तम्भ-थम्भ, स्तन-थन, स्थान-थान, स्थाल-थाल, स्थाप-थाप, स्थापना-थप्पणा, ष्ठीवन-थूकना, स्फोटन-फोड़ना, स्फुण्टन-फूटना, स्थिर-थिर, अस्थाघ-अथाह, अस्फरति-अफ्फर्ना

अपि च इत्थंविधेनाध्ययनेन संस्कृतस्याप्रसिद्धाः कठिनाः शब्दा अपि सरला भविष्यन्ति, क्षेत्रभाषासु तेषां सुप्रसिद्धत्वात् । तद्यथा—उदरं मे आस्फरति, कूपोऽयमस्थाघः इत्यादौ । एवमेव जूड़ी-ताप इति प्राच्येषु प्रसिद्धम्, अस्य संस्कृतं जूर्तिः तापः इति अप्रसिद्धम्, जीमणा इति प्रसिद्धम्, जेमति इत्यप्रसिद्धम्, सुकड़ना इति प्रसिद्धम्, स्वर्दते इत्यप्रसिद्धम् इत्यादि ।

अत्रेदमवधेयम्-पुरा सर्वास्वपि क्षेत्रभाषासु संस्कृतशब्दानां तदुद्भवानां च प्रयोगबाहुल्यमासीति, संस्कृ-तस्य व्यवहारेण प्रभावाधिक्यात् । तदनन्तरं तत्र-तत्र अरबी-फारसी सम्पर्कात् तासां शब्दानामपि सन्निवेशः जातः । ततः परम् अंग्रेजीशासने तच्छब्दानामपि प्रयोगः प्रचलितः । तत्र यदि पुनः संस्कृतं प्रभूतं प्रभवेत्तर्हि क्षेत्रियभाषाणां तत्प्राचीनं रूपं पुनः व्यवहरेत्, श्रीगुरुग्रन्थस्य प्राचीना पञ्जाबी पुनः जिह्वाग्रे नरीनृत्येत ।

तदित्थं सर्वासां क्षेत्रीयभाषाविभाषाणां संस्कृतभाषादृशा अङ्गशः सूक्ष्मं गभीरं च शोधकार्यं विधातव्यम् । वाक्यरचनायां समासेऽव्यये विशेषणे च विद्यमानः स प्रभाव आमूलं प्रोद्भावनीयः, नाम्नि क्रियायां च स विशदं विवेचनीयः, ततः शब्द संकलनन्तु परमावश्यकम् । तदनन्तरं तत्तत्क्षेत्रविशेषस्य कृते तच्छब्दादिप्रभावाधारेण पाठ्यपुस्तकनिर्माणं तत्रत्येषु विद्यालयेषु तस्य प्रवर्तनं च लाभाय भवेत् । एवं रीत्या संस्कृतस्य क्षेत्रीय शब्दकोशेषु संकलितेषु सत्सु ततः केन्द्रीयशब्दादिकोशोऽपि शक्यनिर्माणः, तदाधारेण केन्द्रीयं पाठ्यपुस्तकमपि सूपपादितं सत् सोद्देश्यं प्रभवेत् ।

इदमप्यवधेयम्-इत्थंविधस्य शोधकार्यस्य अपरं फलं हिन्दीभाषायामानकं रूपमपि व्यवस्थीयेत। इदानीमपि अस्या मानकरूपं नैव सुस्पष्टम्। अत एव अस्याः प्रयोगकाले दाक्षिणात्याः पौरस्त्या वा जनाः सन्दिहन्ति-हिन्दीवाक्ये स्वक्षेत्रीयशब्दः संस्कृतमूलोऽपि कदाचित् मुखतो निर्गच्छेत्तदा हिन्दीक्षेत्रे उपहासाय भवेत्-इति धिया संस्कृतोद्भवमपि शब्दं न प्रयुञ्जते। किञ्च बङ्गमहाराष्ट्रादित्यव्यवहृतां संस्कृतनिष्ठां हिन्दीमाकर्ण्य औदीच्या अपि केचन तां भ्रूनासिकासंकोचं शृण्वन्ति, तां 'संस्कृताइज हिन्दीति वदन्ति। अपि च प्रचरत्सु संस्कृतस्य क्षेत्रीय केन्द्रीय कोशेषु सत्सु प्रवर्धमानम् उच्चारणवैषम्यमपि अल्पं घटेत।

तदस्यां शोधसरणौ अनुगन्तारः अनुसन्धातारो नूनं संस्कृतं प्रचारयिष्यन्ति, व्याकरणस्य व्यावहारिकं पक्षं समेधयिष्यन्ति, तं सफलं प्रकाशयिष्यन्ति, स्वानुभूतं मौलिकं चिन्तनं च चर्चयिष्यन्ति। अवश्यमनेन शोधकार्येण चिरपुराणी भारतभारती सुप्रतिष्ठिता वरदा च भूयादिति शम्।

भाषिक-स्वर-समीक्षणम्

डॉ. पातञ्जलिमिश्रः

१. उपक्रमः

अस्माकं शोधपत्रस्य विषयः भाषिकस्वरसमीक्षणमस्ति । अत्रावधेयम्-**सर्वज्ञानमयो वेदः, वेदोऽखिलो-धर्ममूलम् इष्टावाप्त्यनिष्टपरिहारद्वाराभीष्टं वेदयति यः स वेद** इत्यादिभिर्बहुचर्चितो वेदः सर्वज्ञानमूलभूतोऽस्ति । स च **मन्त्रब्राह्मणयोर्वेदनामधेयमित्यापस्तम्बवचनात्** विविधशाखावच्छिन्नः मन्त्रात्मकः ब्राह्मणात्मकश्चेति । तद-र्थावबोधाय स्वराणां महत्त्वं सर्वविदितमस्ति । तानभिलक्ष्य बह्व्यः स्वरप्रक्रियाः सन्ति । तासु त्रैस्वर्यप्रक्रिया भाषिकस्वरप्रक्रिया च मुख्या अस्ति । त्रैस्वर्यप्रक्रियामामुदात्तानुदात्तस्वरितरूपाः त्रयः स्वराः मुख्याः भवन्ति । भाषिकस्वरप्रक्रियायामुदात्तानुदात्तौ द्वौ स्वरौ मुख्यौ स्तः । अस्यां स्वरितस्वराभावो भवति । उदात्तानुदात्तयोः समवेतप्रयोगसम्बद्धा स्वरप्रक्रिया भाषिकस्वरप्रक्रियात्वेनात्र विवक्षिता ।

२. भाषिकस्वरप्रकृतिः

यथा त्रैस्वर्ये-उदात्तस्य **'उच्चैरुदात्त'**[१] इत्यादि निर्देशात् ताल्वादिषु सभागेषु भागत्रयकल्पेषु स्थानेषूर्ध्व-भागे निष्पन्नोऽजुदात्तसंज्ञो भवति । यथा च अनुदात्तस्य– **'नीचैरनुदात्तः'**[२] इत्यादि निर्देशात् ताल्वादिषु सभागेषु भागत्रयकल्पेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञो भवति इति लभ्यते, भाषिकस्वरेऽपि उदात्तानुदात्तयोः प्रकृतिः समाना भवति ।

इयं स्वरप्रक्रिया शतपथब्रह्मणार्थज्ञानाय परिधिभूता, न स्वतन्त्रा अपितु त्रैस्वर्यमूला अस्ति ।

३. भाषिकसंज्ञाविधानम्

(१) **उदात्तानुदात्तौ भाषिकस्तत्सन्धिः**[३] - अर्थात् उदात्तानुदात्तयोः सन्धौ सन्धिजस्याचः भाषिकसंज्ञा भवति; यथा —

---

१. पा.सू.

२. पा.सू.

३. भा.सू./१/५ ।

ब्रा: — भासा + अन्तरिक्षम् = 'भासाऽन्तरिक्षम्'[१]

इत्यत्र 'सा'वर्ती आकार: अनुदात्त:,

अन्तरिक्षमित्यत्र प्रथमाकार: अनुदात्त: । उभयो: सन्धौ 'सा' वर्णगत आकार: भाषिकसंज्ञको भवति ।

(२) **"अनुदात्तावन्तेरणोदात्त:"**[२] — अर्थात् अनुदात्तोदात्तयो: सन्धौ सन्धिजस्याच: भाषिकसंज्ञा भवति; यथा —

ब्रा. — 'उद्दिवँ स्तमानाऽन्तरिक्षम्'[३]

इत्यत्र 'ना' वर्णगत आकार: भाषिकसंज्ञक: ।

(३) **'जात्याभिनिहितक्षैप्रप्रश्लिष्टाश्च'**[४] —अर्थात् जात्य-अभिनिहित-क्षैप्र-प्रश्लिष्ट-स्वरितविशिष्टानामचां भाषिकसंज्ञा भवति; यथा —

ब्रा. — i. जात्यस्य — 'धान्यमसि' ।[५]

ii. अभिनिहितस्य — प्रसवेऽश्विनो: ।[६]

iii. क्षेप्रस्व — अस्ति । त्र्यम्बकम् ।[७]

iv. प्रश्लिष्टस्व — 'अभीन्धताम्' ।[८]

एषु उदाहरणेषु क्रमश: 'न्य' 'वे' 'त्य' 'भी' वर्णगतानामचां भाषिकसंज्ञा भवति ।

(४) **"उतो यो मो नो सो च"** ।[९] — अर्थात् 'उतो' 'यो' 'मो' 'नो' 'सो' गतानामोकाराणां भाषिकसंज्ञा भवति; यथा —

i. मं. — उतो त ।[१०]

ब्रा. — त्युतो त ।[११]

---

१. शब्रा/९/२/३/३८ ।
२. भासू./१/६ ।
३. शब्रा./३/६/१/१५ ।
४. भासू./१/९ ।
५. शब्रा./१/२/१/१८ ।
६. शब्रा./१/१/२/१७ ।
७. शब्रा./२/६/२/१४ ।
८. शब्रा./६/५/४/५ ।
९. भासू./१/१० ।
१०. वासं./१६/१ ।
११. शब्रा./९/१/१/१४ ।

ii. मं. — मयि यो मम ।[१]

ब्रा. — मयि यो मम ।[२]

iii. मं. — मो षू णः ।[३]

ब्रा. — मो षू णः ।[४]

iv ब्रा.[५] — च नोऽ एव ।[६]

v. ब्रा.[७] वत् । सोऽएव ।[८]

(५) **ओ चैकेषाम् ।**[९] — अर्थात् एकेषां मतेन स्वतन्त्रस्योकारस्य भाषिकसंज्ञा भवति; यथा —

ब्रा. — बोधयतातिथिमोऽस्मिन् ।[१०]

अत्र 'मो' गत ओकारः भाषिकसंज्ञको भवति ।

४. भाषिकसंज्ञापवादः

भाषिकसंज्ञापवादभूताः तत्र त्रयः निर्देशाः सन्ति ।

(१) **— 'आप्रपूर्व आख्यात परो न ।'**[११] — अर्थात् स्वतन्त्रतया 'आ' 'प्र' एतौ उपसर्गौ स्तः । अनयोचां परेण आख्यागत नाचा सह सन्धौ सत्यां सन्धिजस्याचः भाषिकसंज्ञा न भवति; यथा —

ब्रा. — (क) आ+अप्रा = 'आप्रा'[१२]

(ख) प्र+उक्षामि = 'प्रोक्षामि'[१३]

१. वा.सं./५/६ ।
२. श.ब्रा./३/४/३/९
३. वा.सं./३/४६ ।
४. श.ब्रा.१२/५/२/२८ ।
५. श.ब्रा./४/१/४/५ ।
६. श.ब्रा./४/१/४/५ ।
७. मन्त्रोदाहरणस्याभावः ।
८. श.ब्रा./४/१/४/५ ।
९. भा.सू./१/१२ ।
१०. श.ब्रा./६/८/१/६ ।
११. भा.सू./१/१२ ।
१२. श.ब्रा./४/३/४/१० ।
१३. श.ब्रा./१/१/३/११ ।

उभयत्र क्रमशः 'आ' इत्यस्य 'प्रो' गतस्य ओकारस्य च भाषिकसंज्ञा प्राप्ता, किन्तु तस्या अनेन शास्त्रेण निषेधः ।

(२) —**'समासश्चाख्यातपरो न'**।[१] । अर्थात् आख्यातभिन्नशब्देन 'आ' 'प्र' इत्यनो उपसर्गयोः समासे जाते सन्धिजस्याचः भाषिकसंज्ञा न भवति; यथा —

ब्रा. (क) आ+इष्टा = 'एष्टा' ।[२]

इत्यत्र एकारः

(ख) प्र+इत्या = 'प्रत्या' ।[३]

इत्यत्राप्येकारः भाषिकसंज्ञको न भवति ।

(३) **"अपूर्वश्च समासो नैव ।"**[४] अर्थात् 'अ' पूर्वसमासस्थलेऽपि भाषिकसंज्ञायाः निषेधो भवति; यथा—

ब्रा. (क) विश्व + आयु = 'विश्वायुः'[५]

इत्यत्र आकारः

(ख) शत+आयुषम् = छतायुषम् ।[६] इत्यत्राऽपि आकारः भाषिकसंज्ञको न भवति ।

५. भाषिकस्वरसम्बद्धा स्वराः

(१) उदात्तः

"भाषिकसंज्ञकस्य उदात्तस्वरत्वम्"—येषामचां भाषिकसंज्ञा भवति तेषामुदात्तस्वरत्वं भवति; यथा —

i. **'उदात्तमेतत्'**[७] अर्थात् भाषिकसंज्ञकस्य वर्णस्य उदात्तस्वरत्वं भवति; यथा —

मं. — 'चित्रामाहम्' ।[८]

ब्रा. — चित्रामाहम् ।[९]

१. भा.सू./१/८ ।
२. श.ब्रा./३/४/३/२१
३. श.ब्रा./८/१/४/८
४. भा.सू./१/९ ।
५. श.ब्रा./१४/३/१/१८ ।
६. श.ब्रा./८/५/२/१७
७. भा.सू./१/१३ ।
८. वा.सं./१७/७४ ।
९. श.ब्रा./९/२/३/३८ ।

इत्यत्र मकारोत्तरवर्त्याकारः भाषिकसंज्ञको भवति । अतस्तस्य उदात्तत्वमपि भवति ।

ii. **'स्वरितानुदात्तौ च'**।[१] अर्थात् मन्त्रभागगतानां स्वरितानुदात्तानां प्रथमं भाषिकसंज्ञा भवति । ततः परं तयोरुदात्तत्वञ्च भवति; यथा —

स्वरितस्योदाहरणम् —

मं. — 'अक्रन्कर्म' ।[२]

ब्रा. — 'अक्रन्कर्म' ।[३]

इत्यत्र स्वरितस्वरविशिष्टमकाराकारस्य भाषिकसंज्ञा भवति तस्य उदात्तत्वं च भवति ।

एवमेव अनुदात्तस्योदाहरणम् —

मं. — 'सह वाचा मयोभुवा' ।[४]

ब्रा. — 'सहवाचा मयोभुवा' ।[५]

इत्यत्र सकारवाकारयोः अनुदात्तस्वरस्य भाषिकसंज्ञा तस्य उदात्तत्वञ्च भवति ।

iii. **'उदात्तमनुदात्तमनन्त्यम्'**।[६] — अर्थात् मन्त्रभागगतान्त्यात् भिन्नस्थलेषु विद्यमानानामनुदात्तानां शतपथे भाषिकसंज्ञापुरस्सरमुदात्तत्वं भवति ।(यथा — मं. — 'इडे रन्ते हव्ये काम्ये चन्द्रे' ।[७])

ब्रा. — 'इडेरन्तेहव्ये काम्ये चन्द्रे' ।[८]

इत्यस्मिन् मन्त्रांशे 'डे''न्ते' 'व्ये' 'म्ये' 'न्द्रे' इत्यत्र विद्यमानानामनुदात्तानां शतपथे भाषिकसंज्ञापुरस्सरमुदात्तत्वं भवति ।

(२) अनुदात्तः

"भाषिकसंज्ञासम्बद्धमनुदात्तत्वम्"—

तत्र i. (क) **'भाषिके चोभयेषाम्'**।[९]

---

१. भा.सू./१/१४ ।
२. वा.सं./३/४७ ।
३. श.ब्रा./२/५/२/२९
४. वा.सं./३/४७ ।
५. श.ब्रा./२/५/२/२९ ।
६. भा.सू./१/१५ ।
७. वा.सं./८/४३
८. श.ब्रा./४/५/८/१० ।
९. भा.सू./१७/७४ ।

(ख) **'एकस्यापि'**।[१]

भाषिकसंज्ञके वर्णे परे पूर्ववर्तिमन्त्रभागगतोदात्तानुदात्तस्वरितानामनुदात्तत्वमेव भवति; यथा —

उदात्तस्योदाहरणम् — मं.- चित्रामाहम् ।[२]

ब्रा. — 'चित्रामाहम्' ।[३]

इत्यत्र मागत आकारः भाषिकसंज्ञकः तत्पूर्ववर्ती 'त्रा' गत आकारः अनुदात्तत्वं भजते ।

अनुदात्तस्योदाहरणम् —

मं. — 'धान्यमसि' ।[४]

ब्रा. — 'धान्यमसि' ।[५]

इत्यत्र 'न्य' गताऽकारो भाषिकसंज्ञकः तत्पूर्ववर्ती धागत अनुदात्त आकारोऽनुदात्तत्वमेव भजते ।

स्वरितस्योदाहरणम् —

मं. — 'भूत्यै येदम्' ।[६]

ब्रा. — भूत्यै येदम् ।[७]

इत्यत्र येगत एकार भाषिकसंज्ञकः, तत्पूर्ववर्ती 'त्यै' गतस्य अचः स्वरितमस्ति तस्यापि अनुदात्तत्वं भवति ।

ii **'अन्त्य संहितानाम्'**।[८]

मन्त्रभागे एकत्र समवेतानामुदात्तानामन्तिमुदात्तमनुदात्तं भवति; यथा —

मं. — 'आ ब्रह्मन्' ।[९]

ब्रा. — 'आ ब्रह्मन्' ।[१०]

१. भा.सू./१/१८ ।
२. वा.सं./१७/७४ ।
३. श.ब्रा./९/२/३/३८ ।
४. वा.सं./१/२० ।
५. श.ब्रा./१/२/१/१८ ।
६. वा.स./१२/६५ ।
७. श.ब्रा./७/२/१/१७ ।
८. भा.सू./१/६ ।
९. वा.सं./२२/२२ ।
१०. श.ब्रा./१३/१/९/१ ।

इत्यत्र 'आ''ब्र' इत्यनयोरुदात्तस्वरोऽस्ति द्वान्तिमस्योदात्तधर्मविशिष्टस्य 'ब्र' गतस्य अकास्य अनुदात्तत्वं भवति ।

(३) कम्पनम्

'कम्पनं नाम अनुदात्ततरस्वरत्वम्'— अर्थात्, अनुदात्तादप्यनुदात्तत्वम् । तथा चोक्तमनन्तदेवेन— ।[१]

तत्र – अनुदात्तपूर्वस्याव्यवहितस्य अनुदात्तस्य कम्पनम् अर्थात्, भाषिकसंज्ञके वर्णे परे तत्पूर्ववर्ति अव्यवहितस्यान्यस्य स्वरस्य कम्पनं, अनाम अनुदात्ततरत्वं भवति ।

यथा — ब्रा. (क) 'यदैवोदेत्यथ वसन्तः' ।[२]

(ख) अद्धा हि तद्यन्मन्त्रोऽद्धोतद्यदात्मा ।[३]

इत्यत्र यकाराकारः अनुदात्तः, वोगत ओकारः भाषिकसंज्ञक अतः तत्पूर्ववर्ती "दै" गत ऐकारः कम्पनस्वरत्वं भजते । एवमेव उदात्तपूर्वाव्यवहितस्य अनुदात्तस्य स्वरितस्य च कम्पनत्वम् ।

६. त्रैस्वर्यतो भाषिकस्वरविपरिणामः

भाषिकस्वरनिर्धारणस्य स्वतन्त्रा प्रक्रिया अस्ति । यामनुगन्तुं शतपथब्राह्मणस्य कस्याप्यंशस्य स्वरनिर्धारणविधौ निम्नलिखितानां तथ्यानामुपयोगोऽवगन्तव्यः ।

(१) मूलपाठपदच्छेदौ

सर्वप्रथमं मन्त्रभागस्य ब्राह्मणभागस्य च पदच्छेदपुरस्सरं मूलपाठसङ्ग्रहोऽपेक्ष्यते । अनेन मन्त्रब्राह्मणयोः पदस्वरूपस्पष्टीकरणं भवति ।

(२) पदसिद्धिपुरस्स त्रैस्वरं निर्धारणम् —

ब्राह्मणांशे समवेतानां मन्त्रब्राह्मणयोः पदानां प्रकृतिप्रत्ययावधारणपुरस्सरं पदसिद्धिः कर्तव्या, ततः परं त्रैस्वर्यप्रक्रियानुसारं पदसाधुत्वानुरूपं मुख्यस्वरनिर्धारणं विधेयम्, ततः परं स्वरतारतम्यार्थमपेक्षानुसारमुदात्तादीनां निर्धारणं कर्तव्यम् ।

(३) उदात्तादिस्वरविशिष्टपदानां संयोजनं तदनुकूलं भाषिकस्वरविपरिणामश्च —

पदेषु त्रैस्वर्यनिर्धारणानन्तरमेकैकस्य परस्परं संयोगः कर्तव्यः तदनुरूपमेव भाषिकस्वरप्रक्रियायाः नियमानुकूलं स्वराणामपि विपरिणमः कर्तव्यः ।

अत्र विश्लेषणात्मकमुदाहरणम् —

---

१. (क) भा.सू. अनन्तदेवभाष्ये /१/१९/ (ख) भा.सू. अनन्तदेवभाष्ये /१/२१ ।

२. श.ब्रा./२/२/३/९ ।

३. श.ब्रा./२/३/१/२९ ।

i. मूलपाठपदच्छेदौ — उपर्युक्ततथ्यविश्लेषणाय मन्त्रांशो ब्राह्मणांशश्च उपस्थाप्येते —

मन्त्रो यथा —

मूलपाठः — अग्निर्ज्योतिर्ज्योतिः[१]

पदपाठः — अग्निः । ज्योतिः । ज्योतिः ।[२]

ब्राह्मणे यथा —

मूलपाठः — अग्निर्ज्योतिर्ज्योतिः[३]

पदच्छेदः — अग्निः । ज्योतिः । ज्योतिः ।

एवं प्रस्तुतांशे द्वे पदेस्तः । द्वितीयस्य द्विरावृत्तिः । मिलित्वा त्रीणि पदानि सन्ति ।

ii. पदसिद्धिः त्रैस्वर्यनिर्धारणञ्च

(क) अग्निः

इत्यत्र पदसिद्धिः —

गत्यर्थकाद् अगि धातोः[४] अनुबन्धलोपे, 'इदितो नुम् धातोः' इति नुमि (न्) अङ्गेर्नलोपश्च[५]इति 'नि' प्रत्यये, नकारलोपे, विभक्तिकार्ये प्रथमैकवचने 'अग्निः' इति सिद्धं भवति ।

तत्र स्वरनिर्धारणम् —

धातोः[६] इति धातुगतस्य अकारस्योदात्तत्वम् **आद्युदात्तश्चेति**[७] 'नि' प्रत्ययगतस्य इकारस्य उदात्तत्वं सति शिष्टस्वरनियमेन[८] **अनुदात्तं पदमेकवर्जमिति**[९] सूत्रद्वारा 'नि' प्रत्ययगत इकारस्यैव उदात्तत्वम् । एकञ्च अग्निः इति पदमन्तोदात्तं भवति ।

(ख) ज्योतिः

इत्यत्र पदसिद्धिः—

१. वा.सं./३/९ ।
२. वा.सं.(पदपाठः)/३/९ ।
३. श.ब्रा./२/३/१/३२ ।
४. भ्वा.प.से./१४६ ।
५. उ.सू./८९० ।
६. पा.सू.१३/१/९१ ।
७. पा.सू.१३/१/३ ।
८. पा.३७३०
९. पा.सू./६/१/१५८ ।

दीप्त्यर्थक द्युत्[१] धातो **'द्युतेरिसन्नादेश्च जः'**[२] इत्युणादिसूत्रेण इसन् (इस) प्रत्यये, दकारस्य जकारे, विभक्तिकार्ये प्रथमैकवचने 'ज्योतिः' पदं सिद्धं भवति ।

तत्र स्वरनिर्धारणम् —

धातोः[३] इति सूत्रेण द्युगतस्य उकारस्य उदात्तत्वम् **आद्युदात्तश्चेति**[४] सूत्रेण, इस् प्रत्ययस्य इकारस्य उदात्तत्वम्, प्रकृतिप्रत्ययसमुदायरूपज्योतिश्शब्दस्य 'नित्' प्रत्ययान्तत्वात् **'ञ्नित्यादिर्नित्यम्'**[५] इत्यनेन आद्युदात्तत्वम् भवति ।

एवं अग्निर्ज्योतिर्ज्योतिः इत्यत्र भाषिकस्वरविपरिणामविधौ अग्निपदगतस्य अनुदात्ताकारस्य तथा ज्योतिः पदगतस्य तिरगतस्य अनुदात्तस्य इकारस्य **'स्वरितानुदात्तौ च'**[६] इति सूत्रेण शतपथब्राह्मणे उदात्तत्वं भवति । तथा 'ज्यो' गतस्य उदात्तस्याचः **'उदात्तमनुदात्तमनन्त्यमिति'**[७] भाषिकसूत्रेण अनुदात्तस्वरत्वं भवति । एवमेव द्वितीयस्य 'ज्योति' पदस्यापि स्वरनिर्धारणं विधेयम् । एवञ्च अग्निर्ज्योतिर्ज्योतिरित्यत्र 'अ' 'ति' 'ति' गतानामनुदात्तानामचामुदात्तत्वं शेषाणाञ्च अनुदात्तत्वं भवति इति दिक् ।

७. भाषिकस्वराङ्कनं प्रदर्शनञ्च

भाषिकस्वरप्रक्रियायामुदात्तानुदात्तौ द्वावेव स्वरौ स्तः । अनयोः स्वराङ्कनाय मन्त्रभागे अनुदात्तार्थं यथा वर्णस्याध एका सरला रेखा (—) दीयते, उदात्तार्थं च स्वरचिह्नाभावः स्वीक्रियते भाषिकस्वरप्रक्रियामपि तथैव स्वराङ्कनं भवति । ब्राह्मणांशपाठावसरे अधोगतेन हस्तसङ्केतेनानुदात्तस्य, ऊर्ध्वगतेन हस्तसङ्केतेन उदात्तस्य प्रदर्शनं भवति ।

८. पाठशैली

मन्त्रभागे त्रैस्वर्यप्रक्रियाया अनुकूलं स्वरनिर्धारणं भवति । शतपथब्राह्मणे भाषिकस्वरप्रक्रियाया अनुकूलं स्वरनिर्धारणं भवति । अतः उभयोः सस्वरपाठविधौ भेदोऽपि स्वाभाविकः । यथा —

मन्त्रपाठः

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।[८] नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिंजग्रभत् ॥

---

१. भ्वा.आ.सं./७४१ ।
२. उ.सू./२६८ ।
३. पा.सू./६/१/१६२ ।
४. पा.सू./३/१/३ ।
५. पा.सू./६/१/१९७ ।
६. भा.सू.१९/१४ ।
७. भा.सू.१९/१५ ।
८. वा.स.१३२/२ ।

ब्राह्मणपाठः

ते होचुः । क्व नु सोऽभूद्यो नइत्यमसक्तेत्ययमास्येऽन्तरिति सोऽयमस्यआङ्गिरसोऽङ्गाना हि रसः ।[१]

९. स्वरभेदेप्यर्थभेदाभावः

अत्रावधेयं पदविशेषे अर्थोद्भाविकाशक्तिः वर्णविशेषे भवति । तत्रैव मुख्यस्य स्वरस्य निर्धारणं भवति । शेषवर्णानामुच्चारणसौकर्यार्थं तदनुरूपं स्वरनिर्धारणं भवति । प्रतिज्ञापूर्वकस्वरपरिवर्तनेन नास्त्यर्थभेदस्यावकाशः । तथा चोक्तं भाषिकसूत्रे कात्यायनेन — **'यथार्थं विपर्ययस्तमिति'**[२]

अतएवमत्रभागापेक्षया ब्राह्मणभागे स्वरपरिवर्तने जातेऽपि नभवत्यर्थपरिवर्तनम् ।

१०. श्रुतिमाधुर्यम्

मन्त्रपाठापेक्षया ब्राह्मणांशपाठे श्रवणे च श्रुतिमाधुर्यमायाति; यथा —

"द्वया ह प्राजापत्या । देवाश्चासुराश्च ततः कानीयसाऽएव देवा ज्यायसा असुरास्त एषु लोकेषवस्पर्द्धन्त ।"[३]

अन्ततः संक्षिप्तेऽस्मिन् भाषिकस्वरसमीक्षणे याः काश्चन त्रुटयः प्रमादेनाज्ञानेन वा संलग्नाः सन्ति ताः क्षन्तव्याहितः पतञ्जलिः ।

---

१. बृहदारण्यक — ९

२. भा.सू. ३/१०

३. भा. सू. ३/१०

त्रैलोक्यज्ञानदो वेदः

डॉ. वीरेन्द्रकुमारमिश्रः

वैदिकवाङ्मये न केवलं यज्ञादीनां वर्णनमेवोपलभ्यतेऽपित्वत्र सर्वेषां मानवानां कृते विश्वबन्धुत्वभावनायाश्चिन्तनं प्रचुरमात्रायां विद्यते। वैदिकानामृषीणां हृदयमतिविशालमस्ति। तेषां हृदये सङ्कीर्णतायै लेशमात्रमपि स्थानं नास्ति। सर्वेषां चिन्तनेषु पूर्णतया औदार्यं दृश्यते। औदार्यस्यास्य कारणं किम्? कथं तेषां मनसि विश्वबन्धुत्वभावनायाः प्रश्नः उपस्थितः? केन कारणेन हितचिन्तनं कृतमेभिः ऋषिभिः? अस्मिन् विषये स्वाभाविकरूपेण जिज्ञासा भवत्येव।

उपर्युक्तप्रश्नानां विषये उत्तरमस्ति यदखिलविश्वमेतत् परब्रह्मणः प्रसूतम्। परमेश्वरस्येयं सृष्टिः। एतस्मादेव कारणात् जीवमात्रं परब्रह्मणोंऽशमात्रमस्ति। सर्वेषां जीवानामन्तःकरणे, हृदयप्रदेशे सर्वसमर्थस्य, सर्वशक्तिसम्पन्नस्य, परमैश्वर्यविभूषितस्य परमेश्वरस्य वासः। अलौकिकमायायाः प्रभावेण तस्य व्याप्तिः सर्वत्र। यथा श्रीमद्भगवद्गीतायामुक्तं स्वयमेव परब्रह्मस्वरूपिणा भगवता श्रीकृष्णेन—

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥"[१]

यदा सर्वेषां भूतानामुत्पत्तिः परब्रह्मणः भवति तदा तेषां सर्वेषां मध्ये बन्धुत्वसम्बन्धस्त्वस्त्येव। एवमृषीणां चिन्तने विश्वबन्धुत्वभावना स्वाभाविक्येव। ऋषिभिः व्यष्टिभावनया प्रार्थना च कृता। तेषां प्रार्थनायां समष्टि भावना पूर्णरूपेण दृश्यते। तस्यां प्रार्थनायां सर्वेषां कल्याणभावना निहितास्ति।

यथोक्तं यजुर्वेदे—

विश्वानि देव सवितुर्दुरितानि परा सुव। यद्भद्रं तन्न आसुव[२]॥

हे सवितृदेव! सर्वाणि पापकर्माणि भवन्तः दूरीकुर्वन्तु। अस्माकं सर्वेषां कृते यत्कल्याणकरमस्ति तदस्मभ्यं देहि।

---

१. श्रीमद्भगवद्गीता—१८.६१
२. यजुर्वेदः ३०.३

न केवलं वैदिकवाङ्मयेऽपितु परवर्तिसाहित्येऽपि कथितं यत्किञ्चिद् आत्मार्थेऽनुकूलं न भवति तदन्ये-षामपिकृते न करणीयम् । यथा—आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।[१]

यजुर्वेदस्य एकस्मिन् मन्त्रे विश्वशान्तिसन्देशः, विश्वबन्धुत्वोत्कृष्टतमा भावना, परस्परं सौहार्दं, साहाय्य-भावना पूर्णतया दृग्गोचरी भवति । यथा—

मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे ।।[२]

अहं मित्रस्य दृष्ट्या सर्वान् प्राणिनः पश्यानि । वयं मित्रस्य दृष्ट्या परस्परं पश्यामः ।

ऋग्वेदस्य विविधस्थलेषु अनेके मन्त्राः एतादृशाः सन्ति येषु विश्वबन्धुत्वभावनाविषयकं चिन्तनं प्राप्यते । स्वार्थसिद्धिं विहाय अन्येषां प्राणिनां हितरक्षणं मनुष्यस्य परमो धर्मः । मनुष्यः मनुष्यं सर्वथा रक्षतु । यथोक्तमृग्वेदेः—

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातुविश्वतः ।। [३]

ऋषीणां प्रार्थनासु सर्वेषां जनानां कल्याणं निहितं वर्तते । ये जनाः तेषां समक्षं सन्ति न वा सन्ति । ये जनाः अतिदूरङ्गताः । तेषां सर्वेषां कृतेऽपि सुमतिप्राप्तये प्रार्थनाक्रियतेऽस्माकमृषिभिः । यथा—

यांश्च पश्यामि यांश्च न तेषु मा सुमतिं कृधि तवेद् विष्णो बहुधा वीर्याणि ।[४]

अथर्ववेदस्य मन्त्रेऽस्मिन् कीदृशी उत्कृष्टतमा भावना दृश्यते । अस्मिन् संसारेऽस्मान् निकषा ये जनाः सन्ति वयं तेषामेव हितचिन्तनं कुर्मः । अस्माकमृषयः विषयेऽस्मिन् अग्रगण्याः सन्ति । ये जनाः ऋषीणां दृष्टिपथे न सन्ति तेषां प्राणिनामपि हितचिन्तनं कुर्वन्ति ऋषयः ।

अखिलविश्वस्य कल्याणकामनया, विश्वबन्धुत्वभावनया, पारस्परिकसद्भावदृष्ट्यैवैकमत्येन स्थातुं भावाः प्रकटिताः ऋग्वेदेऽथर्ववेदे तैत्तिरीयब्राह्मणे च । यथा—

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ।।[५]

---

१. पञ्चतन्त्रे-काकोलकीये शशकपिञ्जल कथा-श्लोकसंख्या-१०२

२. यजुर्वेद ३६-१८

३. ऋग्वेद ६-७५-१४

४. अथर्ववेद—१७-१-७

५. ऋग्वेदः—१-१९१.२; "सं जानीध्वं. सं पृच्यध्वं सं वो मनांसि जानताम् देवा भागं...उपासते ॥ अथर्ववेदः ६.६४.१ तैत्तिरीयब्राह्मणनाम्—२.४.४.४"

हे जनाः ! यथा सर्वदा दिव्यशक्तिसम्पन्नाः देवाः परस्परं विरोधं विहाय ऐकमत्येन स्वहविर्भागं स्वीकुर्वन्ति तथैव भवन्तः सर्वे भेदभावं परित्यज्य सहैव सम्मिल्य गच्छन्तु, सम्मिल्य स्तोत्राणि पठन्तु । युष्माकं मनांसि समानानि सन्तु । पारस्परिकसद्भावनयैकमत्येन च स्थिताः भवन्तु ।

एतादृशाः भावाः ऋग्वेदेऽथर्ववेदे तैत्तिरीयब्राह्मणे च समानरूपेण दृश्यन्ते । यथा—

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥[१]

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसाहसति ॥[२]

मानवानां कृते ऋषीणामुपदेशोऽस्ति । अस्माकं सर्वेषां प्रार्थना एकविधास्तु, विचारप्रदानार्थं स्थानमेकमेव भवतु । मनः मननस्य साधनस्वरूपमन्तःकरणं चित्तं विचारजन्यज्ञानञ्च एकविधानि सन्तु । अहं त्वया सहैकं रहस्यपूर्णं (कथनं) कथयामि तुभ्यमेकविधं हविः प्रदाय सुसंस्कृतं करोमि ।

जन्मनामाकूतिः सङ्कल्पाः चित्तवृत्तयः हृदयानि समानानि भवन्तु । सर्वेषां मनः समानमस्तु, येन युष्माकं कार्याणि पूर्णरूपेण संघटितानि भवन्तु । सर्वे जनाः संसारेऽस्मिन् सानन्दं जीवनं यापयन्तु । अत्र ऋषिभिः कृता प्रार्थना सर्वेभ्यः जनेभ्यः अस्ति न तु आत्मार्थे ।

यत्र सहस्रेषु वेदमन्त्रेषु याचना कृता तत्रैव त्यागस्य उत्कृष्टाः भावनाः अपि दृश्यन्ते । उदारहृदयस्य मानवस्य, दानाय परिग्रहणाय च, लोभविहीना भावना प्रकटितास्ति । यथा—

ओ हि वर्तन्ते रथ्येव चक्राऽन्यमन्यमुप तिष्ठन्त रायः ।[३]

रायः (वैभवः) रथस्य चक्रमिवावर्तितो भवति । ह्यः एकस्य पार्श्वे आसीत् अद्यापरस्य पार्श्वेऽस्ति । श्वः तृतीयस्य पार्श्वे भविष्यति ।

लौकिकसंस्कृतवाङ्मये लक्ष्मीविषये महाकवेर्बाणभट्टस्य विचाराः एतादृशाः सन्ति । यथा—"लब्धापि खलु दुःखेन पाल्यते । न परिचयं रक्षति । न अभिजनमीक्षते । न रूपमालोकयते । अद्यापि न क्वचिदपि निर्भरम् आबध्नाति पदम् ।....यथा यथा चेयं चपला दीप्यते, तथा तथा दीपशिखा इव कज्जलमलिनमेवकर्म केवलं उद्वमति ।"[४]

---

१. ऋग्वेदः—१०.१९१.३; अथर्ववेदः ६.६४.२, तैत्तिरीयब्राह्मणम्—२.४३.४.५

२. ऋग्वेदः-१०.१९१.४; अथर्ववेदः—६.६४.३; तैत्तिरीयब्राह्मणम्—२.४.४.५

३. ऋग्वेदः १०.११७.५

४. कादम्बरी (व्याख्याकारः पण्डितकृष्णमोहनशास्त्री) चौखम्बासंस्कृतसंस्थानं, वाराणसी चतुर्थसंस्करणम् संवत् २०३३, सन् १९७६) पृष्ठसंख्या ३२०-३२१

धनस्यार्जनं न केवलमात्मार्थे करणीयम् । धनार्जनं परेषां हिताय, बन्धुबान्धवानां हिताय, कर्तव्यम् । अथर्ववेदस्यैकस्मिन् मन्त्रे एतादृशं वर्णनमृषिणा कृतम् । यथा—

शतहस्त समाहर सहस्रहस्त सं किर ।[१]

शतहस्तैधनार्जनं कर्तव्यं सहस्रहस्तैः तस्य वितरणं करणीयम् ।

यजुर्वेदे उक्तं कस्यापि धनस्य लोभो न करणीयः । त्यागभावेन धनस्योपभोगः कर्तव्यः । यथा—

ईशा वास्यमिदं सर्वं यत्किं च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥[२]

अन्नोत्पादनस्य सम्बन्धे कथितमृग्वेदे यः कोऽपि जनः अन्येषां जनानां ध्यानमकृत्वैव स्वार्थे एव कृषिकर्मकृत्वान्नमुत्पादयति तस्यान्नोत्पादनं व्यर्थमस्ति । एव स्वार्थदृष्ट्योत्पादितमन्नं मनुष्यं विनाशयति । यथा—

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य ।[३]
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥

अस्मिन्मन्त्रे स्वकथ्यं पूर्णरूपेण दृढसङ्कल्पेन प्रस्तौति यत् सत्यमहं ब्रवीमि स्वार्थपूर्णविधिनोत्पादितमन्नमन्नोत्पादकस्य जनस्य वधं करोति । यो न देवायार्पयति न च मित्राय ददाति अपितु स्वयमेवान्नस्य भक्षणं करोति सः केवलं पापमेवाश्नाति ।

अन्नब्रह्मविवेचनप्रसङ्गे तैत्तिरीयोपनिषदि एतादृशः भावः प्राप्यते । ऋषिः कथयति यत् योऽन्नार्थिभ्योऽन्नं न प्रयच्छति स्वयमेवान्नं भक्षयति । तमन्नं भक्षयन्तं पुरुषमहमन्नमेव भक्षयामि । यथा—"यो मा ददाति स इदेव मा३वाः । अहमन्नमन्नमदंतमा३उद्मि ।"[४]

अस्माकमृषिभिः न केवलं मानवानां चिन्तनमुपस्थापितमपित्वस्मिन् जगति पशुपक्षिणामपि चिन्तनं कृतम् । गृहस्थाश्रमे गृहस्थानां कृते पञ्चमहायज्ञानां विधानं विहितम् ।[५] पञ्चमहायज्ञेषु सन्ति देवयज्ञः, ब्रह्मयज्ञः, भूतयज्ञः, पितृयज्ञः नृयज्ञः । नृयज्ञः अतिथिसेवास्ति तैत्तिरीयोपनिषदि "अतिथिदेवो भव"[६] सर्वेषां मानवानां कृते उपदेशोऽस्ति । भूतयज्ञे तु निखिलपशुपक्षिणां कृते "बलिवैश्वदेवस्य" विधानमत्याबश्यकरूपेण विहितं सर्वेभ्यः गृहस्थेभ्यः ।

---

१. अथर्ववेदः ३.२४.५

२. यजुर्वेदः ४०.१

३. ऋग्वेदः १०.११७.६

४. तैत्तिरीयोपनिष्द्-३.१०.६

५. आश्वालायनगृह्यसूत्रम् चतुर्थोऽध्यायः, पारस्करगृह्यसूत्रम्-२.९ प्रायः सर्वेषां गृह्यसूत्राणां विषयोऽयं वर्णितः ऋषिभिः । मनुस्मृतिः ३.६५ "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ मनु. ३.७०"

६. तैत्तिरीयोपनिषद्—१.१०.२

श्राद्धतर्पणावसरे स्वपूर्वजैः सहान्येभ्यः मानवेभ्यः, ऋषिभ्यः जलाञ्जलिः प्रदीयते । अनेनैव सह नागसर्पादिभ्यः जीवेभ्यः जलाञ्जलिं दत्वा तेषां तृषाशान्त्यर्थमस्माकमृषिभिः विधानं निर्मितम् । कीदृशी सद्भावपूर्णादृष्टिरस्ति अस्माकमृषीणाम् ।

विश्वबन्धुत्वभावनया परिपूर्णाः ब्रह्मज्ञानिनः ऋषयः कथयन्ति-युष्माकं सर्वेषां जलं समानमस्तु, अन्नं समानं भवतु । युष्मान् समाने बन्धने बध्नामि । यूयमेकविधबन्धने तिष्ठत ।

यथा—समानी प्रपा सह वोऽन्नभागः समानेयोक्त्रे सह वो युनज्मि[१]

यदा जनानां हृदयेषु ईर्ष्याद्वेषदम्भपाखण्डादीनां स्थानं न भवति, एतेषां सर्वेषां दोषाणां पूर्णतया निराकरणं भवति, विचारेषु हृदये, च परिवर्तनं जायते तदा तेषां विचाराः उत्तमाः भवन्ति । जनाः अपरेषां दुःखं दृष्ट्वा दुःखमनुभवन्ति, अपरेषां सुखेन सुखमनुभवन्ति, अन्येषामुन्नतिं दृष्ट्वा हर्षिताः भवन्ति तदैव मनुष्याणामन्तर्मनसि अन्येषां हितकरणाय भावनोद्भवति, हृदयं विशालं भवति । "परोपकारः पुण्याय पापाय परपीडनमिति" सिद्धान्तमाचरन्ति । निखिलवसुन्धरा कुटुम्बमिव प्रतिभाति । "वसुधैव कुटुम्बकम्"[२] इति भावना स्वयमेवोत्पद्यते । भेददृष्टिः स्वयमेव समाप्यते । जनाः स्वयमेव तथैव सर्वेषु प्राणिषु स्निह्यन्ति यथा धेनुः स्ववत्से स्निह्यति । अस्मिन् प्रसङ्गेऽथर्ववेदीयपैप्पलादसंहितायां मन्त्रः उल्लिखितोऽस्ति । यथा—

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्योऽन्यमभिनवत वत्सं जातमिवाघ्न्या ॥[३]

भवतां समेषां मध्यतः विद्वेषं दूरीकृत्याहं सहृदयतां सौमनस्यञ्च स्थापयामि यथा धेनुः नवजाते वत्से स्निह्यति तथैव भवन्तः सर्वे परस्परं स्नेहं कुर्वन्तु ।

अथर्ववेदीयपैप्पलादसंहितायाः अन्यस्मिन् मन्त्रे विश्वबन्धुत्वभावनायाः सन्देशः उपलभ्यते । बन्धवः परस्परं द्वेषं न कुर्वन्तु भगिनी परस्परं ईर्ष्यां न करोतु । सर्वे ऐकमत्ये भवन्तु । तुल्यव्रतयुक्ताः भवन्तु, मधुरं वदन्तु । यथा—

मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥[४]

समग्रो हि वैदिकवाङ्मयः निखिललोकहिताय प्रवर्तते । "तमसो मां ज्योतिर्गमये" त्यस्य वाक्यार्थस्य प्रकाशः प्रायः मन्त्रार्थेषु निगूढो वर्तते । अत एवोच्यते त्रैलोक्यज्ञानदो वेद इति ॥

१. अथर्ववेदः ३.३०.६

२. अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ पञ्चतन्त्रे परीक्षितकारके सिंहकारकमूर्खब्राह्मणकथा श्लोकसंख्या-३७; मोतीलालबनारसीदासः दिल्ली १९९९

३. पैप्पलादसंहिता-५.१९.१

४. पैप्पलादसंहिता–५.१९.३

एवमेव वैदिकवाङ्मयस्य सिंहावलोकनेन स्पष्टतया ज्ञायते यदस्माकमक्षयमूलनिधिस्वरूपे वेदे देवानां प्रार्थना: स्तुतय: याचना: एव न सन्ति अपित्वत्र बहुजनहिताय बहुजनसुखाय, विश्वबन्धुत्वदृष्ट्यात्युत्तमाभिव्यक्तिरस्ति। न केवलं वैदिकवाङ्मयेऽपितु लौकिकसंस्कृतस्य काव्येषु रूपकेषु विश्वबन्धुत्वभावना पूर्णरूपेण पल्लविता पुष्पिता दृश्यते। एवं वयं पश्याम: यत् धार्मिकानुष्ठाने पूर्णे सति सर्वेषां कृते मनुष्येण कामना क्रियते यथा—

सर्वेभवन्तु सुखिनः सन्तु सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥

अस्मिन् संसारे सर्वे प्राणिन: सुखिन: भवन्तु सर्वे रोगरहिता: भवन्तु। सर्वे कल्याणमधिगच्छन्तु, कोऽपि दु:खस्य भागी नास्तु।

संस्कृते व्याकरण-वैभवम्

डॉ. जयमन्तमिश्रः

वेद-वेदाङ्ग-सहितानां संस्कृतशास्त्राणां सम्यग्ज्ञानमवाप्तुं व्याकरणमेव प्रमुखं साधनं भवतीति निश्चिन्वन्ति विपश्चितः। पद-पदार्थ-ज्ञान-द्वारैव सामान्य-विशेष-विषयाणां परिज्ञानं जायते। व्याकरणेन च पद-पदार्थानामवबोधो भवति। अतएव व्याकरणं षट्स्वपि वेदाङ्गेषु मुखमिव सर्वतः प्रधानं स्थानं लभते।[१] एवं हि व्याकरणं सर्वशास्त्रोपकारकम्,[२] सर्ववेद-पारिषदञ्च[३] स्वीक्रियते। अन्यानि हि अङ्गानि स्वीयं स्वीयमङ्गत्वं विषय-विशेष-निरूपणेन साधयन्ति, व्याकरणं हि खलु समस्तेषु वेदेषु निर्दिष्टानां 'बहुलं'-रूपाणां विविध-विध-प्रयोगाणां व्याकृतिं विदधत् लौकिकानामपि समस्तानां शब्दानां प्रकृति-प्रत्ययादिप्रतिपादन-पुरस्सरम् अर्थान् समवबोधयति इति हेतोः सर्ववेदपारिषदम् (साधारणम्) इति सर्वेष्वङ्गेषु प्रधानमिति निर्णीयते। एवं प्रधानीभूतस्य व्याकरणस्य प्रवचनम् सर्वतोऽधिकं समपेक्षितमिति सृष्टेः प्रारम्भकालादेव प्रारभत। एतच्च व्याकरण-प्रवचनं निरन्तरं प्रवर्तमानं प्रवर्धमानं सत् प्रभूत-वैभव-समन्वितं महासागरायमाणमभूत्।

जगद्विधातु ब्राह्मण आरभ्य महर्षि-पाणिनिं यावत् व्याकरणस्य अनेके सम्प्रदाया, अनेके सिद्धान्ता, अनेके प्रक्रिया-मार्गा, विविधानि च आख्यानानि समजायन्त। व्याकरण-वैभवस्य प्रदर्शन-प्रसङ्गे प्रकृते, विस्तरभिया, केवलं दिङ्मात्रं निर्दिश्यते। एवं हि अनुश्रूयते—

समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ।
तदभाग-भागाच्च गतं पुरन्दरे कुशाग्र बिन्दून् पतितं हि पाणिनौ॥[४]

यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्थवत्।
पद-रत्नानि किं तानि सन्ति पाणिनि-गोष्पदे॥[५]

---

१. छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥ पाणिनीय-शिक्षा।

२. काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्। पाणिनीयं महाशास्त्रं पद-साधुत्व-लक्षणम्। सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन॥ पाराशरोपपुराणम्।

३. सर्ववेद-पारिषदं हीदं शास्त्रम्। इति "पूर्वापर प्रथम"-२/१/५७। इति सूत्रे महाभाष्यम्।

४. सारस्वत-भाष्ये।

५. महाभारतस्य मनबोध-टीकायाम्।

एतेन पाणिनेः पूर्वं बहूनि व्याकरणानि आसन्निति निश्चीयते । तेषु विशेषतश्चर्चितानाम्—

(क) पूर्वपाणिनि-कालिकानां व्याकरणानां दिग्दर्शनम्—

(१) ब्राह्म-व्याकरणम्—

वेदादिज्ञान-विज्ञानानामिव व्याकरणस्यापि प्रादुर्भावो ब्राह्मणः सकाशादेवाभूदिति ब्रह्मणा प्रोक्तम् प्रथमं ब्राह्म-व्याकरणम् ।

(२) ऐशान-व्याकरणम्—

महेश्वरादेव अक्षर-समाम्नायमधिगम्य[१] महर्षिपाणिनिः कृत्स्नं व्याकरणं प्रोक्तवान् । प्रत्याहार-सूत्राणि च माहेश्वर-सूत्राणि प्रोच्यन्ते । अतः ईशानेन प्रोक्तं द्वितीयम् ऐशान-व्याकरणम् ।

(३) बार्हस्पत्य-व्याकरणम्—

"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां महाभाष्य-प्रामाण्यात् इन्द्रः गुरोः बृहस्पतेः दिव्यं वर्ष-सहस्रं यावद् व्याकरणमधीतवान् । एवं हि बृहस्पतिना प्रोक्तम् बार्हस्पत्य-व्याकरणम् ।

(४) ऐन्द्र व्याकरणम्—

"वाग्वै पराच्यव्याकृता वदत् । ते देवा इन्द्रमब्रुवन् इमां नोचं वाचं व्याकुर्विति । तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् ।"[२] एतेन इन्द्र एव प्रथमं प्रकृति-प्रत्यय-विभागेन वाचं व्याकृतवान् । एवञ्च तेन प्रोक्तम्-ऐन्द्रव्याकरणम् ।

(५) वायव्य-व्याकरणम्—

वायुः "शब्दशास्त्रविशारदः"[३] इतिकथनात् यमलाष्टकतन्त्रे वायव्य-व्याकरणस्य च समुल्लेखात् वायुना प्रोक्तमासीद् वायव्य-व्याकरणम् ।

(६) भारद्वाज-व्याकरणम्—

"बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः व्याकरणं प्रोवाच"इति समुल्लेखात् "ऋतो भारद्वाजस्य"[४] इति सूत्रे पाणिनि कृत-निर्देशाच्च भारद्वाज-पूर्वज-भरद्वाजस्य सङ्केतेन भरद्वाजो वैयाकरण आसीत् । तेन प्रोक्तम्-भारद्वाज-व्याकरणम् ।

---

१. येनाक्षर-समाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरण-प्रोक्तं तस्मै पाणिनये नमः ॥ पाणिनिशिक्षा ।

२. तैत्तिरीय-संहिता

३. वायुपुराणम् २/४४ ।

४. ७/२/६३ ।

(७) **भागुरि-व्याकरणम्—**

"षष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलान्तानां यथा वाचा निशा दिशा ॥[१]

इत्यस्मिन् श्लोक-वार्तिके आचार्यभागुरि-मतोल्लेखात् आसीद्-भागुरिर्वैयाकरणः । तस्यासीद् भागुरि-व्याकरणम् ।

(८) **पौष्करसादि-व्याकरणम्—**

"चयोद्वितीया शरि पौष्करसादेरितिवाच्यम्"[२] इति वार्तिक-निर्देशात् पैष्करसादि-व्याकरणस्यास्तित्वम-वगम्येत ।

(९) **"वृद्धिर्यस्याचामादिस्तद् वद्धम्"[३]**

इति सूत्र-भाष्ये, 'कम्बलचारायणीयाः, ओदन-पाणिनीयाः, घृतरौढीयाः' इत्याद्युदाहरणात् चारायण-वैयाकरणस्य विद्यमानत्वमवगम्यते । पुरु-कृतेच्छच्छ्रयोः' इति चारायणसूत्रमपि उयते । पुरुशब्दस्य छेपरे, कृत-शब्दस्य च्छ्रेपरे अन्त्यस्य सूत्रेणानेन लोपो भवति । तेन पुरुच्छदनम् 'पुच्छम्', कृतच्छ्रयम् 'कृच्छ्रम्' इति सिद्धयति । एतेन चारायण-व्याकरणमपि सूच्यते ।

(१०) **काशकृत्स्न-व्याकरणम्—**

काशकृत्स्नेन प्रोक्तं व्याकरणं काशकृत्स्नम् । काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणी[४] इत्यादि प्रयोगात् काशकृत्स्नव्याकरणं प्रवर्तमानमासीत् ।

(११) **शान्तनव-व्याकरणम्—[५]**

फिट्सूत्रप्रवक्ता आसीत् शान्तनुः । तस्य सूत्राणि शान्तनव-सूत्राणि कथ्यन्ते । अतोहि प्रावर्तत तस्य शान्तनवं व्याकरणम् ।

---

१. अव्ययादाप्सुपः २/४/८२ इति सूत्रे वार्तिकम् ।

२. ङ्णोः कुक् टुक् शरि ८/३/२८ इति सूत्रे वार्तिकम् ।

३. १/१/७३ इति सूत्र-भाष्ये ।

४. एको गोत्रे ४/१/९३ इति सूत्र-भाष्ये ।

५. 'फिट्' इति प्रातिपदिकस्य प्राचो संज्ञा। तस्य स्वरविधायकसूत्राणि फिट्सूत्राणि 'शान्तनुराचार्यन्तसूत्रप्रणेता इति द्वारादीनाञ्चे' ति सूत्रे हरदन्तः। द्र. सिद्धान्तकौमुदी फिट्सूत्रान्तशेखर-व्याख्या ।

(१२) माध्यन्दिनि-व्याकरणम्—

(१३) वैयाघ्रपदव्याकरणम्—

"ऋदुशनस्पुरुदंसोऽनेहसांच"[१] ति सूत्रे काशिकावृत्तिः उशनसः सम्बोधने हे उशनः, हे उशनन्, हे उशन इति माध्यन्दिनि-व्याकरणानुसारेण रूपत्रयं निरूपयति । एतत् प्रसङ्गे हि—

"साम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यन्दिनिर्वष्टि, गुणंत्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥"इत्युद्धरति ॥

"इकः षण्ढेऽपि सम्बुद्धौ गुणो माध्यन्दिनेष्यते" "अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः" इति प्रकृतसूत्र-वार्तिकम् उपर्युक्त माध्यन्दिनि-मतमेवानुसरन्ति । एतेन माध्यन्दिनि व्याकरणस्य तथा 'दशका वैयाघ्रपदीयाः' इत्युल्लेखात् वैयाघ्रपदव्याकरणस्यास्तित्वं समवगम्यते ।

१४. रौढि-व्याकरणम्—

पूर्वं चारायण-व्याकरण-प्रसङ्गे 'वद्धिर्यस्य (१/१/७३) इति सूत्र-भाष्ये 'घृतरौढीया' इति प्रयोगाः प्राप्यते इति प्रतिपादितम् । घृतप्रधानो रौढिः-घृतरौढिः, तस्य छात्रा घृतरौढीया इति व्याचष्टे काशिका ।

"गोत्रावयवात् (४/१/७६) इति सूत्र-भाष्ये

"सिद्धं तु रौढादिषूयसंख्यानात्" इत्युल्लेखाच्च रौढि-व्याकरणमासीदिति सूच्यते ।

(१५) शौनकि-व्याकरणम्—

"करोतेरपि कर्तृत्वे दीर्घत्वं शास्ति शौनकिः"[२] तेन करोतेः कर्तरिल्युटि दीर्वे 'कारण' इति सिद्धयति । "धाञ्कृञोस्तनु नह्योश्च बहुलत्वेन शौनकिः"[३] इत्याद्युल्लेखात् शौनकि-व्याकरणमासीत् ।

(१६) गौतम-व्याकरणम्—

"आचार्यायसर्जनश्चान्तेवासी[४]"ति सूत्र भाष्ये 'आपिशल-पाणिनीय-व्याडीय-गौतमीयाः' इति प्रतिपादनात्, "प्रथमपूर्वोहकारश्चतुर्थः तस्य संस्थानं प्लाक्षि-कौण्डिन्य-गौतम-पौष्कर-सादीनाम्" इति तैत्तिरीय-प्रातिशाख्य-वचनाच्च गौतम-व्याकरणस्थ सत्ता प्रतीयते ।

१. ७/१/९४ । इति सूत्रे ।
२. चरकटीकायां जज्झटः ।
३. भट्टिकाव्ये जयमङ्गलाचार्यः ।
४. ६/२/३६ इति सूत्र-भाष्ये ।

(१७) व्याडि-व्याकरणम्—

उभयप्राप्तौ कर्मणि (२/३/६६) इति सूत्र-भाष्ये 'शोभना खलु दाक्षायणस्य "संग्रहस्य" कृतिः' इति संग्रहः ग्रन्थ-कर्ता दाक्षायणो व्याडिः (दाक्षी-पुत्र-दाक्षेयस्य[१] पाणिनेः मातुलेयः) वैयाकरणरूपेण प्रसिद्धः ।

"शेश्छन्दसि बहुलम्" ६/१/७० इति सूत्र-परिभाषा-वत्तौ पुरुषोत्तमदेवः "इकां याण्भि र्व्यवधानं व्याडि-गालवयोरिति वाक्यम्" इत्येवं प्रतिपादयन् व्याडे र्वैयाकरणत्वं सुसाधयत् । एतेन तस्य संग्रहात्मकं व्याकरणमासीत् ।

उपर्युक्ताः सप्तदश आचार्या व्याकरण-प्रवक्तारः पाणिन्येष्टेकनामतोऽनुल्लिखिताः । पाणिनिना अष्टाध्याय्यां निर्दिष्टाः दश आचार्याः सन्ति—१. आपिशलिः[२] २. काश्यपः,[३] ३. गार्ग्यः,[४] ४. गालवः,[५] ५. चाक्रवर्मणः,[६] ६. भारद्वाजः,[७] ७. शाकटायनः,[८] ८. शाकल्यः,[९] ९. सेनकः,[१०] १०. स्फोटायनः[११] इत्येतेषां सप्तदशसु सूत्रेषु, इतो भिन्नानां देश-विशेष-सूचकानाम् उदीचाम्, प्राचाम् आचार्याणाम्, अन्येषाञ्च 'सर्वेषाम्,' 'आचार्याणाम्,' शिष्टानाम् इत्येवं रूपेण अष्टादशसु सूत्रेषु च समुल्लेखोऽस्ति ।

उपर्युक्त-संक्षिप्तेनापि विवरणेन सम्यगवगम्यते यत् महर्षि-पाणिने पूर्वमपि व्याकरणं महता वैभवेन समन्वितमासीत् । किन्तु—

एतेषु अष्टानामेव शाब्दिकानां तेषां व्याकरणानाञ्च प्रसिद्धिर्वर्तते ।

उक्तञ्च—

ब्राह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम् ।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टकम् ।।

---

१. दक्षस्य पुत्री दाक्षी तस्या अपत्यं पुत्रः दाक्षेयः पाणिनिः । 'सर्वे सर्वपदादेशा दाक्षी पुत्रस्य पाणनेः' इत्यभियुक्त-वचनम् । दक्षस्य पुत्रः दाक्षिः तस्यापत्यं पुमान् दाक्षायणो व्याडिः । व्याडेः पाणिनिः पैतृष्वस्रेय आसीत् ।

२. वा सुप्यापिशलेः ६/१/९२.

३. तृषि मृषिकृषेः काश्यपस्य १/२/२५

४. ओनो गार्ग्यस्य ८/३/२०/७/३/००/८/४/६७

५. अङ्गार्ग्य गालवयोः ७/३/९९/ ८/४/६७/६/३/६१/७/१/७४

६. ईङ्चाक्रवर्मणस्य ६/१/१३०

७. ऋतो भारद्वाजस्य ७/२/६३

८. लङः शाकटायनस्यैव ३/४/१११/८/३/१८/८/४/५०

९. लोपः शाकल्यस्य ८/३/१९/१/१/१६/८/४/६७/६/३/१/१२७

१०. गिरेश्च सेनकस्य ५/४/११२

११. अवङ्स्फोटायनस्य ६/१/१२३

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमर-जैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः ॥

एतेष्वपि पाणिनिना प्रोक्तं पाणिनीयमेव व्याकरणम् जगति सर्वातिशायि सज्जयति । यथाहि उदयति सवितरि गगने सर्वाणि नक्षत्राणि निष्प्रभाणि भवन्ति, तथैव चकासति पाणिनीये भानौ अन्यानि व्याकरणानि मतिनानि संजातानि । अतश्च—

"पाणिनीयं शब्दशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥"

इत्येष समुद्घोषः समजायत ।

एतत् समुद्घोषस्य बीजं निर्दिशति भगवान् पतञ्जलिर्महाभाष्ये पस्पशाह्निके । पाणिनीयं व्याकरणमिदं लौकिकानां वैदिकानाञ्च समस्तानां शब्दानां लघुनोपायेन यथा व्युत्पत्तिं विदधाति न तथा व्याकरणान्तरम् । 'रक्षोहागमलघ्वसन्देहाः प्रयोजनमि'ति सामान्यतः व्याकरणस्य प्रयोजनं निर्दिशन्नपि महर्षिः विशेषतः पाणिनीय-व्याकरणस्यैव महत्त्वाधायकम् प्रयोजनं प्रतिपादयति विजानते विज्ञाः । इदमेव हि कारणं विद्यते विश्वस्मिन् एतद् व्याकरणस्य अध्ययनाध्यापनयोः प्रचार-प्रसारयोश्च । अतएव महर्षिपाणिनिः विश्वस्य शाब्दिकेषु श्रेष्ठः प्रेष्ठ-श्चेति स्वीक्रियते सर्वैः ।

पाणिनेः परवर्तिनोऽपि शाब्दिका व्याकरणस्य समृद्धिं प्रवर्धमाना आसन्निति निम्नलिखितै—

व्याकरणैरवगम्येत—

१. कातन्त्र-व्याकरणम्

२. चन्द्रगोमिनः चान्द्र-व्याकरणम्

३. क्षपणक-व्याकरणम्

४. देवनन्दिनः जैनेन्द्रव्याकरणम्

५. वामनस्थ विश्रान्तविद्याधर-व्याकरणम्

६. अकलङ्कस्य-जैनशाकटायनम्

७. पाल्यकीर्तेः-पाल्यकीर्तिः व्याकरणम्

८. शिवस्वामिनः-शिवस्वामिव्याकरणम्

९. भोजदेवस्य-सरस्वतीकाष्ठाभरणम्

१०. बुद्धिसागरस्य-बुद्धिसागर-व्याकरणम्

११. हेमचन्द्रस्य-हैम-व्याकरणम्

१२. भद्रेश्वरसूरेः-क्षपणक-व्याकरणम्

१३. अनुभूतिस्वरूपस्य-सारस्वतव्याकरणम्

१४. वोपदेवस्य-मुग्धबोध-व्याकरणम्

१५. क्रमदीश्वरस्य-जौमर-व्याकरणम्

१६. पदमनाममिश्रस्य सुपदमव्याकरणम्

१७. रूपगोस्वामिनः हरिनामामृतव्याकरणम्

१८. बलरामपञ्चाननस्य-प्रबोधप्रकाश-व्याकरणम् ।

इदमत्रावधेयम्-यथाहि-विशालवटवृक्षस्य अधश्छायायां जायमाना स्तरवस्तनिमानमादधानाः स्वलघिमानं प्रदर्शयन्ति, तथैव इमानि उपर्युक्तानि व्याकरणानि पाणिनीयव्याकरणस्य पुरतः स्व लघुतां प्रकटयन्ति ।

एतद् भिन्नान्यपि दशपञ्चदशानि निम्नस्तराणि प्रबोधचन्द्रिका-बालबोध-द्रुतबोधादीनि व्याकरणानि सन्ति यानि बालानां सुख-बोधाय पण्डितै रचितानि ।

एतेन विज्ञायते यत्-ब्रह्मेशन-हिमालयात् प्रभवन्ती व्याकरण-सरित् निरन्तरं प्रवहन्ती विद्वन्मानस-सरोवरं प्रपूरयन्ती पदार्थजातं प्रकाशयति पल्लवयति, सफलयति च ।

एवं सत्यपि पाणिनिना प्रोक्तं पाणिनीयमेव व्याकरणं जगति सर्वातिशायि सञ्जातम् । यथाहि उदयति सवितरि गगने सर्वाणि नक्षत्राणि निष्प्रभाणि भवन्ति, तथैव प्रोक्ते पाणिनीये प्रकाशयति च एतद्भानौ अन्यानि व्याकरणानि मलिनानि सञ्जातानि । अतश्च—

"पाणिनीयं शब्दशास्त्रं पदसाधुत्व-लक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ।।"

इत्येष समुद्घोषः समजायत ।

एतत् समुद्घोषस्य बीजं निर्दिशति भगवान् पतञ्जलिः महाभाष्य-पस्पशाह्निके । पाणिनीयं व्याकरणमिदं लौकिकानां वैदिकानाञ्च समस्तानां शब्दानां लघुनोपायेन यथा व्युत्पत्तिं विदधाति न तथा व्याकरमान्तरम् । "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति सामान्यतः व्याकरणस्य प्रयोजनं निर्दिशन्नपि महर्षिः विशेषतः पाणिनीय-व्याकरणस्यैव प्रयोजनं प्रतिपादयति इति विजानते विज्ञाः । इदमेव च कारणं विद्यते विश्वस्मिन्, एतद् व्याकरणस्य अध्ययनाध्यापनयोः, प्रचार-प्रसारयोश्च । अतएव महर्षि-पाणिनिः विश्वस्य सर्वप्रधानवैयाकरण इति स्वीक्रियते सर्वैः ।

वाल्मीकि-रामायणे सङ्केतितानां नवानां व्याकरणानां निर्धारणम्—

आदिकाव्यरामायणस्य प्रणेता प्राचेतसमहर्षिवाल्मीकिः महर्षि-पाणिनेः पूर्ववर्ती आसीदिति निश्चिन्वन्ति प्रज्ञावन्तो विपश्चितः । रामायण-साक्ष्येण वाल्मीकिः भगवतो रामभद्रस्य समसामयिक इत्यपि प्रमाणयन्ति प्रामाणिकाः । "महर्षिवाल्मीकि-पाणिन्योः पौर्वापर्यम्"[१] इति शीर्षके शोधात्मक-निबन्धे मयापि विविधैस्तर्कैः प्रमाणैश्च

१. प्रबन्धकुसुमाञ्जलिः पृ. ३५ ।

महर्षि-वाल्मीकेः पूर्ववर्तिनं पाणिनेश्च ततः परवर्तित्वं साधितम् । एवं हि रामायणे किष्किन्धाकाण्डे उत्तरकाण्डे च वाल्मीकिः श्रीरामभद्रमुखेन कथयति यत् कपीन्द्रेण हनुमता नूनं कृत्स्नं व्याकरणमधीतम् । यतोहि बहुव्याहरतापि एतेन न किञ्चिदपि अपशाब्दितम् अतोहि हनूमान् नवानामपि[१] व्याकरणानां सम्यगर्थं विजानीते । विशिष्टार्थं 'ससंग्रहं,' सूत्र-वृत्यर्थ-पदं च[२] सम्यगवमत्य तत्र निष्णातो विद्यते ।

एवञ्च पाणिनीय-व्याकरणात् वाल्मीकि-राभायणस्य पूर्ववर्तित्वे रामायणे सङ्केतितेषु नवसु व्याकरणेषु पाणिन्यष्टकस्य असंग्रहात् पाणिनीयातिरिक्तानि कानि तानि नवव्याकरणानीति जिज्ञासां समादधतो विपश्चितः— 'ब्राह्मम्, माहेश्वरम्, ऐन्द्रम्, बार्हस्पत्यम्, भारद्वाजम्, गार्ग्यम्, गालवम्, काश्यपम्, गौतमञ्चेति नव व्याकरणानि निर्धारयन्ति एवमेव "ससूत्रवृत्यर्थपदं महार्थं 'संग्राहम्' सिद्धयति वै कपीन्द्रः" इत्यत्र ससंग्रह-घटक-'संग्रह' शब्देन व्याडिकृत-संग्रहग्रन्थस्य संकेतो न भवति, यतः संग्रहग्रन्थ-प्रणेताव्याडिः पाणिनेर्मातुलेयः समसामयिक आसीत् । अतः संग्रहनामको ग्रन्थः एकः प्राचीन एवासीत् ।

पाणिन्यष्टकेन शब्दसाधुत्वानुशासने माहेश्वर-वर्ण समाम्नायस्य मुख्याधारत्वम्—

लोकप्रसिद्धमातृकापदेनैव वर्ण-ज्ञान-संभवेऽपि महर्षि-पाणिनये महेश्वरकृतो वर्णसमाम्नायोपदेशः किमर्थ इति जिज्ञासां समादधत् प्राह महर्षि-पतञ्जलिः 'वृत्तिः समवायार्थो वर्णानामुपदेशः' इति । अर्थात् महेश्वरेण पाणिनये कृतस्य उच्चारणात्मकोपदेशस्य प्रयोजनं वरीवर्ति वृत्ति-समवायः । अत्र वृत्तिः शास्त्र-प्रवृत्तिः, समवायः अइउण् इत्यादि वर्णानाम् आनुपूर्व्येण सन्निवेशः । तत्र वृत्ति-समवाय इत्यस्मिन् त्रिविधसमासेन प्रयोजन-त्रयं सिद्धयति ।

१. वृत्तये समवाय इति प्रथमचतुर्थीसमासपक्षे-वृत्तये-इकोयणचीत्यादिशास्त्रस्य लाघवेन प्रवृत्तये-समवायः अइउण् इत्यादि-वर्णानां क्रमेण सन्निवेशः इत्यर्थः । वर्णसमवायादेव अजादि संज्ञाः सिद्धयन्ति, येन 'इकोयणाचि' इति शास्त्रं लघुभूतं सम्पद्यते, अन्यथा 'इ उ ऋ लृ वर्णानां यवरलाः' इत्येवं गुरुतरं सूत्रं स्यात् ।

२. वृत्यर्थो वा समवायः वृत्तिसमवाय इति द्वितीये कर्मधारयसमासपक्षे वृत्तिशब्दस्य लक्षणया साधुत्वोपयोगि-शास्त्र-प्रवृत्यनुकूलः समवाय इत्यर्थो भवति । यथा इ उ ऋ लृ इति यवरल इत्येतेषाञ्च वर्णसमाम्नाये क्रमेण सन्निवेशात् "इग्यणः सम्प्रसारण" मिति सूत्रे "यथासंख्यमनुदेशः समानाम्" इत्यस्य प्रबृत्ति र्भवति । तथा च यणः स्थाने क्रमेण इग्रूपं सम्प्रसारणं भवति । वर्णसन्निवेशः सत्त्वादेव समसंख्योपपत्तौ यथासंख्यावतार इति द्वितीय-विग्रह-प्रदर्शनस्य फलम् ।

वृत्ति-प्रयोजनो वा समवाय इति तृतीये मध्यमपदलोपि—-समासपक्षे शास्त्रप्रवत्तिः प्रयोजनमाभिलक्ष्य समवायः वर्णानाम् अइउण् इत्यादि-वर्णानां सन्निवेशः कृतोऽस्ति । अर्थात् माहेश्वर-सूत्रेषु अन्तिमवर्ण-सन्निवेशः

१. नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् । बहुव्याहरताऽनेन न किञ्चिदपशाब्दितम् ॥ रा. किष्कि. ३/२९ । सोऽयं नव व्याकरणार्थ-वेत्ता । तत्रैव उत्तरे ३६/४७ ।

२. असौ पुनर्व्याकरणं ग्रहीष्यन् सूर्योन्मुखः प्रष्टुमनाः कपीन्द्रः । उद्यद्गिरेरस्त गिरिं जगाम ग्रन्थं महद् धारयनप्रमेयः ॥ ससूत्र वृत्यर्थ पदं महर्थिं ससंग्रहं सिद्धयति वै कपीन्द्रः ॥ तत्रैव उत्तरे-३६/४५-४६ ।

अणादि-प्रत्याहार-सिद्ध्यर्थम् । अन्तिमवर्णस्य इत्संज्ञया "आदिरन्त्येन सहेता" इत्यस्य प्रवृत्तिः । ततः अणादि संज्ञक-प्रत्याहारः । तेन च "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति शास्त्र-प्रवृत्तिर्भवति । णकारादि-वर्णानां सन्निवेशः इत्संज्ञार्थम् । इत् संज्ञा च प्रत्याहार-सिद्ध्यर्थम् । प्रत्याहारश्च शास्त्र-प्रवत्ति-प्रयोजनः इति निर्गलितोऽर्थः । एवं हि पाणिनीयशास्त्रस्य प्रवृत्तौ वर्णसमाम्नायोपदेश एवं आधारायते । वर्णसमाम्नायस्य उपदेशे-उच्चारणे सत्येव अनुबन्धकरणं भवति, इष्टानां वर्णानां ज्ञानञ्च जायते ।

पाणिनीयव्याकरणस्य संस्कृतभाषा-जीवनाधायकत्वम्—

पाणिनेः समयादारभ्य इदानीं यावत् पाणिनीयानुशासनमेव शब्दापशब्द-विवेचने नियामकम् । एतन्नियम-विपरीतं यदि किमप्युच्यते तन्नैव ग्राह्यं भवतीति महर्षि-पतञ्जलिः पस्पशाह्निके "लक्ष्यलक्षणे व्याकरणम्" इति व्याचक्षाणः "योहि उत्सूत्रं कथयेन्नादो गृह्येत" इत्येतेन सुस्पष्टं प्रत्यपादयन् । महान् वैयाकरणो नागेशभट्टः "उणादयो बहुलम्" इति सूत्र-व्याख्याने शेखरे "पाणिनि-शास्त्र-बोधितानामेवेदानीं साधुत्वम्" इति सिद्धान्तयामास । एवञ्च पाणिनीयं शब्दशास्त्रमेव पद-साधुत्वलक्षणम् इति शब्द-प्रयोक्तृभिः स्वीक्रियते । इदमेव व्याकरणम् संस्कृत-भाषाया विशुद्धं स्वरूपं निर्णीय प्रकाशयति, येन संस्कृतं विश्वस्मिन् एकरूपेण व्यवह्रियमाणांसत् समानमर्थं बिभ्रत् चकास्ति । यदि नाम पाणिनीयं व्याकरणं नियामकं न भविष्यत्, तर्हि यादृच्छिक-प्रयोग-बलात् अपशब्दानां बाहुल्यात् संस्कृत-स्वरूपमेव विनष्टमभविष्यत् ।

एवं सति ये केचन पाणिनीयव्याकरणं संस्कृतभाषा-विकासावरोधकं मन्यन्ते, न ते परीक्ष्यवादिनः । प्राचीनप्राकृतभाषा विकासस्य अधुनातन-परिणाम एवात्र प्रमाणम् ।

उपर्युक्त-संक्षिप्त-विवरणेन संस्कृत व्याकरणस्य वैभवम्, महत्त्वम्, गौरवम्, कार्यम्, नियमनसामर्थ्यम्, एकसूत्र-संयोजनम्, समासेन विविधार्थप्रकाशनम्, संश्लेषण-जनकत्वम्, सूत्रशैल्याः विषय-प्रतिपादनम्, व्यासेन सरलीकरणम् इत्यादीनि विविधानि वैशिष्ट्यानि तस्य कामपि अपूर्वां चमत्कृतिं जनयन्तितमामिति शम् ।

जातबहिरङ्गासिद्धत्वम्

डॉ० के० विष्णु नम्बूदिनि

पाणिनीयसम्प्रदाये प्रक्रियोपयोगिनीषु परिभाषासु **"असिद्धं बहिरङ्गमन्तरङ्गे"** — इति, **"अन्तरङ्गं बलीयः—"** इति च द्वे भृशं पूज्येते। अन्तरङ्गबहिरङ्गयोः युगपत्प्रसङ्गे अन्तरङ्गस्य प्रथमं प्रवृत्तिः **'अन्तरङ्गं बलीयः—'** इत्यनया व्यवस्थाप्यते। प्रवृत्तपूर्वं बहिरङ्गमन्तरङ्गे कर्तव्येऽसिद्धमिति **'असिद्धं बहिरङ्गमन्तरङ्गे-'** इत्यनया व्यवस्थाप्यते। 'विप्रतिषेधे परं कार्यम्' (१-४-२) इति सूत्रस्य भाष्ये तु "प्रवृत्तपूर्वं समकालप्राप्तिकं च बहिरङ्गम् अन्तरङ्गे कर्तव्येऽसिद्धं भवति" — इति व्याख्याय द्वे अपि ते व्यवस्थे **"असिद्धं बहिरङ्गमन्तरङ्गे-"** इति वाक्येनैकेन समाहृते। एकेन वाक्येन समाहृतत्वे सत्यपि विषयभेदात् ज्ञापकभेदात् अपवादभेदाच्च पृथगेव ते परिभाषे इतयास्थेयम्। अन्तरङ्गबलीयस्त्वबोधिका परिभाषा अन्तरङ्गपरिभाषेति, बहिरङ्गासिद्धत्वबोधिका बहिरङ्गपरिभाषेति च व्यवहारः सम्प्रदाये प्रसिद्ध एव।

अस्मिन् प्रबन्धे बहिरङ्गपरिभाषा, तदपवादभूता **"नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः"** इत्येषा परिभाषा च विषयः।

हेतुमण्णिजन्तात् दीप्-धातोः लुङः तिपि, च्लेः चङि च "दीप्, णिच्, चङ्, तिप्" इति स्थितिः।

अत्र **"भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्"** (७-४-३) इति सूत्रेण उपधाह्रस्वविकल्पनात्, द्विर्वचनादिकार्येषु कृतेषु **"अदिदीपत्, अदीदिपत्"** इति रूपद्वयमिष्यते।

किन्तु तत्रोपधाह्रस्वे कृते "दिप्, णिच्, चङ्निप्" इत्यवस्थायां **"पुगन्तलघूपधस्य च"** (७-३-८६) इति गुणश्चेत् क्रियेत, पुनः पाक्षिकह्रस्वः क्रियते चेदपि **"अदिदेपत्"** इत्यनिष्टरूपदुर्वारम्। अत्र चङ्परकणिचि परे विहितः उपधाह्रस्वः णिज्मात्रनिमित्तकगुणापेक्षया बहिरङ्गः। तस्यासिद्धत्वात् लघूपधागुणो न प्राप्नोतीति बहिरङ्गपरिभाषया अत्रानिष्टं वार्यते।

"दीप् णिच् चङ्" — इत्येते शब्दांशाः एतेनैव क्रमेण स्थिताः सन्तः उपधाह्रस्वस्याङ्गानि भवन्ति, **'भ्राजभासे'**ति-सूत्रानुरोधेन। उपधाह्रस्वे कृते "दिप् णिच् चङ्" — इति दशायां "दिप् णिच्"इत्येतौ शब्दांशौ तथैव वर्तमानौ लघूपधगुणस्य अङ्गे स्तः। अङ्गं च नाम विध्युपकारकः शब्दांशः। यथा अव्यवहितपौर्वापर्येण वर्तमानौ इगचौ यण्विध्युपकारकशब्दांशौ (इको यणचि इत्यत्र)। सर्वत्रापि प्रत्ययादेशागमविधिवाक्ये विधिः, विध्यङ्गं चेति भागद्वयं पाणिनिः प्रोवाच। प्रकृते लघूपधगुणस्य अङ्गसमुच्चयः उपधाह्रस्वाङ्गसमुच्चयस्य अन्तर्वर्तत इति कृत्वा लघूपधगुणोऽन्तरङ्गः।

ग्रामणिपुत्रः, कार्तिः, उपेयाज, पचावेदम्, नार्पत्यः, नार्मतः इत्यादीन्युदाहरणानि बहिरङ्गासिद्धत्वेन साध्यन्ते । तत्र सर्वत्रापि जातबहिरङ्गासिद्धत्वमन्तरङ्गस्य प्रवृत्तिं प्रतिबध्नाति ।

यथा "कोऽसिचत्" इत्यादौ **"अन्तादिवच्च"** (६.१.८५) इत्यनुशासनानुरोधेन एकादेशनिष्पन्नस्य ओकारस्य परादिवत्वात् षत्वं प्राप्तम्, एवं उपेयाज, पचावेदम् इत्यादावपि अभ्यासह्रस्वत्वम् एत ऐत्वमित्यादीनि प्राप्तानि । षत्वे तुकि च कर्तव्य एकादेशस्यासिद्धत्वं विधाय यथा षत्वप्राप्तिः पाणिनिनैव साक्षात् वारिता, न तथा अभ्यासह्रस्वत्वादिवारणं कृतम् ।

यदि हि पदसंस्कारपक्षमाश्रित्य "पचावेदमि"त्यादीनि साधयितुं शक्येरन् तर्हि तेनैव पक्षेण 'कोऽसिचत्' इत्याद्यपि सिध्यतीति षत्वतुकोरसिद्धवचनं पाणिनेश्नर्थकं स्यात् । तस्मात् षत्वतुकोरसिद्धवचनं बहिरङ्गासिद्धत्वस्य उपलक्षणं भवतीत्यास्थेयम् ।

अथ जातबहिरङ्गासिद्धत्वे सर्वत्र आश्रीयमाणे बहूनीष्टरूपाणि न सिध्येयुः । यथा अक्ष-दिव् + क्विप् + सु इति स्थिते **"दृच्छ्वोः शूडनुनासिके च"** (६-४-१९) इत्येनन क्विपमाश्रित्य वकारस्य ऊठ् क्रियते । बहिरङ्गस्य तस्यासिद्धत्वात् तदाश्रयो यणादेशो न सिध्यति । धात्वन्तर्गतवर्णाश्रयत्वाद् यणादेशोऽन्तरङ्गः । ऊठ् तु बहिःस्थितक्विबाश्रयत्वात् बहिरङ्गः ।

एवं क्ष्माय्-धातोः णिचि **"अर्तिह्रीव्लीरीक्नूयीरक्ष्मामाय्यातां पुण् णौ"** (७-३-३६) इति सूत्रेण पुगागमे "लोपो व्योर्वलि" (६-१-६६) इति यलोप इष्यते । किन्तु बहिःस्थितणिजाश्रयपुको बहिरङ्गतया असिद्धत्वात् वर्णमात्राश्रयो यलोपो न सिध्यति ।

एवं पपुषः, यूनः, इच्छति, या, द्वे-इत्यादीनि इष्टरूपाणि न सिध्यन्ति बहिरङ्गपरिभाषायाः सत्वे ।

बहिरङ्गासिद्धत्वेन सम्भवतां दोषाणां परिहाराय **"नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः"** इति परिभाषासम्प्रदाये स्वीकृताऽस्ति ।

अजानन्तर्ये अन्तरङ्गे बहिष्ट्वं न प्रकल्पते इत्यर्थः परिभाषायाः । बहिष्ट्वं - बहिरङ्गत्वम् । अचः आनन्तर्ये सति यदन्तरङ्गं प्रवृत्तिमर्हति तत्र बहिरङ्गस्य बहिरङ्गत्वं नेति भावः । उद्देश्यभूतस्य अचः निमित्तं प्रति यत्र आनन्तर्यम् अन्तरङ्गप्रवृत्तये आवश्यकं तत्र बहिरङ्गासिद्वत्वं नास्तीति निष्कृष्टः परिभाषाद्यः नागेशादिभिरुन्नीतः । यणप्येवमर्थ-निष्कर्षे सति अक्ष दिव् क्विप् = अक्ष दिऊक्विप्-इत्यादौ ऊठः बहिरङ्गासिद्धत्वाभावात् यणादेशः सिध्यति तथापि अक्षद्य् ऊ क्विप् इति यणादेशे कृते तु "लोपोव्योर्वलि" इति यलोपः प्राप्नोत्येव, यलोपं प्रति बहिरङ्गासि-द्धत्वस्य तेन निष्कर्षेण अवारणात् ।

तस्मात् "तस्मिन्नतरङ्गे कृते पुनः यदन्तरङ्गं प्राप्तं तत्रापि बहिरङ्गासिद्धत्वं नास्ति" — इति परिभाषार्थे पुनरपि दलं निवेशितं नागेशेन ।

"नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः" — इति वाक्यं शब्दमर्यादया तादृशं परिष्कारं न सहते वस्तुतः । किञ्च यथा कथञ्चित् परिष्कारे कृतेऽपि सर्वदोषपरिहारो न सम्पाद्यते । यथा — या, द्वे इत्यादौ बहिरङ्गस्य त्यादाद्यत्वस्य

असिद्धत्वं न नाजानन्तर्यवाक्येन वार्यते । अतिव्याप्तिरपि, यथा — ग्रामणिपुत्र इत्यत्र इष्टं **"इको ह्रस्वोऽङ्यो गालवस्य"** (६-३-६१) इति बहिरङ्गह्रस्वस्य असिद्धत्वं व्याहन्यते नाजानन्तर्यन्यायेन ।

नागेशस्तु नाजानन्तर्यन्यायस्य प्राचीनोक्तमर्थं तिरस्कृत्य, परिष्कृतमर्थमाविष्कृत्य, अथापि अव्याप्त्यतिव्याप्त्योः सम्भवात् सर्वथा न्यायमिमं प्रत्याख्यातवान् । एतत्परिभाषाज्ञापकेन हि बहिरङ्गपरिभाषायाः अनित्यत्वमेव बोध्यते इति च स समादधौ ।

यस्मिन् लक्ष्ये जातबहिरङ्गासिद्धत्वेनानिष्टमापाद्यते तत्र तस्या अव्यापारः । यत्रैव इष्टं सम्पाद्यते तत्रैव परिभाषा व्यापारणीया इति सम्प्रदाये स्थिता रीतिः ।

लक्षणैकचक्षुषां तु रीतिरियं नालम्बनयोग्येति कृत्वा जातबहिरङ्गासिद्धत्वस्वीकारे सम्भवतां दोषाणां कार्त्स्न्येन कश्चन समाधिरिहावतार्यते ।

अन्तरङ्गबहिरङ्गपदस्थेन अङ्गशब्देन विधायकवाक्येषु विध्युपकारकत्वेन वर्णिताः शब्दांशाः गृह्यन्ते । यथा **'इको यणचि'** इति पाणिनिवाक्ये इक्, अच् च यणादेशविध्युपकारकत्वेन प्रोक्तौ । प्रायेण तृतीयान्त पञ्चम्यन्तषष्ठ्यन्तसप्तम्यन्तैः अङ्गानि निर्दिश्यन्ते पाणिनीये ।

अन्तरङ्गविधावुपकारकत्वेनोपात्तः यः = कश्चन शब्दांशः बहिरङ्गशास्त्रविधेयः चेत् तस्यासिद्धत्वं परिभाषया प्रतिपाद्यते । अक्ष दि ऊ क्विप् इत्यत्र यणादेशविध्युपकारकशब्दांशः अच्, बहिरङ्गविधेयः ऊठ् भवति । अतः तस्यासिद्धत्वम् ।

"सप्तम्यन्तनिर्दिष्टः विध्युपकारकशब्दांशः बहिरङ्गशास्त्रविधेयः चेदपि तस्य असिद्धत्वं नास्ति" — इति स्वीकारेण जातबहिरङ्गासिद्धत्वस्य सर्वे दोषाः परिहृता भवन्ति । तथा हि — अक्षद्यूरित्यादौ अन्तरङ्गयणादेशे कर्तव्ये बहिरङ्गशास्त्रनिष्पादितोऽपि ऊठ्, "अचि" — इति सप्तम्योपात्तत्वात् न असिद्धः ।

नन्वेवमपि या द्वे इत्यादौ बहिरङ्गस्य त्यदाद्यत्वस्य अन्तरङ्गशास्त्रे सप्तम्युपात्तत्वाभावात् असिद्धत्वं तदवस्थमेवेति चेन्न । **"तद्वानासाम्"** (४-४-१२५), "तदस्यां प्रहरणम्..." (४-२-५७), **"घञः साऽस्यां क्रिया..."** (४-२-५८) इत्यादिसूत्रेषु आसां, अस्यां, सा-इत्यादिनिर्देशात् त्यदाद्यत्वस्य टाब्विधिं प्रतिसिद्धत्व ज्ञापनात् ।

तस्मात् "पूर्वनिमित्तम्, उद्देश्यं, परनिमित्तम्" इति त्रिके परनिमित्तं बहिरङ्गशास्त्रनिष्पादितमपि सिद्धमेव, उद्देश्यपूर्वनिमित्तयोरेव जातबहिरङ्गासिद्धत्वमित्येवं असिद्धपरिभाषायां प्रवृत्तिसङ्कोचकल्पनेन नाजानन्तर्यपरिभाषां विनैव बहिरङ्गपरिभाषा सुस्था भविष्यतीति विद्वांसो विभावयन्तु ॥

। शम् ॥

अवलम्बभूतानां ग्रन्थानां सूचिका :—

१. प्रदीपोद्योतविशिष्टं महाभाष्यम् । २. परिभाषेन्दुशेखरः ।

३. वाक्यार्थचन्द्रिका — परिभाषेन्दुशेखरव्याख्या ।

४. "असिद्धपरिभाषायाः समग्रमध्ययनम्" — अप्रकाशितः शोधप्रबन्धः

विश्वसंस्कृतौ निरुक्तस्य छात्राचारः

सन्तोषकुमारपाण्डेयः

छात्रशब्दश्छत्रशब्दात् 'छत्रादिभ्यो णः' इति सूत्रेण "ण" प्रत्ययेन निष्पन्नो भवति ।[१] गुरोर्दोषाणामावरणं छत्रम्, छत्रं शीलमस्येति छात्रः ।[२] छात्राः स्वसंस्कारयोगेन गुरोः प्रदत्तज्ञानेन च तेषां दोषावरणशीलसमन्विता भवन्ति । आचारशब्दः आ + चर् + घञ्[३] प्रत्ययेन निष्पन्नो व्यवहारस्य सदाचरणविशेषस्य च वाचको विद्यते । छात्राणामाचारश्छात्राचार इति । छात्रस्य पार्यायभूतशब्दः शिष्योऽपि शिष्यतेऽसाविति शास् धातोः 'एतिस्तुशासुवृदृजुषः क्यप्'[४] इत्यनेन क्यपि निष्पद्यते । यथा शिष्यः शासनार्हः उपदेशार्हस्तथैव छात्रोऽपि शिष्यते, शासनार्हः उपदेशार्हश्च विद्यते ।

विश्वसंस्कृतौ छात्राणामुपलब्धिर्विद्यते । प्रायः सर्वेषु देशेषु शासनार्थमुपदेशार्थञ्च शिष्याः प्राचीनकालादेव प्रयुक्ता आसन् । वर्तमानकालेऽपि ते उपदिष्टा भवन्ति, शिक्षिता भवन्ति । ज्ञानेनैव बालकानां द्वितीयं जन्म भवति अत एव ज्ञानदाताऽपि पिता कथ्यते ।[५] जनकः पिता केवलं जन्म ददाति परं ज्ञानदानेन गुरुस्तत्र जन्मनः सार्थकतां प्रापयति । 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति कथनं सर्वथा सत्यं वर्तते । अत एव सर्वेषु देशेषु बाल्यकालादेव शिक्षाया व्यवस्था भवति । बालकः प्रथमं तु गृह एव पारिवारिक-पाठशालायां काञ्चित् शिक्षां गृह्णाति । वक्तुं, वर्णान् शब्दान् वा उच्चारयितुं, चलितुं, पदार्थानवगन्तुं तत एव जानाति । तदा तु परिवारस्य सदस्या एव गुरवो भवन्ति, येषामाचरणेनापि स शिक्षां गृह्णाति । भगवद्गीतायां कथितमस्ति यत् श्रेष्ठो ज्येष्ठो वा पुरुषो यद् यदाचरति तत्तदेवान्ये जना अपि आचरन्ति । तस्य श्रेष्ठस्याचरणेन यत्प्रमाणितं भवति लोका अपि तदेवाचरन्ति ।[६]

भारतीया संस्कृतिः प्रायेणातिप्राचीना वर्तते । तस्या गुम्फनं वेदादिसंहितासु ब्राह्मणारण्यकोपनिषदादिग्रन्थेषु षडङ्गेषु च विशेषरूपेण प्राप्यते । भारतीयायाः संस्कृतेश्चित्रं यादृशं तेषु प्राचीनग्रन्थेषु चित्रितमस्ति न

---

१. अष्टाध्यायी-४.४.६२

२. सिद्धान्तकौमुद्याम्-२६४ पृष्ठे

३. हलायुधे-१४७ पृष्ठे

४. अष्टाध्यायी-३.१.१०९

५. जनकश्चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ — चाणक्यनीतौ ५/२२

६. यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ — भगवद्गीतायाम् - ३/२

तथान्येषु सांस्कृतिकसाधनेषु । तेषु ग्रन्थेषु ज्ञानतत्त्वैः सह साहित्यिक- राजनीतिक-धार्मिकार्थिकसांस्कृतिकादितथ्यान्यपि निबद्धानि विद्यन्ते । वेदादिग्रन्थेषु भारतीयानामादर्शभूता व्यवहारा विशेषेण प्राप्यन्ते । भारतीयच्छात्राणामादर्शान्विता आचाराश्चापि तत्र प्राप्यन्ते। विश्वसंस्कृतौ भारतीयच्छात्राणामाचाराः सामान्येनानुकृताः अनुक्रियन्ते च ।

अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्त[१] मिति । निरुक्तस्य वेदाङ्गत्वं सुविदितम् । 'निरुक्तं श्रोत्रमुच्यत'[२] इत्यनेनाङ्गेषु श्रोत्रस्य या स्थितिः सा स्थितिर्वेदाङ्गेषु निरुक्तस्यापि दृश्यते । श्रोत्रेण संबद्धाः सन्ति शब्दाः । निघण्टौ संकलितानां वेदादिशब्दानां निर्वचनमेव निरुक्तस्य विषयो वर्तते । निरुक्तस्य मूलप्रयोजनमपि निर्वचनं विद्यते । तत्र निर्वचनेऽर्थावबोधनक्रमे सामाजिकानि चित्राणि प्रकाशितानि भवन्ति । तेषु सामाजिकचित्रेषु छात्राचारविषये यच्चित्रं तत्र प्राप्यते तस्याचारचित्रस्य विश्वसंस्कृतौ कीदृशः प्रभावो विद्यते इति शोधपत्रेऽस्मिन् प्रस्तूयते —

आचार्यशब्दस्य निर्वचने यास्केनाचारशब्दो विवेचितः आचार्यः कस्मात्? आचार्यः आचारं ग्राहयति सदाचारं शिक्षयति । [३] सदाचारग्रहणाय के छात्रा योग्याः सन्ति तेषामाचरणञ्च कीदृशं भवेदिति निरुक्ते चित्रितमस्ति । तत्र छात्राणामाचारप्रदर्शने छात्राणां निम्नलिखिता आचारा व्यपदिष्टाः—

उपसन्नता — उपसन्नशब्दः उप + सद् + क्त प्रत्ययेन निष्पन्नो भवति । उपसन्नस्यार्थो भवति शिष्यभावमास्थाय छात्राणां गुरोः समीपे गमनम् । श्रद्धावन्तो गुरोर्निकटभूता हि शिष्या उपसन्नपदवाच्या भवन्ति । उपसन्नभावस्तु शिष्यलक्षणेष्वेकः । निरुक्ते प्रतिपादितमस्ति श्रद्धया अग्निः समिद्ध्यते श्रद्धया च हविः हूयते । भागधेयस्य श्रद्धैव प्रधानमङ्गमस्ति । [४] अतः उपसन्नता छात्राचारेषु प्रधानाङ्गभूता विद्यते ।

अनसूयता — परापवादशीलो निन्दकश्चासूयको भवति । नासूयकोऽनसूयकः । परनिन्दनं छात्राणां प्रतिकूलाचरणं विद्यते । यो हि परनिन्दकः स असूयकः छात्राणां कृते परनिन्दाचरणमशोभनं भवति । परनिन्दारहितस्य शोभनाचारयुक्तस्य छात्रस्य सर्वत्र प्रशंसा भवति । परनिन्दायां गुरोर्दोषप्रकाशनमपि विद्यते । यो हि छात्रो गुरोर्दोषं प्रकाशयति सोऽपि निन्दितोऽसूयको भवति । निरुक्ते गुरो-र्निन्दकोऽसूयको विद्यते । तत्र वर्णितमस्ति यद् गुरोद्रोहः कदापि न कर्त्तव्यः ।[५] गुरोर्निन्दकश्छात्रः उपदेशाय योग्यो न विद्यते ।[६] अत एवानसूयताऽपि छात्राचरणे गण्यते । निन्दारहिताचरणमस्ति मूलतोऽनसूयाचरणम् ।

---

१. ऋग्वेदभाष्यभूमिकायां सायणाचार्यः ।

२. छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ पा.शिक्ष — ४१-४२

३. निरुक्ते - १/१

४. श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः श्रद्धां भगस्य मूर्धनि वचसा वेदमामसि ॥ — ऋग्वेदे — १०.१५१.१ श्रद्धावान् लभते ज्ञानम् - भगवद्गीतायाम् — ४/३९

५. निरुक्ते — २/१

६. विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् । निरुक्त - २/१ मनुस्मृतौ - २/११४ (तुलनीयम्)

ऋजुता — कपटाचरणरहितः सरलः ऋजुर्भवति । यो हि कपटाचरणयुक्तो विद्यते स कुटिलः कदापि विद्याग्रहणाय नोपयुक्तः । ऋजवे विद्यादानं कर्त्तव्यमिति निरुक्तवचनेन छात्राणामाचरणेषु ऋजुता प्रशस्ता । विद्या ददाति विनयमिति हितोपदेशवचनेन विनीतता एव ऋजुता वर्तते ।[१] ऋज्वाचरणं छात्राचारेषु महत्त्वपूर्णम् ।

यतिभावनम् — यतते चेष्टते इति यतिर्जितेन्द्रियस्य बोधकः । यद्यपि यतिशब्दः परिव्राजकस्य कृतेऽपि प्रसिद्धः परमत्र यतिशब्दो ब्रह्मचारीणां कृते प्रयुक्तो वर्तते । यो हि संयतेन्द्रियो ब्रह्मचर्यव्रतपालकः स एव यतिः । इन्द्रियनिग्रही ब्रह्मचर्योपपन्नः शिष्यः उपदेशग्रहणाय योग्यः । ब्रह्मशब्दो ज्ञानस्य, सत्यस्य, व्रतस्य, यज्ञस्य परब्रह्मणश्च वाचकः । एतेषां विषयाणामाचरणकर्त्ता ब्रह्मचारीति । ब्रह्माचरणं छात्राचरणमस्ति । यतिभावनं संयतेन्द्रियताया आचरणम् । अध्ययनकाले इन्द्रियनिग्रहश्छात्राणामाचारः । अतः संयतेन्द्रियाणां यादृशमाचरणं तादृशमेवाचरणं सर्वत्र छात्रैराचरितव्यम् ।

मेधाग्रहणम् — मेधाग्राहको मेधावी कथ्यते । मेधाऽस्त्यस्येति मेधावी शब्दो मेधा + विनि प्रत्ययेन निष्पन्नो भवति ।[२] मेधा धारणावती बुद्धिरस्ति/सा अथर्ववेदे ब्रह्मण्वती बुद्धिरपि प्रोक्ता । यस्य पार्श्वे मेधा विद्यते स मेधावीति । वैदिक ऋषयस्तु मेधाया उपासनाञ्चक्रुः ।[३] अनेनैव कारणेन ते सर्वज्ञा बहुज्ञाश्चासन् । उपनयनकाले गुरोः समीपं-गतश्छात्रोऽग्निं प्रार्थयति - हे अग्ने ! यां मेधां पितरो देवगणाश्चोपासते तया मेधया मामद्य मेधाविनं कुरु ।[४] मेधावी छात्रः उपदेशग्रहणाय प्रशस्तः । प्राचीनकाले मेधापरीक्षणानन्तरमेव छात्रा गुरुकुले स्थानं प्राप्नुवन्ति स्म । मेधाग्रहणं तु सर्वत्र प्रासङ्गिकमस्ति । यो हि मेधावी स ज्ञानानि धारयितुं समर्थो भवति । अतो मेधाग्रहणमपि छात्राचारे प्रथितम् ।

तपश्चरणम् — तपसश्चरणं तपश्चरणम् । तपश्चरतीति तपस्वी । तपस्वीशब्दो तपस् + विनि प्रत्ययेन निष्पन्नो भवति ।[५] तपस्वी शब्दस्यार्थो भवति तपोऽस्यास्तीति अर्थात् तपोयुक्तः । छात्राणामध्ययनं तप इत्यनेन तपसः आचरणे संलग्नश्छात्रस्तपस्वीति । तपसा महर्षिः पाणिनिः शिष्यत्वग्रहणं विनाऽपि शिवं प्रसाद्य माहेश्वरसूत्राणि लब्धवान् ।[६]इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानीति सिद्धान्तकौमुद्याम् ।[७] भवतु नाम शङ्करोऽपि तस्य गुरुर्यतो हि ज्ञानमिच्छेत्तु शङ्करादिति वचनं विश्रुतमेव ।[८] आदिगुरुः शंकरो वर्तते । अत्रस्तपश्चरणं छात्राणां

१. विद्या ददाति विनयं विनयाद् याति पात्रताम् पात्रत्वाद् । धनमाप्नोति धनात् धर्मस्ततः सुखम् ॥ हितोपदेशे - १/६

२. अस्मायामेधास्रजो विनिः — अष्टाध्यायी - ५.२.१२१

३. मेधामहं प्रथमां ब्रह्मण्वतीं ब्रह्मजूतामृषिष्टुताम् ।
प्रपीतां ब्रह्मचारिभिर्देवानामवसे हुवे ॥ — अथर्ववेदे - ६.१०८.२

४. यां मेधां देवगणाः पितरश्चोपासते ।
तया मामद्यमेधयाऽग्ने मेधाविनं कुरु ॥

५. हलायुधे - ३२५ पृष्ठे

६. नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् उद्धर्त्तुकामान् सकलार्थसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

७. सिद्धान्तकौमुद्याम् — १ पृष्ठे

८. आरोग्यं भास्करादिच्छेत् धनमिच्छेद्हुताशनात् ।
कैवल्यं केशवादिच्छेत् ज्ञानमिच्छेत्तु शंकरात् ॥ — (मत्स्यपुराणे) - हलायुधे - ७४४ पृष्ठे

कृते अध्ययनव्रतस्याचरणमेव मूलप्रयोजनमस्ति। यथा निरुक्ते अध्ययनव्रतस्य पालनार्थं छात्राणां कृते एतत् आवश्यकमिति वर्णितं तथैव सर्वत्र छात्राणां कृतेऽध्ययनव्रतस्य परिपालनमावश्यकमस्ति। व्रतमिदं नूनमेव छात्राणां तपश्चरणमस्ति।

शुचिता — शुचिशब्दः शुच् + इन् प्रत्ययेन निष्पन्नो भवति।[१] शब्दोऽयं पवित्रतायाः शुद्धस्य च वाचको विद्यते। शुचिताया रूपद्वयं प्राप्यते — शारीरिकं मानसिकञ्च। तत्र शरीरशुद्धौ स्नानादिकी क्रिया सर्वथा विहिता। न केवलं भारतेऽपितु अन्यत्रापि शरीरशुद्ध्यर्थं स्नानादिकी क्रिया अन्या वा क्रिया प्रचलति। अन्यक्रियायां वस्त्रादिधारणं छात्रोपयुक्तं देशकालपात्रानुरूपं विधिक्रियाया निर्धारणमस्ति। गुरुकुलब्रह्मचारिणः स्नानादिकीं क्रियां यथाकालं सम्पाद्य गुरोः समीपं गच्छन्तीति भारतीया परम्परा। वर्तमानकालेऽपि छात्राः स्नानादिकीं क्रियां कृत्वा शुद्धवस्त्रान्विता भूत्वा गच्छन्ति विद्यालयभवनमिति शारीरिकशुद्धिः। सन्ध्यावन्दनादिक्रियाभिर्यज्ञादिभिश्च जायते मानसिकी पवित्रता। स्वस्थशरीरे स्वस्थमानसस्य निवासो भवतीति पाश्चात्या अपि स्वीकुर्वन्ति। पवित्रताया आचरणं छात्राणां कृते आवश्यकमिति निरुक्ते सङ्केतितमस्ति।[२] शुचिश्छात्रो भवति विद्याग्रहणयोग्यस्तथा शुचिता तस्याचरणं विद्यते।

अप्रमत्तता — प्रमत्तशब्दः प्र + मद् + क्त प्रत्ययेन निष्पन्नो भवति। अप्रमत्तशब्दे 'अ' नञर्थस्य वाचकः। तलन्तान्तास्तु गुणबोधकाः। प्रमत्तोऽनवधानस्याप्रमत्तोऽवधानस्य च वाचको विद्यते। विद्याग्रहणे मानसिकावधानस्य स्थानं नितरां महत्त्वपूर्णमस्ति। मनस्तु चञ्चलं वर्तते तथापि तस्योपरि नियन्त्रणं भवति।[३] प्रमत्तशब्दस्य प्रयोगः कालिदासेनापि मेघदूते कृतः प्रमादरूपेऽर्थे।[४] येऽप्रमत्ता भवन्ति ते स्व-विद्याग्रहणे योग्या भवन्ति। प्रमादस्याचरणं छात्राणां कृते नैव शोभनं भवति। छात्राः सर्वदाऽप्रमत्ता भवेयुः। सावधानेन मनसा विद्याग्रहणे साफल्यमधिगच्छन्ति छात्राः। अतोऽवधानस्याचरणमपि छात्रैः सर्वत्र विधातव्यम्।[५] अवधानता अप्रमत्ततायाः पर्यायभूता। मनस एकाग्रतायामवधानताया आगमनं भवति।

अद्रोहाचरणम् — द्रुह् + घञ् प्रत्ययेन द्रोहशब्दो निष्पद्यते।[६] द्रोहोऽनिष्टचिन्तनम् द्रोहोऽस्ति अस्येति द्रही। द्रोही द्रोहाचरणं करोति। यो हि अद्रोहाचरणं करोति स अद्रोही। यो द्रोहं न करोति सोऽपि अद्रोहीति।

१. हलायुधे — ६६५ पृष्ठे

२. निरुक्ते — २/१

३. चञ्चलं हि मनः कृष्ण ! प्रमाथी बलबद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥ — श्रीमद्भगवद्गीतायाम् — ६/३४।
असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥ तत्रैव - ६/३५।

४. कश्चित्कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः — मेघदूते – १/१

५. यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्।
यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्॥ — निरुक्ते - २/१

६. द्रुह् भावे घञ् - हलायुधे - ३६६ पृष्ठे।

अद्रोही इत्यत्र 'अ' नञर्थावबोधकः । केभ्योऽपि द्रोहो नैव कर्त्तव्यः । ज्ञानदातुर्गुरोस्तु कदापि द्रोहो नैव कार्यः । [१] निरुक्ते प्रतिपादितमस्ति यो गुरुः सत्येन ब्रह्मणाऽदुःखं कुर्वन्नमृतं ज्ञानं सम्प्रयच्छति तं गुरुं मातरं पितरञ्च मन्येत । तस्मै मातृपितृभूताय गुरवे कदापि विद्यार्थिभिः न द्रुह्येत । [२] छात्रैरनिष्टचिन्तनं कदापि नैव कर्त्तव्यम् । अद्रोहाचरणमेव छात्राणां कृते सर्वथोपादेयमस्ति । अद्रोही एव छात्रः उपदेशग्रहणाय योग्यो भवति ।

ज्ञाननिधेः रक्षणम् — निधि शब्दो नि + धा + कि प्रत्ययेन निष्पद्यते । ज्ञानस्य निधिः ज्ञाननिधिर्भवति । निधिस्तु कोषस्य वाचकः । यो हि निधिं पाति स निधिपः । ज्ञाननिधेः रक्षको निधिपो वर्तते । यो हि ज्ञाननिधेः रक्षको भवति स एव विद्याग्रहणयोग्योऽस्ति । तस्मै उपदेशः दातव्यः । ज्ञानस्य निधिर्नित्यं वर्धते प्रयोगेण । [३] ज्ञानं प्राप्य तस्य प्रयोगोऽपि कर्त्तव्यः । विद्या चतुर्भिः प्रकारैः सफला भवति । अधीतिबोधाचरणप्रचारणैर्भवति[४] ज्ञाननिधेः रक्षणम् । छात्रा अध्ययनानन्तरं विषयाणां बोधेऽपि संलग्ना भवेयुः । विषयबोधानन्तरं तस्याचरणमपि विद्याग्रहणे आवश्यकमस्ति । अधीतस्य ज्ञानस्य प्रचारणं पूर्णज्ञानाय ज्ञानप्रयोजनाय चापेक्षितम् । यदा चतुर्भिरुपायैर्विद्या परिपूर्णा भवति छात्राणां विद्यावतां तदाचरणप्रचारणादिकमपि कर्त्तव्यमेव तैः । एभिरध्ययनाध्यापनाचरणप्रचारणैर्विद्यानिधेः रक्षणं भवति । अतो ज्ञाननिधेः रक्षकाय शिक्षादानं कर्त्तव्यम् ।[५] छात्राणामाचरणं ज्ञाननिधेः रक्षणार्थमेव विद्यते । छात्रैस्तथाविधमाचरणीयं येन ज्ञाननिधेर्भारत्या रक्षणं भवेत् ।

उपर्युक्तनिरुक्तवचनेन स्पष्टं भवति यद् विद्याग्रहणाय योग्याश्छात्राः कैश्चिदाचरणैर्युक्ता भवन्ति । तेषामाचरणं ज्ञानप्राप्तये कीदृशं भवेद् येनाचरणेन शिष्याः शिष्टा भवेयुर्योग्या नागरिका भवेयुर्ज्ञानवन्तो भूत्वा विद्यानिधेः रक्षां कुर्युः । भारतीयशिष्याणां कर्त्तव्यं वर्णयता निरुक्ताचार्येण यास्केन न केवलं भारतीयच्छात्राणां कृते एतादृशा आचाराः प्रदर्शिता अपि तु विश्वस्मिन् विश्वे समाश्रितानां समेषां छात्राणां कृते आचारा निर्धारिताः । निरुक्ते वर्णिता आचारा सर्वैश्छात्रैः पालनीया येन ते ज्ञानसम्पना भूत्वा देशस्य विश्वस्य च कृते क्रियात्मिकां दृष्टिं धारयिष्यन्ति । अद्य भिन्नाचरणैश्छात्रा विध्वंसकदृष्टिं दधति येनोग्रवादस्यातंकवादस्य च प्रवृत्तिस्तेषु वर्द्धते । ज्ञातव्यमस्ति यदुग्रवादे संलग्ना ये जनाः सन्ति ते छात्रावस्थायामेवाधिकास्तिष्ठन्ति । निरुक्तप्रतिपादितैराचारैस्तेऽऽचारवन्तो भविष्यन्ति तेषां मनसि विध्वंसकभावनाया आगमनं न भविष्यति । अतः विश्वसंस्कृतौ क्रियात्मकदृष्टेर्लाभाय जनकल्याणाय राष्ट्रकल्याणाय विश्वकल्याणाय च निरुक्तप्रतिपादितानां छात्राचाराणां प्रचारः कर्त्तव्यः ।

---

१. देवद्रोहाद् गुरोद्रोहः कोटिकोटिगुणाधिकः — (कूर्मपुराणे - १) हलायुधे - ३६६ पृष्ठे

२. य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुहयेत् कतमच्च नाह ॥ — निरुक्ते - २/१

३. व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥ सुभा. पृ. ३०

४. नैषधीयचरितम् — १/४

५. यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत् कतमच्च नाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥ निरुक्ते - २/१

उत्कलप्रदेशे उपलब्धा अप्रकाशिता व्याकरणग्रन्थाः एकमध्ययनम्

प्रो. किशोरचन्द्रपाढी

उत्कलीयसंस्कृतविद्वांसः बहून् ग्रन्थान् विरचितवन्तः । संस्कृतवाङ्मयस्य समृद्धये समुन्नतये सरलीकरणाय च प्रयासं कृतवन्तः । तत्र संस्कृतवाङ्मयस्य समुन्नतये नूतनाः रचनाः विहिताः विद्वद्भिः । सरलीकरणाय उपलब्धानां ग्रन्थानामुपरि टीकाग्रन्थाः प्रणीताः । परन्तु एतेषाः ग्रन्थानां प्रकाशनमद्यापि न सञ्जातम् ।

प्राचीनकालात् उत्कलप्रदेशे व्याकरणशास्त्रस्याध्ययनाध्यापनपरम्परा प्रचलिता आसीदिति विभिन्नेष्वभिलेखेषु वर्णितमस्ति । तस्मिन् समये गोयीचन्द्र-क्रमदीश्वर-जुमरनन्दि-दुर्गासिंह-रामचन्द्राचार्य-चांगुदासादीनां व्याकरणग्रन्थाः उत्कलप्रदेशे प्रचलिताः प्रसिद्धिं च गताः । एतेषां विरचितानां ग्रन्थानां पाण्डुलिपयः उत्कलराज्यसंग्रहालये सुरक्षिताः विद्यन्ते ।

तत्र उत्कलीयवैयाकरणेषु पाटणाधीश्वरवैजलदेव-चांगुदास-प्रद्युम्नविद्याभूषण-पुरुषोत्तममिश्र-कृष्णमिश्र-लक्ष्मीधरादयः प्रसिद्धा आसन् । तैः विरचितेषु व्याकरणग्रन्थेषु वैजलकारिका-चांगुकारिका-प्रकियाप्रदीपसुबन्तप्रदीपिका-कृष्णमिश्रप्रक्रिया-नामनिर्मलदर्पणादयो ग्रन्था अन्यतमाः । एते ग्रन्थाः अधुनाऽपि अप्रकाशिताः सन्ति । एतान् विहाय बहवः टीकाग्रन्था अपि प्राप्यन्ते । एते सर्वे ग्रन्थाः राज्यसंग्रहालये संरक्षिताः सन्ति ।

अत्र शोधप्रबन्धे उत्कलप्रदेशे उपलब्धेषु अप्रकाशितव्याकरणग्रन्थेषु केषांचित् प्रमुखग्रन्थानामालोचनं क्रियते ।

१.१.१. वसुप्रहराजः—उत्कलस्य राज्ञः विक्रमकेशरीदेवस्य शासनसमये सुप्रसिद्धाः त्रयो राजकवय आसन् । ते च वसुः विशिः, चक्रपाणिश्च । तेषु वसुः यस्य नाम वसुप्रहराजः न केवलं कविरासीत्, अपि तु वैयाकरण आसीत् । तस्य कृतिषु सामान्यप्रक्रिया अथवा वसुप्रक्रिया अन्यतमा । ग्रन्थोऽयं सिद्धान्तकौमुद्याः टीकाग्रन्थः ।

वसुप्रहराजः उत्कलीय आसीत् । तस्य वंशजाः अद्यापि उत्कलप्रदेशे निवसन्ति । गञ्जाम-मण्डलस्य ब्रह्मपुरनगरसमीपे वीरजगन्नाथपुरशासने स जन्मग्रहणं कृतवान् । तस्मिन् ग्रामे तस्य नाम्ना एको संस्कृतविद्यालयः प्रतिष्ठापितः । अधुना तु विद्यालयोऽयं पुरुषोत्तमपुरं प्रति स्थानान्तरितः ।

१.१.२. वसुप्रहराजस्य समय:—विक्रमकेशरीदेव: आठगडस्य शासनभारं जगन्नाथहरिचन्दनं प्रति समर्पितवान् । तस्मिन् समये वसुप्रहराज: तस्य सभाकविरासीत् । विक्रमकेशीरदेवस्य शासनसमयो भवति वर्ष १७३७ : १७९३ वर्षन: मध्ये । अत: वसुप्रहराजस्य समयो भवति अष्टादशशताब्दी ।

१.१.३ वंशपरम्परा—रघुनाथमहापात्रो वसुप्रहराजस्य पिता आसीत् । स ज्योतिर्विद्याविशारद आसीत् । वाजपेययज्ञकर्मण्यपि कुशल: । रघुनाथस्य चत्वार: पुत्रा आसन् । तत्र वसुप्रहराज: तस्य द्वितीय: पुत्र: । वसुप्रहराजस्य एक एव पुत्र: । स भवति दयानिधितर्कपञ्चानन: । तस्योत्तराधिकारिण अद्यापि तत्र ग्रामे निवसन्ति ।

१.१.४ कृति:—वसुप्रक्रियाग्रन्थ: अनेन प्रणीत: । भाषासारल्यात् संक्षिप्तत्वाच्च उत्कलप्रदेशेऽस्य महती ख्यातिरासीत् । उत्कलप्रदेशस्य बहुषु स्थानेष्वस्य अप्रकाशितपाण्डुलिय: प्राप्यन्ते । राज्यसंग्रहालयेऽपि संरक्षिता: विद्यन्ते । सरलरीत्या पाणिनिसूत्राणां व्याख्यानं कृतमस्ति अस्मिन् ग्रन्थे । सुखेनार्थबोधाय स्थलविशेष उत्कलभाषाया अपि प्रयोग: कृत: । अस्य ग्रन्थस्य सर्वाणि प्रकरणानि नोपलभ्यन्ते । संज्ञा-परिभाषा-समास-तद्धित-तिङन्त-स्त्रीप्रत्ययप्रकरणानि उपलभ्यन्ते । अस्य ग्रन्थस्य प्रारम्भ एवं भवति—

"श्रीगणेशाय नम: ।

नारायणं नमस्कृत्य करुणावरुणालयम् ।
क्रियते बालबोधाय सामान्यप्रक्रिया यथा (मया) ॥

अथ शब्दानुशासनम् । अइउण्, ऋऌक्, एओङ्...हल् । इति प्रत्याहारसूत्राणि । (एतक हेउच्छन्ति प्रत्याहारसूत्र) ।

हलन्त्यम् । उपदेशेऽन्त्यं हल् इत् स्यात् इत्यादि ।

ग्रन्थोऽयं प्रक्रियाक्रमेण विरचित: । सामान्यरूपेण सूत्रस्यार्थ: प्रतिपादित: । तत्त्वप्रतिपादनाय शेखर इव शास्त्रार्थो नैव कृत: ।

१.२.१. लक्ष्मीधर उद्गाता—नामनिर्मलदर्पणग्रन्थस्य रचयिता लक्ष्मीधर उद्गाता । ग्रन्थोऽयं प्रक्रियाकौमुद्या: टीका । लक्ष्मीधर: उत्कलीय आसीदिति नास्ति सन्देह: । ग्रन्थस्य प्रारम्भे स स्वयमेव लिखति यत्—

गंगानारायणे नाम्नि देशे श्रीपुरुषोत्तमे ।
वेदाङ्गविद्भिर्विप्रैश्च निवासपूरिते पुरे ॥
परम्पराक्रमेणैव पितृभ्य: स्वकृतोद्भवै: ॥
कुर्वता जातुकर्णस्य गोत्रोत्पन्नेन धीमता ॥
नृसिंहोद्गातु: पुत्रेण लक्ष्मीधरद्विजन्मना ।
क्रियते बालबोधाय नामनिर्मलदर्पण: ॥

श्रीजगन्नाथक्षेत्रपपूरित: १५ किलोमिटरदूरे चन्दनपुरग्रामस्य समीपे गंगानारायणपुरनामधेयो ग्रामो विद्यते । भार्गवीनद्या: तीरे विद्यमानोऽयं ग्राम: । तत्रैव नृसिंहस्य पुत्र: लक्ष्मीधरो निवसति स्म । ग्रामस्य मध्यभागे

"उद्गाता पडिआ" नामको भूभागो विद्यते । अधुना तत्र संघकार्यालयो विद्यते । नामनिर्मलदर्पणं विहाय अस्य अन्या काऽपि कृतिः नोपलभ्यते ।

१. नामनिर्मलदर्पणः— अस्य ग्रन्थस्य बह्व्यः पाण्डुलिपयः राज्यसंग्रहालये सुरक्षिताः विद्यन्ते । प्रक्रियाकौमुद्याः सर्वे विषयाः अत्र ग्रन्थे व्याख्याताः । ग्रन्थस्य विचारविषयः प्रतिपादनशैली च तस्य वर्णनात् ज्ञातुं शक्यते ।

पत्रम्-१. "त्रिभिः कुलकम् । अथ प्रत्याहारसूत्राणि । अइउण्, ऋऌक...हल् । छन्दोवत् सूत्रामिण भवन्ति" इति न्यायेन अइउण् इत्यादौ सन्धिर्न भवति । एभिरेकचत्वारिंशत्प्रत्याहारसूत्राणां प्रत्याहाराक्षराणि ज्ञेयानि । एतानि सूत्राणि महेश्वरेण पाणिनये उपदिष्टानि । तथा चोक्तम्—

> **"येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।**
> **कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥"**

हकारादिषु अकारः उच्चारणार्थः । अकारः इति । वर्णात् कारप्रत्ययः । हकारादिषु हयवरट् इत्यादिषु य अकारः स उच्चारणार्थः । लण्मध्ये यः अकारः स इत्संज्ञकः । उपदेशेऽजनुनासिक इत् ।

पत्रम्-२. वर्णानां सदुकृदुपदेशाद्यं उपदेशे यत् अनुनासिकं तस्य इत्संज्ञा स्यादित्यर्थः । ननु चात्र सर्वत्र शुद्धोऽच् पठ्यते नानुनासिक इत्यत आह—**प्रतिज्ञा इति ।** प्रतिज्ञानुनासिक्याः पाणिनीयाः । पाणिनीया यत्र आनुनासिक्यं प्रतिजानते तत्रैव तद्रूपत्वमपि पाठ्यमानमपि भवति नान्यत्र । उपदेशशब्दार्थमाह—**धात्विति ।**

रामचन्द्राचार्यविरचितायाः प्रक्रियाकौमुद्याः बहवः टीकाग्रन्था आसन् । तेषु विट्ठलाचार्यस्य प्रसादटीका प्रथमस्थानं भजते । तदनन्तरमस्य नामनिर्मलदर्पणस्य स्थानं नूनं विद्यते । तस्मिन् समये उत्कलप्रदेशे अस्य महती प्रसिद्धिरासीत् । सूत्रस्य व्याख्यानावसरे महाभाष्य-काशिका-वाक्यपदीय-कातन्त्रादीनां मतं समुद्धृतम् ।

२.१.१ महामहोपाध्यायकृष्णमिश्रः— उत्कलप्रदेशस्यापरो वैयाकरणः आसीत् कृष्णमिश्रः । खोर्दामण्डलस्य राज्ञा गजपतिवीरकेशरीदेवेन "महामहोपाध्यायः" इति उपाधिः प्रदत्तः ।

२.१.२ समयः— तेन प्रणीतेषु ग्रन्थेषु तस्य कालः कुत्रापि नोल्लिखितः । परोक्षप्रमाणमाश्रित्य कालः निर्णेतुं शक्यते । तस्य कालसर्वस्वग्रन्थे गदाधरराजगुरोः योगसार-दीक्षासारग्रन्थयोः नामोद्धरणं कृतम् । गदाधरराजगुरुः हरेकृष्णदेवस्य शासनसमये काव्यानि विरचितवान् । तस्य समयः १७१६-१७२० (ए.डि.) । अतः कृष्णमिश्रस्य समयः अष्टादशशताब्द्याः द्वितीयचरणे आसीत् ।

२.१.३. वंशपरम्परा— तस्य जन्मस्थानविषये कोऽपि संकेतो न प्राप्यते । साहित्यरत्नाकरग्रन्थस्योपरि सुधाकरनाम्नी एका टीका तेन विरचिता । तत्र तस्य वंशपरम्पराविषये काचित् सूचना प्रदत्ता । तद्यथा—

> **नानाशास्त्रविशारदो द्विजवरो यो रामनामा महान्**
> **यज्वा कौत्सकुलावली हिमकरः प्रादुर्बभूवोत्कले ।**

कृष्णस्तत्तनयात्मजः कविसुधीः साहित्यरत्नाकरा-
लङ्कारस्य सुधाकराख्यममलं व्याख्यानमाख्यात्यसौ ॥

प्रथमाध्यायस्यान्तिमे श्लोके उक्तम्—

यो विद्वत्कुलमण्डनेन जनितः कौत्सान्वयद्योतिना
यो रामाह्वयदीक्षितेन परमानन्दाख्यमिश्रो महान् ।
तत्र पुण्योत्थसुतस्य कृष्णविदुषः साहित्यरत्नाकर-
स्यालङ्कारसुधाकरे रुचिकरे पूर्णा इयं कौमुदी ॥

प्रथमश्लोकात् प्रतीयते यत् प्रसिद्धो विद्वान् कौत्सकुलोद्भवः ब्राह्मणो रामचन्द्रः कृष्णमिश्रस्य पितामह आसीत् । तेन सहृदयानन्दमहाकाव्यस्योपरि बुधनन्दिनीनाम्नी टीका विरचिता । तस्य पिता मृत्युञ्जयमिश्र आसीत् । द्वितीयश्लोकादनुमीयते यत् परमानन्दस्य पुत्रः कृष्णमिश्र इति । तस्य वंशपरम्परा एवं भवति । यथा—

मृत्युञ्जयमिश्रः

रामचन्द्रमिश्रः

परमानन्दमिश्रः

कृष्णमिश्रः

२.१.४ कृतिः— कृष्णमिश्रस्य कालसर्वस्वग्रन्थः सूचयति यत् न्यायवैशेषिक-मीमांसा-साहित्य-संहिता-गणितादिशास्त्रेषु तस्य महत्पण्डित्यमासीत् । अधुना तेन प्रणीतं ग्रन्थत्रयमुपलभ्यते । १. अलंकारसुधानिधिः, २. कालसर्वस्वम्, ३. कृष्णमिश्रप्रक्रिया । परन्तु कालसर्वस्वग्रन्थे तेन विरचितस्य शुद्धिसर्वस्वग्रन्थस्य सूचना प्राप्यते ।

२.१.५. कृष्णमिश्रप्रक्रिया— तेन प्रणीतः व्याकरणविषयकः कृष्णमिश्रप्रक्रियाग्रन्थः उत्कलराज्यसंग्रहालये संरक्षितः । इयमेका असंपूर्णा पाण्डुलिपिः । वर्द्धमानविरचितं वर्द्धमानव्याकरणमाश्रित्य लिखितोऽयं ग्रन्थः । ग्रन्थस्य प्रारम्भे उक्तं यत्—

प्रणम्य श्रीहयग्रीवं विघ्नराजं सरस्वतीम् ।
प्रक्रिया क्रियतेऽस्माभिः वर्द्धमानानुसारिणी ॥

प्रकरणस्यान्ते उक्तं यत्—"इति श्रीकृष्णमिश्रविरचितायां वर्द्धमानानुसारिण्यां प्रक्रियायां सन्धौ पञ्चसन्धिः समाप्तः"

कातन्त्रं हि व्याकरणं पाणिनीतरव्याकरणेषु प्राचीनतमम् । सर्ववर्मणा प्रणीतं व्याकरणमिदं कातन्त्र-कौमार-कलापक-सारस्वतादि संज्ञाभिरपि बुध्यते । अस्य व्याकरणस्योपरि बहवः टीकाग्रन्थाः प्रणीताः । तेषु वर्द्धमानस्य कातन्त्रविस्तरः अन्यतमः । कातन्त्रविस्तरमिममाश्रित्य कृष्णमिश्रप्रक्रिया विरचिता । ग्रन्थेऽस्मिन् संज्ञा-सन्धि-सुबन्त-तिङन्तप्रकरणानि विद्यन्ते । अवशिष्टाः विषयाः नोपलभ्यन्ते । पाण्डुलिपेः एतदंशाः विनष्टाः इति प्रतीयते । ग्रन्थस्य विषयविचारः एवं भवति यत्—

पृष्ठम्-१. श्रीगणेशाय नमः । अविघ्नमस्तु । प्रणम्य श्रीहग्रीवं.... । सिद्धो वर्णसमाम्नायः । इह शास्त्रे वर्णसमाम्नायो वेदितव्यः । वर्ण अकारादयः तेषां समाम्नायः पाठक्रमः । अ..... आ, इ, ई.......ह । डकारादिषु अकार उच्चारणार्थः । चतुर्दशादौ स्वराः । तत्र वर्णसमाम्नायविषये आदौ ये चतुर्दशवर्णास्ते स्वरसंज्ञा भवन्ति । सू—'दश समानाः' तत्र वर्णसमाम्नाये विषये आदौ दशवर्णास्ते समानसंज्ञाः भवन्ति ।

पृष्ठम्-५०. सू...क्रियावचनो धातुः । यः शब्दः क्रियां भावयति प्रतिपादयति स धातुसंज्ञः स्यात् ।

सू "प्रत्ययः परः"—प्रकृतेः परं प्रत्ययः परिभाष्यते । प्रत्ययात् प्रथमं क्रियते इति प्रकृतिः । तया प्रतीयते येनार्थः प्राधान्यत् इति प्रत्ययैरभिहितः ।

पृष्ठम्—४. सू. "समानः सवर्णे दीर्घः भवति परश्च लोपम् । समानः संज्ञको वर्णः सवर्णे परे दीर्घो भवति परश्च लोपमापद्यते । वितताङ्गुतां, तयाश्रितम्, वारीच्छति ।

ग्रन्थेऽस्मिन् आदौ सूत्रं ततः वृत्तिः, तदनन्तरं प्रक्रिया विद्यते । कातन्त्रव्याकरणस्य मूर्द्धन्यतमः प्रक्रिया-ग्रन्थोऽयम् ।

कृष्णमिश्रेण आख्यातवादः, वर्द्धमानसंज्ञाः, प्रक्रियासार इति ग्रन्थत्रयमपि प्रणीतमिति नीलमणिमिश्रमहोदयेन प्रतिपादितम् । एते त्रयो ग्रन्थाः राज्यसंग्रहालये संरक्षिताः विद्यन्ते । परन्तु कीटभक्षितत्वात् पठितुं न शक्यते । अत एव एतेषां कर्ता क इति निश्चितरूपेण किमपि वक्तुं न शक्यते ।

२.२.१ रघुनाथदाशः—उत्कलप्रदेशस्य सुमहान् संस्कृतज्ञो रघुनाथदाशः । न्याय-व्याकरण-साहित्य-कोषादिग्रन्थानां रचयितृरूपेण अस्य सुमहती ख्यातिरासीत् । विशेषतः संस्कृतव्याकरणं प्रति अस्य योगदानमतुलनीयम् ।

२.२.२. समयः—धर्मशास्त्रमाधारीकृत्य कालनिर्णयग्रन्थः रघुनाथदाशेन विरचितः । अस्याः पाण्डुलिपेः लेखकः अनन्तदाशः पाण्डुलिपेः समयं सूचयति । तेन लिखितं यत्—

"श्रीरामचन्द्रदेवस्य नृपतेश्चतुर्थेऽके कार्त्तिकमासि कृष्णे पक्षे त्रयोदश्यां तिथौ शौरिवासरे श्रीमत्कौण्डिन्यकुलसम्भूतानन्तदाशेन लिखितमिदं पुस्तकम् ।"

अनेन ज्ञायते यत् १७२८ खीष्टाब्दे पाण्डुलिपिरियं लिखिता । अतस्तस्मात् पूर्वं रघुनाथदाशस्य जन्म अभूत् । अतः अष्टादाशशताब्द्याः प्रथमचरणं भवति तस्य समयः ।

२.२.३ वंशपरम्परा—रघुनाथदाशस्य पितुः नाम वासुदेवदाशः, मातुः नाम अम्बिका आसीत् । स कौण्डिन्यकुलसम्भूत आसीत् । तस्य पिता पुरीस्थस्य श्रीजगन्नाथमन्दिरस्य मुक्तिमण्डपस्य पुराणपण्डित आसीत् । अतः रघुनाथोऽपि पुरीवास्तव्य आसीत् ।

२.२.४. कृतिः—कालनिर्णयः, भट्टिकाव्यस्य टीका, उत्पात्तरंगिणी, काव्यप्रकाशस्य टीका साहित्यभूषणम्, कारकनिर्णयः, मदनकेलिरहस्यम्, वर्द्धमानप्रकाशः, कातन्त्रविस्तराक्षेपनिगूढार्थप्रकाशनम्, सारसिद्धान्तसंग्रहः इत्यादयो ग्रन्थाः रघुनाथेन प्रणीताः ।

२.२.५.१ **वर्द्धमानप्रकाशः**—पाण्डुलिपिरियमुत्कलराज्यसंग्राहलये संरक्षिता विद्यते । असम्पूर्णा पाण्डुलिपिरियम् । अधुना अस्याः पाण्डुलिपेः पादत्रयमुपलभ्यते । यथा-संज्ञापादः, सन्धिपादः, शब्दपादः ।

२.२.५.२ **कारकनिर्णयः**—कीटभक्षिता पाण्डुलिपिरियमधुना पठनावस्थायां न विद्यते । अस्या उपसंहार एवं विद्यते यत्—

यः कौण्डिन्यकुलार्णवजनि श्रीवासुदेवाम्बिका
जातः श्रीरघुनाथनामविदितो नित्यं नृसिंहाश्रयः ।
गद्यात् पद्यमयी बहृदयमिति मुदा तेन सत्
पद्येनाप्युदपादि विशदं तत्त्वं कियत् कारके ॥

अनेन श्लोकेन ज्ञायते यत् केवलं कारकप्रकरणं विशदरूपेण विरचितम् । तेन विरचितयोः शिशुपालवधकारकनिर्णययोः रचनाशैली समाना दृश्यते ।

२.२.५.३. **सारसिद्धान्तसङ्ग्रहः**—व्याकरणदर्शनुमुपजीव्य लिखितोऽयं ग्रन्थः । वैयाकरणभूषणसारस्य विषयोऽत्र वर्णितः । अस्य ग्रन्थस्य मंगलाचरणमेवं भवति यत्—

विघ्नदन्ताबलश्रेणीदारणं सर्वकारणं
श्रीनृसिंहमहं वन्दे करुणावरुणालयम् ।
सारभागं समुद्धृत्य वैयाकरणभूषणात्
क्रियते रघुनाथेन सारसिद्धान्तसंग्रहः ॥

२.२.५.४. **कातन्त्रविस्तराक्षेपनिगूढार्थप्रकाशनम्**—अस्मिन् ग्रन्थे केलं कारकसमासप्रकरणयोः विचारः कृतः रघुनाथेन । तेनोक्तं यत्—

"कातन्त्रविस्तराक्षेपनिगूढार्थप्रकाशनम् ।
कुरुते रघुनाथः श्रीवासुदेवाम्बिकासुतः ॥

अयं बृहदाकारग्रन्थः सुष्ठु अवस्थायां संग्रहालये सुरक्षितो विद्यते । परन्तु असम्पूर्णोऽयं ग्रन्थः ।

रघुनाथेन लिखितेषु चतुर्षु व्याकरणग्रन्थेषु भयो ग्रन्थाः कातन्त्रव्याकरणमाधारीकृत्य विरचिताः । सारसिद्धान्तसङ्ग्रहस्तु व्याकरणदर्शनग्रन्थः । संस्कृतव्याकरणशास्त्रं प्रति रघुनाथस्य अवदानमतुलनीयमवर्णनीयं च ।

२.३.१. **कविभूषणगोविन्दसामन्तरायः**—अयमुत्कलीयवैयाकरण आसीत् । कविरूपेणापि अस्य महती ख्यातिः उत्कलप्रदेशेऽस्ति । अत एव कविभूषणोपाधिः राज्ञा वीरकेशरीदेवेन तस्मै प्रदत्तः । स वैयाकरणः कविः, धर्मशास्त्रकारः आसीत् । तेन ग्रन्थत्रयं विरचितम् । सूरिसर्वस्वम्, समृद्धमाधवनाटकम्, बालव्युत्पत्तिमञ्जरी च । तत्र बालव्युत्पत्तिमञ्जरी भवति व्याकरणविषयको ग्रन्थः ।

२.३.२. समयः—केदारनाथमहोदयस्य मतेन अस्य समयः अष्टादशशताब्द्याः मध्यभागे आसीत्। सूरिसर्वस्वग्रन्थे स स्वयममेव लिखति यत्—

खशून्यमुनिचन्द्रमः प्रमितशाकसंवत्सरे।
गते व्यरचि मे बुधा शास्त्रमेतन्मुदा॥

अस्य ग्रन्थस्य रचनासमयो भवति-ख (०), शून्य (०), मुनि (७), चन्द्र (१)। "अंकानां वामतो गतिः" इति न्यायेन १७०० शकवर्षम् अर्थात् १७७८ खीष्टाब्दः स्यात्।

२.३.३. परिचयः—भरद्वाजगोत्रीयो ब्राह्मणोऽयम्। रामचन्द्रसामन्तरायः तस्य पिता। कृष्णचन्द्रः तस्य पुत्र आसीत्।

२.३.४. बालव्युत्पत्तिमञ्जरी—बालव्युत्पत्तिमञ्जरी राज्यसंग्रहालये सुरक्षिता विद्यते। परन्तु अस्याः रचनासमयः नैव उल्लिखितः। ग्रन्थेऽस्मिन् संज्ञा-पञ्चसन्धि-सुबन्त-तिङन्तप्रकरणानि विद्यन्ते। ग्रन्थस्यान्तिभागे "इतिश्रीमद्गोविन्दकविभूषणसामन्तरासूरिविरचितायां बालव्युत्पत्तिमञ्जर्यां शब्दपादः" इति लिखितमस्ति। तत्र ग्रन्थस्य विषयविचारः एवं भवति यत्—

पृष्ठम्—१. "सिद्धो वर्णसमाम्नायः। इह शास्त्रे वेदितव्यः। वर्णा अकारादयः। अत उच्यते। अ आ इ ई....स ह। तत्र चतुर्दशादौ स्वराः। अकारादौकारान्ता चतुर्दशा स्वरसंज्ञाः स्युः। अ आ इ ई...... ओ औ दशसमानाः। एते समानसंज्ञाः स्युः। समानानां मध्ये द्वौ द्वौ मिथः सवर्णसंज्ञौस्तः। मुर अरि इति स्थिते-समानः, सवर्णो दीर्घो भवति। परश्च लोपमापद्यते। अदर्शनं लोपं। वर्णानामदर्शनं लोप इत्युच्यते। दीर्घस्य दीर्घीकरणं परलोपार्थम्। मुरारिः इति।

पृष्ठम्—७. धातुवर्जमर्थवल्लिगम्। धातुविभक्तिवर्जमर्थवत् शब्दरूपं लिंगसंज्ञं स्यात्। तस्मात् परा विभक्तयः। स्यादयो भवन्ति। कर्त्तरि सु औ जस् इति प्रथमाः।

समासकृदन्तादिप्रकरणानि अत्र नैव उपलभ्यन्ते। बालानां सुखेनार्थबोधाय बालव्युत्पत्तिमञ्जरी तेन विरचिता।

३.१.१ नेत्रानन्दसाहित्यपञ्चाननः—क्रमदीश्वराख्येन विदुषा संक्षिप्तसारसंज्ञकं व्याकरणं प्रणीतमस्ति। स वंगदेशीयः। क्रमदीश्वरस्य व्याकरणं जुमरनन्दिना परिष्कृतम्। ततः तद्व्याकरणं जुमरव्याकरणानाम्ना प्रसिद्धम्। उत्कलप्रदेशे अस्य महान् प्रचार आसीत्। उत्कलभाषाया एकः प्रवादोऽस्ति—

अमर जुमर निठाइ घोष।
आउ सबु पाठ चालरे खोष॥

अतः नेत्रानन्दसाहित्यपञ्चानेन जुमरव्याकरणस्योपरि व्याख्याग्रन्थः प्रणीतः। तस्य व्याख्याग्रन्थस्य नाम जुमरदर्पणः। स उत्कलीयः।

३.१.२. परिचयः—नेत्रानन्दः कौशिकगोत्रीयो ब्राह्मण आसीत्। उत्कलप्रदेशस्य गञ्जाममण्डलस्य सुरंगिनामधेयग्रामे जन्मग्रहणं कृतवान्। स अध्यापक आसीत्। विश्वम्भरसाहित्यपञ्चाननः तस्य पितामह आसीत्।

३.१.३. कृतिः—जुमरदर्पणं विहाय अन्या काऽपि कृतिः नोपलभ्यते । अस्य ग्रन्थस्य पाण्डुलिपिद्वयं राज्यसंग्रहालये सुरक्षितं विद्यते । एकस्यां पाण्डुलिप्यां कारकप्रकरणं समासप्रकरणं व्याख्यातम् । अत्र ६१ पृष्ठाः सन्ति । अन्यस्यां पाण्डुलिप्यां कृदन्तप्रकरणं, तद्धितप्रकरणं व्याख्यातम् । तत्र कारकप्रकरणं द्विधा विभक्तम् । कारकविभक्तिप्रकरणम्, उपपदविभक्तिप्रकरणञ्च । तत्र प्रकरणस्य नाम पुष्पिका विद्यते । पुष्पिकाया अन्ते इत्थं लिखितमस्ति यत्—

"इति श्रीवक्रतुण्डप्रभुप्रेरितनेत्रानन्दसाहित्यपञ्चाननविरचिते जुमरदर्पणे पञ्चमः कारकपादः समाप्तः ।" अस्य ग्रन्थस्य विषयविचारो भाषाशैली च एवं प्रकारेण भवति ।

पत्रम्—१. श्रीवक्रतुण्डाय नमः । अविघ्नमस्तु । सरस्वत्यै नमः । शिष्याणां सूक्ष्मबुद्धीनां कारकं कुर्वे प्रणम्य प्रत्यूहदारकं शम्भुदारकम् । क्रियानिमित्तं कारकम् । कर्त्रादिषट्कं कारकसंज्ञा प्रसिद्धा । क्रिया सर्वो धात्वर्थः ।

सू. "क्रियामुख्यप्रयोजको कर्ता" इति । क्रियायां साध्यायां कारकेषु यो मुख्यस्तदा योजनार्हः कर्तृसंज्ञको भवति । प्रयोजकश्च । देवदत्तः काष्ठैः स्थाल्यामोदनं पचति ।

पत्रम्—१५. अथोपपदविभक्तिप्रकरणमुच्यते । या पदान्तरसम्बन्धेन विधीयते सा उपपदविभक्तिः । सू. अमौट्शसः कर्मणोऽनुक्तात् । अनुक्ताद्यधिकारः । अनुक्तात् कर्मण उत्तरे अम् औट् शसो भवन्ति । सुपोक्तत्वे सति नित्यादिप्रत्ययाकथिततत्वमनुक्तत्वम् । देवं पश्य । देवौ । देवान् । अनुक्तादि किम् ? क्रियते घटः स्वयमेव ।

पत्रम्—१. (द्वितीयपाण्डुलिपिः)—

कृत्तद्धितपदसिद्धिः विवोदीक्रियते शिशुबोधाय ।
गोयीचन्द्रप्रसादात् साहित्यपञ्चाननाख्येन ॥

उपसंहारः—अत्र प्रबन्धे केषाञ्चित् मूर्द्धन्यतमानां वैयाकरणानां कृतिविषये चर्चा विहिता । एतद् विहाय बहवो वैयाकरणाः सन्ति । येषां कृतयः पाण्डुलिपिरूपेण राज्यसंग्रहालये वर्तन्ते । पुरुषोत्तममिश्र-हलधरमिश्र-बलदेवविद्याभूषण-गोपालमिश्र-नारायणदाशप्रभृतयोऽपि स्वस्वकृतिभिः समग्रे उत्कले लब्धप्रतिष्ठाः आसन् ।

संस्कृतव्याकरणं प्रति उत्कलस्य योगदानं महत्त्वपूर्णम् । उत्कलप्रदेशे संस्कृतस्य परम्परा जीवन्ती, प्रवाहमयी, महती च विद्यते । साहित्य-व्याकरण-धर्मशास्त्र-पुराण-कर्मकाण्ड-तन्त्रादिषु विषयेषु बहवो महत्त्वपूर्णग्रन्थाः उत्कलीयैः विरचिताः । उत्कलस्यावदानं प्रति ऐतिहासिकैः सम्यक्तया ध्यानं न प्रदत्तम् । इतिहासग्रन्थप्रणयनसमये समीचीनतया तेषां ग्रन्थानामुपस्थापनं नैव कृतम् । वैशिष्ट्यञ्च नैव प्रतिपादितम् ।

उत्कलसर्वकारस्य संस्कृतविभागैः, राष्ट्रियसंस्कृतसंस्थानैश्च गृहीतार्थिकानुदानेन साहित्यधर्मशास्त्रसम्बन्धिनो ग्रन्थाः प्रकाशिताः । परन्तु तादृशाः व्याकरणग्रन्थाः नैव प्रकाशिताः । केवलं चांगुकारिका, वैजलकारिका प्रकाशिता । अप्रकाशितानां ग्रन्थानां प्रकाशनाय प्रयत्नः कर्तव्यः । उत्कलस्य गृहे गृहे बहवो मातृकाः सन्ति । तासां मातृकाणामपि संग्रहार्थं प्रयासः करणीयः । इति ।

वेदेषु विश्वबन्धुत्वम्

डॉ. गणेशदत्तशर्मा

वेदाः खलु ज्ञानराशयः । धर्मस्य संस्कृतेश्च प्रादुर्भावोऽपि वेदेभ्य एव संबभूव । वस्तुतो विश्वहितसाधकानां सर्वेषां सद्विचाराणां प्रकाशनं सर्वप्रथमं मन्त्रद्रष्टाणामाद्यानां ऋषीणां विमलमानसे एव समजनि । विश्वशान्तेराधारभूतस्य विश्वबन्धुत्वस्य सिद्धान्तोऽपि वेदमन्त्रेभ्य एवाविर्भूतः ।

वेदमन्त्रेषु स्तुता देवताः प्रायशो-"बन्धु"-इति विशेषणेन विभूषिताः । तद्यथा -

(क) स नो बन्धुर्जनिता सविधाता । यजु. २५/१४

(ख) बन्धुर्मे माता पृथिवी महीयम् । ऋग. - १-१६४-३३

(ग) त्वं जामिर्जनानामग्ने मित्रोऽसि प्रियः सखा/ऋग. १-७५-४

(घ) उरुक्रमस्य स हि बन्धुरित्था । ऋग. १-१५४-५

एतेषु सन्दर्भेषु बन्धुत्वभावनायाः स्रोतः स्फूटन्निव प्रतीयते । येषामार्याणामिष्टदेवा एव सर्वेषां बान्धवास्तेषां कृते विश्वस्य सर्वे मानवाः — "न केवलं मानवा एव" - अपितु सर्वेऽपि प्राणिनः बान्धवा यद्वा कौटुम्बिका एवेति स्वतः सिद्धम् ।

विश्वस्मिन् बन्धुत्वभावनाया विकासाय ये-ये विचारा अपेक्षितास्ते सर्वेऽपि वेदमन्त्रेषु संनिहिताः सन्ति । बन्धुभावविकासार्थं जने जने सहृदयतायाः सौमनस्कतायाश्च स्थापनं द्वेषभावनायाश्च विस्थापनमावश्यकम् । अत एव मन्त्रे सुस्पष्टं व्याहृतम् —

सं हृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्योऽन्यमभिहर्यत वत्सं जातमिवाध्न्या ॥ अथर्व. ३/३०-१

अत्र सहृदयताया वर्णनसमकालमेव अन्योऽन्यं प्रति जनानां पारस्परिकमाकर्षणमपि-उपमालंकारेण रमणीयतया वर्णितम् । तदनुसारं-सर्वे मानवास्तथैव प्रेम्णा परस्परमाकृष्टाः स्युर्यथा खलु नवप्रसूता धेनुरात्मनो नवजातवत्सं प्रति आकृष्टा भवति ।

समाजे - "अयं ज्येष्ठोऽयं कनिष्ठः, अयं लघुरयं महान्, अयं नीचकुलोत्पन्नोऽयमुच्चकुलोत्पन्नः" - इत्याद्यात्मिका या भेदभावना सैव वस्तुतः विद्वेषस्य, विक्षोभस्य, विद्रोहस्य च जननी वर्तते, यया बन्धुत्वभावना खण्डिता जायते । अत एव सम्यगुपदिष्टं ऋषिणा वेदमन्त्रे —

अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वधारुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥ ऋ. ५-६०-५

अत्र एतदपि विज्ञापितं यदेक एव परमेश्वरः सर्वेषां पिता, एका-एव च सुदुघा प्रकृतिः सर्वेषां माता । अत एकपितृका-एकमातृकाश्च सर्वे मनुष्याः परस्परं भ्रातर एव, एकस्यैव च परिवारस्य सदस्या एव । तस्मान्नास्ति क्वचिदपि भेदभावस्यावकाशः ।

परमेश्वरेण प्रकृत्या वा सर्वेषां कृते समानरूपेण अन्नपानादिकं पक्षपातरहितमेवोपायनीकृतम् । तद्यथा—

समानी प्रपा सह वोऽन्नभागाः समाने योक्त्रे सहवो युनज्मि । अर्थव-३-३०-६

कीदृशी रमणीयास्ति-एषा साम्यभावना । विषमता न खलु प्रकृतिकृता । एषा तु मानवकृता एव । अद्य क्वचिदन्नभावेन बुभुक्षितानां विलापः श्रूयते, अन्यत्र च इयदधिकमन्नादिकं यत्कैश्चिद्राष्ट्रैस्तत् समुद्रेषु प्रक्षिप्यते । महतीयं विडम्बना । किमस्याः कारणम् ? अस्याः कारणमस्ति - मानवहृदये सन्निविष्टा तुच्छातितुच्छा स्वार्थभावना । एकाकिनैव च भोगभावना । इयं स्वार्थमयी भावना एवं वस्तुतः परिवारे समाजे च कलहस्य मूलं कारणम् । किन्तु वेदानुसारम्-अन्येषु बुभुक्षितेषु सत्सु यः केवलं एकाकी-एव भुंक्ते, स पापी-अस्ति —

केवलाघो भवति केवलादी । ऋक्- १०-११७-६ एवमेव - "अघं स केवलं मुक्ते यः— पचत्यात्मकारणात् । नास्ति स जनः सखापदवाच्य योऽन्नाभिलाषिणे आत्मनः सख्ये न किंचिद्ददाति —

न स सखा यो न ददाति सख्ये स चाभुवे च मानाय पित्वः । ऋक - १०-११७-४

अतः स्वार्थभावना सर्वथा परित्याज्या । सौहार्दस्य सौख्यस्य च वृद्धये त्यागभावना एव श्रेयस्करी । नितान्तमुपयोगितां धारयति यजुर्वेदस्यायमुद्घोषः—

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् । यजु. ४०-१

वैदिकसंस्कृतौ सर्वकार्येषु विहितं यज्ञस्य प्रावधानमपि त्यागभावनाया एवं प्रतीकभूतम् । यजुर्मन्त्रेषु तु-बलमन्नं सकलं च वित्तजातं यज्ञेनैव (यज्ञभावया एव) संकल्पितम्-

(क) बलं च मे यज्ञेन कल्पन्ताम् । यजु. १८-२

(ख) अन्नं च मे यज्ञेन कल्पन्ताम् । यजु. १८-१०

(ग) वित्तं च क्षुच्च च मे यज्ञेन कल्पन्ताम् । यजु. १८-११

यदीयं यज्ञमयी त्यागभावना सर्वेषां हृदयेषु सन्निविष्टा स्यात्तदा सर्वत्रैव बन्धुत्वस्य प्रसारो भवेत् सर्वे च सुखिनो भवेयु: न च कुत्रापि क्लेशलेशो जायेत ।

बन्धुभावसमृद्ध्यर्थं सर्वेषां मनसि, वचसि, क्रियायां चैकरूपता समानता वा सततमपेक्षिता । एतदभिप्रेत्यैव मन्त्रे समुपदिष्टम् —

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् । ऋक् १०-१९१-२

अंग्लभाषायामेतदित्थं वक्तुं शक्येते —

Walk together, talk together, think together

न केवलं मनोवाक्कर्मसु-अपितु अस्माकं मन्त्रणासु, सभासु, समितीषु तत्र स्थितेषु जनचित्तेषु चापि समानता स्यात्—

(क) समानो मन्त्र: समिति: समानी समानं मन: सहचित्तमेषाम् ।

समानं मन्त्रमभिमन्त्रये व: समानेन वो हविषा जुहोमि । ऋक. १०-१९१-३

(ख) समानीव आकूति: समाना हृदयानि व: ।

समानमस्तु वो मनो यथा व: सुसहासति । ऋक्. १०-१९१-४

वेदोपदेशानुसारं यदि सर्वमानवानां चित्तेषु चिन्तनस्य-समानता एकता च स्यात्तर्हि सर्वत्र बन्धुत्वस्य साम्राज्यं भवेत् । एवमेवास्मद्देशविधानसभा लोकसभाधिवेशनेषु, अन्यदेशीयसंसत्सु अथ च संयुक्तराष्ट्रसभाधिवेशनेषु कदापि कोलाहलं वाग्युद्धं कलहजातं वा नोत्पपद्येत ।

वैदिकै: कविभिरिदं तथ्यं सुष्ठु साक्षात्कृतमासीद् यदन्योऽन्यं प्रति प्रेमदृष्टिर्मित्रदृष्टिश्च विश्वबन्धुत्वस्थापनार्थं नितान्तमुपयोगिनी वरीवर्ति । अत एव सम्यगादिष्टं तैर्वेदमन्त्रेषु —

(क) प्रियं सर्वस्य पश्यत उत शूद्रे उतार्ये । अथर्व. १९-६२-१

(ख) सर्वा आशा मम मित्रं भवन्तु । अथर्व. १९-१५-६

(ग) मित्रस्य माचक्षुषा सर्वाणि भूतानि समीक्षन्ताम् । यजु. ३६-१८

एतान्युदाहरणानि वस्तुत: वैदिकसंस्कृतेर्विशालतामुदारतां सार्वभौमिकतां च प्रतिपादयन्ति यत्र सर्वास्वपि दिक्षु स्थितानां मानवानां कृते, - न केवलं मानवानामपितु सर्वेषामपि प्राणिनां कृते मित्रताया बन्धुतायाश्च भव्यभावना अभिव्यक्ता । सर्वभूतेष्वात्मदृष्टिरखिलब्रह्माण्डे च एकत्वानुभूतिर्वैदिकदर्शनस्याद्वितीया विशेषता विद्यते । तद्यथा यजुर्वेदे—

(क) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो न विचिकित्सति ॥ यजु. ४०-६

(ख) यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः ।

तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ॥ यजु. ४०-७

वेदमन्त्रप्रतिपादितैषा दिव्या भव्या च आत्मदृष्टिर्नूनं मोहविनाशिनी, भेदभावविदारिणी सर्वभूतहितकारिणी अशेषदुःखविघातिनी सर्वथा च मंगलविधायिनी वर्तते ।

एषा विश्वात्मदृष्टिरेव विश्वबन्धुत्वस्य पराकाष्ठा ।

वैदिकसूक्तेषु सकलजगद्धिताय, सर्वजनकल्याणाय किञ्च मानवेतरप्राणिवर्गलाभायापि कामना विहिताः । तद्यथा —

(क) आनो भद्राः क्रतवो यन्तु विश्वतः । यजु. २५-१४

(ख) भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । यजु. २५-२१

(ग) भद्रं भद्रं न आ भर । ऋक. ८-९३-२८

(घ) अदीनाः स्याम शरदः शतम् । यजु. ३६-२४

(ङ) वयं स्याम पतयो रयीणाम् । ऋक. १०-१२१-१०

(च) शं नो अस्तु द्विपदे शं चतुष्पदे । ऋक. ७-५४-१

(छ) स्वस्ति गोभ्यो जगते पुरुषेभ्यः । अथर्व १-३१-४

एतासु प्रार्थनासु प्रयुक्तं बहुबचनं विश्वपरिवारभावनाया विश्वबन्धुत्वधारणायाश्च परिचायकम् । वस्तुतो विशालतायाश्चरमसीमानं प्राप्ता खलु वैदिकानां दिव्यदृष्टिः ।

आधुनिकयुगे विश्वबन्धुत्वस्य महती-आवश्यकता विद्यते । अथ सर्वत्र पारस्परिकसौहार्दस्य अभावो दरीदृश्यते । अन्योऽन्यस्य समृद्धिमुन्नतिं च न सहते । सर्वः स्वार्थं समीहते । आन्ताराष्ट्रिया स्थितिरपि सततं चिन्तास्पदा । एकं राष्ट्रमन्यस्मै दुह्यति ईर्ष्यति असूयति च । सकलमपि वातावरणं हिंसामयं द्वेषमयं घृणामयमिव च दृश्यते । जनमानसं द्वेषदावानलदग्धमिव प्रतीयते । कदाचित्तु विश्वयुद्धस्य विभीषिकया चित्तं भृषं प्रकम्पितमिव जायते । यदि युद्धे आणविकास्त्राणां प्रयोगो भवेत्तर्हि निखिलमपि जगत् क्षणेनैव नाशं प्राप्नुयात् । एतादृश्यां परिस्थित्यौ केवलं वेदप्रतिपादितं विश्वबन्धुत्वमेवैकः पन्थाः । सर्वे जनाः द्वेषभावनां विहाय परस्परं प्रेम्णा, सौहार्देन, भातृत्वेन च व्यवहरेयुः । राष्ट्राणि वैरविरोधप्रतिशोधादीनां भावानवधूय प्रेमरसधारया पारस्परिकविवादान् प्रशमयेयुः शान्तिवार्ताश्च विश्वसमस्याः समादध्युः ।

यदि सर्वे वेदोक्तविश्वबन्धुत्वभावनानुसारं सर्वान् स्नेहरसाप्लावितया दृशा-अवलोकयेयुः, सर्वेषां हितचिन्तनं कुर्युः, सर्वैः सहात्मवत् व्यवहरेयु सर्वेषां च सर्वथा मंगलाभिलाषिणां भवेयुस्तर्हि सर्वत्रैव सुखस्य शान्तेश्चामृतधारा प्रवाहिता स्यात् सर्वं वातावरणं प्रेमपीयूषपूर्णं भूयात्, विश्वं चाभ्युदयमाप्नुयादिति नात्र संदेहः ।

संस्कृतं ज्ञानपरिधयश्च तत्र वेदाङ्गज्योतिषम्

डा० वासुदेवशर्मा

संस्कृतमात्मा ज्ञानपरिधय इन्द्रियाणि, विश्वसंस्कृतसम्मेलनम्मनः, वेदोपनिषदारण्यकब्राह्मणवेदाङ्गादि-ज्ञानविज्ञानग्रन्थाः शरीरम्, पुराणोपपुराणस्मृतिनाटकेतिहासादयः वस्त्राणि, समस्तविश्वे प्रसृतज्ञानविज्ञानराशयः उपवस्त्राणि । इत्थम्भूतः प्राणिकल्याणकारकपन्था । वस्तुतः यदि वृत्तपरिधिव्यासरूपे कल्पयोगः तर्हि पुराणादीनां रचयिता वेदव्यासः व्यास अर्थात् वृतनिर्मणार्थं व्यासस्वरूपः समस्तज्ञानविज्ञानमूलकं संस्कृतवाङ्मयमेव ज्ञानपरिधिः । अभिष्टव्यासार्ध (त्रिज्यया) निर्मितं घनत्वं (परिधियुतम्) एव गोलम् । अस्मिन् ज्ञानपरिधिमये गोले खगोले, भूगोले, नक्षत्रगोले, ब्रह्माण्डगोले, ग्रहगोले, यदस्ति ज्ञानम् तत् व्यासपरिधियुतं सत् समस्तब्रह्माण्डे आत्मनः शरीरस्य च सम्बन्धम्, कृतशुभाशुभकर्मणां संवितप्रारब्धक्रियमाणस्वरूपाणां वा भोग्यफलेन सम्बन्धः, कृतशुभ-कर्मणां संचितप्रारब्धक्रियमाणस्वरूपाणाञ्च भोग्यफलेन सम्बन्धं तत्रापि विशेषतः ज्ञानपरिधेः मानवकल्याणेन च सम्बन्धं सम्यगाख्यापयति ।

अस्माभिः इदम् सगर्वम् सविश्वासञ्च वक्तुं शक्यते यत् संस्कृतवाङ्मयोपनिबद्धज्ञानपरिधीनां परि-क्रमया एव—

'यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिणा पदे पदे ॥'

इत्यादि प्रदक्षिणामहात्म्योपनिबद्धपापप्रणाशनम्, वैचारिकमानसिकसांसर्गिकप्राकृतिकप्रदूषणोपविना-शनम्, इष्टप्राप्ति, अनिष्टपरिहारः, समस्तविश्वराष्ट्रसम्मुखोपस्थितसंकटानां विनासश्च भविष्यति शमिति ।

सुविदिमेवेत् यद् भारतीयाः ज्ञानपरिधिं नाधिगन्तुम्पार्यते संस्कृज्ञानमन्तरा । ज्ञानपरिधिमन्तरेण निर्जीविनं जीवनम् जीविनः ॥ ज्ञानपरिधिः एव स्मृतीनां स्मारयित्री स्वान्नस्य संस्कर्त्री, सद्भावानां भावयित्री, गुणगणस्य ग्रहयित्री, सदाचारस्य सञ्चारयित्री, अविधानान्धतमसस्यापनोदयित्री, सुखस्य साधयित्री, शान्ते सन्धात्री, वेदवेदा-ङ्गानां रहस्योद्घाटयित्री काचिदनुत्तमा शक्ति ॥ सेयं ज्ञानपरिधिरजस्रं रक्षणीया पालनीया परिवर्धनीया चेति । न केवलम् भारतीयज्ञानपरिधीनां साक्षात्कारार्थमावश्यकं संस्कृतमपितु संस्कृतमेतत् विविधविरुद्धज्ञानसमाहारसाध-कम्, आचारशास्त्रस्य शिक्षकम्, पुरुषार्थस्य प्रयोजकम्, प्रान्तीयानां प्रादेशिकानाञ्च विकृतीनां विवादानां संघर्षा-णाञ्च च प्रशमनम्, आध्यात्मिक्याः भौतिक्याश्च समुन्नतेः साधकम्, वैदिकवाङ्मयालोकस्य प्रसारहेतुः, वेदाङ्गानां

वेदाङ्गोपनिबद्धज्ञानपरिधीनां व्यासरूपेण आत्मतत्त्ववत् सर्वत्र व्याप्तम् अमृततत्त्वमस्ति । अत्र वेदाङ्गानि सन्ति शिक्षा, कल्पः शब्दः, निरूक्तम्, छन्दः, ज्योतिषचेति । एतानि क्रमशः श्रीभास्कराचार्यशब्देषु[1]—

शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।
या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः ॥

एसु षडङ्गेषु तावज्ज्यौतिषशास्त्रमेव दिग्देशकालव्यञ्जकत्वेन यज्ञतपोदानव्रतोपवासादीनामादिबीजमिति सकलशास्त्रापेक्षया अस्य ज्ञानपरिधिः ब्रह्माण्डपरिधिवत् असीमा वर्तते । अत एव आचार्यलगधेनोक्तम्[2]—

यथा शिखा मयूराणां नागानाम् मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषम् मूर्ध्नि संस्थितम् ॥

वेदाङ्ग ज्योतिषग्रन्थे कृतेयं घोषणा तदा सत्यताम्प्राप्नोति यदा स्माभिः ज्योतिषशास्त्रस्य महती उपयोगिता वैदिककालतः अद्यावधि अक्षुण्णरूपेण दृश्यते । वैदिककाले तु वेदाङ्गेषु ज्योतिषशास्त्रस्य गणना एतस्माद्धेतोः जाता । यत्[3]—

वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रमेण ।
शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्योतिषस्यो गात् ॥

अत्र "सर्वं यज्ञमयं जगत्" इति यज्ञस्य परिधिः एवञ्च कालबोधः अर्थात् कालज्ञानं ग्रहनक्षत्रादि विज्ञानमेव, अथ च सूर्येणाप्युक्तम्— "अदृष्टरूपाः कालस्य मूर्तयो भगणाश्रिताः" अर्थात् कालज्ञानेन दृष्टफलसिद्धिः, अदृष्ट-फलसिद्धिश्च वेदविहितयज्ञप्रतिपादने वेदाङ्गज्योतिषाधीनमेव । एतत् वेदाङ्गज्योतिषमेव—

वेदस्य निर्मलं चक्षुः ज्योतिषशास्त्रमकल्मषम् ।
वितैतदखिलं श्रौतं स्मार्तम् कर्म न सिद्ध्यति ॥[4]

तत्राष्टादशस्मृतिविहितकर्मप्रतिपादनार्थं, वैदिककर्मप्रतिपादनार्थम्, अष्टादशप्रवरप्रवर्षितञ्च,[5] अष्टादश-पुराणानुकल्पम् आर्षम्, 'यत्पिण्डे तत्ब्रह्माण्डे' इति मूलमन्त्रोपासकम्, कालाङ्गेसु विभक्तमेषादिराशीनाम् मानवाङ्गे प्रतिपादितज्ञानपरिधिवैशिष्ट्ययुतम् 'सूर्य आत्मा जगतस्तस्थुषश्च' 'चन्द्रमा मनसो जातः' इत्यादिवेदसूत्रोद्दिष्ट आत्मतत्त्वादीनाम् सूर्यादिग्रहोत्पादितप्रभावानाम् मानवशरीरे प्राणिमात्रशरीरे च संकल्पकं वेदाङ्गज्योतिषमेव सक्षमम् । अत्र "चक्षुः" अर्थात् चर्मचक्षुषा भौतिकपदार्थानां विश्लेषणम्, दिव्यचक्षुषा[6] च ज्ञानपरिधीनाम् साक्षा-

---

१. सिद्धान्तशिरोमणिः ।

२. वेदाङ्गज्योतिषे ।

३. तत्रैव ।

४. नारदः ।

५. सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पाराशर । कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ।
रोमशः पोलिशश्चैव च्यवनो यवनो भृगुः, शोनकोऽष्टादशश्चैति ज्योतिषः शास्त्रप्रवर्तकाः ॥

६. दिव्यं चक्षुग्रहर्क्षाणाम् दर्शिम् ज्ञानमुत्तमम् । विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतम् ॥

त्कारा ज्योतिषे अधुना दूरदर्शकादियन्त्रबद्धदृष्ट्या यथा गहनान्तरिक्षे ग्रहोपग्रहनक्षत्रादि पिण्डानाम् भौतिकम् विश्लेषणं चर्मचक्षुषा क्रियते तथैव दिव्यचक्षुषा वेदाङ्गभूतचक्षुषा वा "यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मण: पङ्क्तिम् व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥" इति

वराहमिहिरोक्त्या सञ्चितप्रारब्धक्रियमाणेति त्रिविधकर्मणां जन्मजन्मान्तरार्जितानाम् भविष्यत्कालीन-घटनाभि: सह यत् सम्पर्कसूत्रं पंक्तिर्वास्ति तस्याभिव्यञ्जना तमसि दीपवद् वेदाङ्गज्योतिषद्वारैव संभवति नान्येन केनापि शास्त्रेण ।

अत्र "दैवाधीनं जगत्सर्वम्" तथा "ग्रहास्ते देवतांशका:" इति उक्तिभि: सर्वं खलु ग्रहाधीनमता । संसाराचारकूपाप्रवाहपतितैरखिलै: उक्ताभि: सर्वं खलु त्रैवर्णिकै: ज्ञानपरिधीनां समुपासकैश्च अहर्दिवमनवरतम-नुभूयमानमनेकविधक्लेशपरम्परा परिजिहीर्षुभि: सर्वत: स्वश्रेयस: अभिलाषुको अखिलश्रेयोनिदानभूतमनुसवनम् ज्योतिषम् अर्थात् वेदाङ्गभूतं ज्योतिषम् अवश्यम् अध्येतव्यम् अध्यापनीयम् परिचिन्तनीयञ्चेति ।

मूकप्रश्नविचारः

डॉ. नरोत्तमदत्तशर्मा

मानवः प्रकृत्यैव जिज्ञासु। किमिदं कथमिदमित्यादि परिज्ञानाय स सदैव प्रयासरतो भवति। मनोवैज्ञानिकदृष्टिकोणविश्लेषणेन सिध्यति यदियं मानवजिज्ञासैव तान् ज्यौतिषशास्त्रस्य गम्भीररहस्योद्घाटनाय प्रवर्तयति। पाणिनीयव्याकरणानुसारं 'द्युत द्योतने' धातोः 'द्युतेरिसिन्नादेशश्च जः'— इत्युणादिसूत्रेण ज्योतिषशब्दस्य सिद्धिः जायते। ज्योतिषां सूर्यादि—ग्रहनक्षत्राणां गतिमधिकृत्य कृतं शास्त्रं ज्योतिषशास्त्रमित्युच्यते। अर्थात्-शास्त्रे यस्मिन् प्रकाशमानानां सूर्यचन्द्रभौमबुधगुरुशुक्रादिग्रहनक्षत्राणां गति-स्थिति-निरूपणं तच्छास्त्रं ज्योतिषशास्त्रमुच्यते। मध्यकाले शास्त्रस्यास्य विकासेन सहैवास्य परिभाषायामपि जातो विकासः। तत्कालेऽस्य शास्त्रस्य 'ज्योतिर्विद्या' इति नाम करणमजायत। परम्पूर्वपरिभाषया नैव फलितार्थः संघटितो वा भवति। अतः पूर्वपरिभाषा नैव परिमार्जिता—अव्याप्तिदोषत्वात्। अत एव ज्योतिषां सूर्यादिग्रहनक्षत्राणां गति-स्थिति-निरूपणम्, भौतिक-पदार्थेषु जायमान-प्रभाववर्णनम्, विविधघटना-विवचेनम्, मानवजीवने जायमान विविध-समस्यासमाधानम्, शुभाशुभारम्भ-फलकथनादिकञ्च यच्छास्त्रे तच्छास्त्रं ज्योतिषम्-इति जातं मतैक्यम्। लक्षणेऽस्मिन् 'बोधक' पदमतिमहत्त्वपूर्णम्। 'बोधक' पदेनैव भौतिकपदार्थेषु सूर्यादि–ग्रहनक्षत्राणां प्रभावस्य ग्रहणञ्जायते। ज्योतिषशब्दस्य सामान्योऽर्थो विशेषप्रकाशः। शास्त्रमिदं पूर्वार्जित-कर्मणां फलं तथैव प्रकाशयति यथा दीपोऽन्धकारस्थितपदार्थानां वास्तविकस्वरूपं प्रकाशयति।

पाश्चात्य-देशेषु ज्योतिषशास्त्रं 'Astronomy, Astrology अथवा Astrophysics इत्यादि कथ्यते। आधुनिकोच्चविज्ञानस्य मतानुसारं कालगणना गतिद्वारा गतिगणना च कालद्वारा सञ्जायते। यतोहि द्वावेवान्योऽन्याश्रितौ। अयञ्च वैज्ञानिकसिद्धान्तो वेदेष्वपि दृश्यते। लिखितं ऋग्वेदे यथा—'

"द्वादशारं नहि तज्जराय ववर्ति चक्रं परिद्यामृतस्य" [1]

वेदा एव ज्योतिषशास्त्रस्याधारग्रन्थाः। यतोहि तेष्वेव सृष्टेरादितत्त्वानि समाहितानि। ऋग्वेदस्य मन्त्रोऽयं ज्योतिषशास्त्रस्वरूपप्रतिपादकः—

'ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रोऽर्णवः।

---

१. ऋग्वेदः १-१६४

समुद्रादर्णवादधि संवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।

सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः।[१]

एतन्मन्त्रानुसारं सर्गारम्भे धाता तपसा ऋतं सत्यं च ज्ञात्वा समुद्र— संवत्सर-सूर्य-चन्द्रादीनां निर्माणं विधायाहोरात्रं निर्मितवान्। अयञ्च सृष्टिक्रम आदि कालात्प्रचलति। नात्र कापि नवीनता।

ज्योतिषशास्त्रं कालविज्ञानम्। अनेन बिना न किमपि कार्यं यथासमयं सम्पादयितुं शक्यते। वेदेषु अभीष्टप्राप्त्यर्थं तथा चारिष्टबिनाशार्थं येषां यज्ञादिकर्मणां निर्देशः, तत्कर्मसम्पादनार्थं शास्त्रस्यास्य परमावश्यकता। जन्माष्टमी— रामनवमी — महाशिवरात्रि-दीपावली-विजयदशमी-रक्षाबन्धनादीनां निर्णयः सर्वेषाञ्च व्रतपर्वोत्स-वानां ज्ञानमनेनैव शास्त्रेण सम्भवति। अतः समीचीनमिदं कथनं यद् य इदं कालविधानशास्त्रं जानाति स एव वास्तविकरूपेण यज्ञं जानाति'—

"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्॥ (वे. ज्यो.)

महामहोपाध्यायाः श्रीमधुसूदनओझामहोदयाः ये निजकालेऽधुनाऽपि च विश्वविख्यात-विद्वद्-रूपेण आदृताः-तेषां मतानुसारं यो ज्योतिषं न जानाति स नैव वेदपाठाधिकारी। शास्त्रमिदं भू-पातालान्तरिक्षेषु भूतभ-विष्य-वर्तमानेषु च सर्वेष्वेव क्षेत्रेषु विश्वजनीन एकजनीनश्च वस्तु-स्थिति-दर्शकम्। ज्योतिषशास्त्रवैशिष्ट्ये कथितं यथा—

"यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्॥[२]

मानवजीवनस्य समेषां प्रमेयानां रहस्योद्घाटकस्यास्य शास्त्रस्य सन्ति त्रयो भेदाः। ते च सिद्धान्त-होरा-संहिता इति। प्राचीनकाले ख्रीष्टाब्दस्याष्टमशतकस्य समाप्तिं यावत् प्रश्न-सामुद्रिक-शकुन-मुहूर्त-वास्तुशास्त्रा-दीनां समावेशः संहितास्कन्धे एवासीत्।

संहितास्कन्धान्तर्गत-प्रश्नशास्त्रसम्बन्धी मम विषयोऽस्ति-मूकप्रश्नविचारः।

यद्यपि मानवमस्तिष्के जायमानानां शङ्का-आकांक्षोत्कण्ठा-इच्छा-चिन्तानां ज्ञानं समाधानञ्च जटिल-समस्यैका, तथापि अस्मत्पूर्वज-महर्षयः आचार्याश्चास्या मानवानां स्वाभाविकजिज्ञासाया रहस्योद्घाटनाय प्रश्न-शास्त्रं रचितवन्तः। पञ्चमशताब्दीतोऽद्य यावद् विषयेऽस्मिन् शताधिकानां मौलिक-नूतन ग्रन्थानां रचनाऽजायत।

१. ऋग्वेदः १०/१९०/१-३
२. वेदाङ्गज्योतिषम्

शास्त्रेषु चैतेषु मानवजिज्ञासाया ज्ञानपिपासायाश्च शान्त्यर्थं पर्याप्त-विवरणं वर्तते परं शास्त्राणीमानि भाषाकाठिन्येन शास्त्रीयजटिलत्वाच्च जनसाधारणस्य कृते स्वयमेव रहस्यानि सन्ति ।

प्रश्नशास्त्रं ज्योतिषविद्याया: महत्त्वपूर्णमङ्गम् । इदञ्च तत्कालफलकथने सक्षमम् । अत्र तात्कालिकलग्नस्य ग्रहस्थित्याश्चाधारेण मानवमस्तिष्के जायमान—प्रश्नानां तच्छुभाभुभफलानां च विचार: क्रियते । केरल-रमल-स्वर-शास्त्राण्यस्य अंगानि सन्ति। एषु शास्त्रेषु प्रश्नाक्षर—अंक—स्वराणाम् आधारेण प्रश्नस्य शुभाशुभफलयोर्निश्चयो जायते । मुख्यतया शास्त्रेऽस्मिन् सिद्धान्तत्रयं वर्तते । 'प्रश्नलग्न सिद्धान्त: प्रश्नाक्षरसिद्धान्तस्तथा च स्वरविज्ञानसिद्धान्त: । एतदतिरिक्तं चर्चा-चेष्टा-हाव-भावादिभिश्चापि मनोगत— भावानां सूक्ष्म-विश्लेषणं क्रियते । वर्णितसिद्धान्तेषु लग्न-सिद्धान्तो व्यापकत्वाद् ग्रहस्थित्या आधारेण सरलरीत्या फलप्रतिपादनं करोति । अत: चमत्कारपूर्ण: । परिणामतो ज्योतिषशास्त्रेषु सिद्धान्तस्यास्य व्यापकप्रचारो जात: । अद्यापि चायं प्रश्नशास्त्रस्य सर्वाधिको लोकप्रियसिद्धान्त: ।

वाचिकमानसिक—भेदेन प्रश्न: द्विविध: । वाचिकप्रश्ने प्रष्टा स्वप्रश्नं ज्योतिषशास्त्रज्ञस्य समक्षं स्पष्टरूपेण कथयति । दैवज्ञश्चोत्तरं ददाति । मानसिके च प्रश्ने प्रष्टा निजप्रश्नं मनोगत भावं वा दैवज्ञस्य समक्षं न कथयति । तस्य च भावस्य शुभाशुभात्मकफलं दैवज्ञ: स्वयमेव कथयति । एवंविध एव प्रश्नो मूकप्रश्ननाम्ना ज्ञायते ।

अस्माकमाचार्या: मानवस्य मानसिकप्रश्ननिर्णयार्थं संसारस्य सर्व-पदार्थान् धातु-मूल-जीवेषु त्रिविधेषु वर्गेषु विभाजितवन्त: । समस्त-खनिज-रसायन-रत्नादयस्तथा च कठिनपदार्था: धातुवर्गीया: । मानव-पशु-खग-सरीसृप-कीटाणु-भूतप्रेत-दैत्य-देवादय: सर्वे प्राणिनो जीववर्गीया: । वृक्ष-लता-गुल्मौषधि-वनस्पति-धान्यादयो मूलवर्गीया: । पृच्छकस्य मनसि एतेष्वेव वर्गेषु कस्याप्येकस्य पदार्थस्य विषये चिन्ता भवति ।

यदा कश्चित्प्रष्टा प्रश्नं करोति तदा तत्कालीनमिष्टं संसाध्य ग्रहस्पष्ट-लग्नस्पष्ट-भावस्पष्टा: करणीया: तथा च प्रश्नलग्नकुण्डलीनिर्माणं करणीयम् । एवमेव नवमांशस्याधारेण नवमांशकुण्डलीनिर्माणं तथा च भावचलितचक्रनिर्माणं कर्तव्यम् । यतोहि प्रश्न-फल-निर्णय-प्रक्रियायां लग्नादयो भावा नवमांशश्च निर्णायका: । अत एषामुपेक्षया निर्णय एकपक्षीयो जायते । प्रश्नस्य फलमपि यथार्थरूपेण नैव संघटते ।

यदा कदा पृच्छक उपहासार्थं परीक्षार्थं वा दैवज्ञसमीपमागत्य कपटकार्यमपि करोति । अतो मूकप्रश्नविचारात्पूर्वं प्रश्नकर्तुरपि सावधानतया विचार: करणीय: । निष्णातदैवज्ञा: पृच्छकस्य चर्चाचेष्टेङ्गितादिभिरेव तद्विषये पूर्वानुमानं कुर्वन्ति । निम्नयोगानामाधारेण पृच्छक: विचार: कर्तव्य:—

१. यदि प्रश्नकुण्डल्यां चन्द्रमा लग्नस्थो भवति, केन्द्रे च शनिबुधौ अस्तौ भवत: तदा प्रश्नकर्ता धूर्त: निष्प्रयोजनवक्ता व्यर्थवादी च भवति ।[१]

१. ताजिकनीलकण्ठी — प्रश्नतन्त्र-श्लो-८

२. यदि प्रश्नलग्नस्थं चन्द्रं भौमबुधौ समदृष्ट्या पश्यतः तदा पृच्छकः कपटी भवति ।[१]

३. यदि प्रश्नलग्ने चन्द्रस्तथा च शनि-बुध-सूर्याः एकस्मिन्नैव केन्द्रस्थाने स्युः तदा प्रष्टा धूर्तो वर्तते । दैवज्ञोपहासायागच्छति सः ।[२]

४. यदि प्रश्नकुण्डल्यां लग्ने सप्तमे वा भावे पापिनः क्रूरा वा ग्रहास्तिष्ठन्ति तदा पृच्छको दुष्टः कपटी च भवति । दैवज्ञपरीक्षार्थमायाति सः ।[३]

५. गुरुबुधौ सप्तमेशं शत्रुदृष्ट्या पश्यतश्चेत् तदापि प्रश्नकर्ता पाखण्डी जायते । स कृत्रिमाचारव्यवहारी भवति तथा च दैवज्ञोपहासायागच्छति ।[४]

यदि प्रश्नकुण्डल्यामुक्तयोगेषु कश्चिदपि योगो जायेत तदा दैवज्ञेन पृच्छकेन सह सावधानतया व्यवहर्तव्यम् । सामान्यतया तत्प्रपञ्चे कपटे वा नागन्तव्यम् । यदि चैतादृशो योगः प्रश्नकुण्डल्यां सामान्यतया न भवति तदा पृच्छकः सरलहृदयो जायते । स च वास्तविकरूपेण निजशंकासमाधानाय दैवज्ञसमीपमागच्छति । दैवज्ञेनापि फलकथने शीघ्रता न करणीया परं सुविचार्य धैर्येण शान्तमनसा च फलं कथनीयम् । अनुभवसिद्धमिदं ये दैवज्ञा उपेक्षा-शीघ्रता-प्रलोभनादिभिः प्रश्नकर्तुर्विचारं न कृत्वा मूकप्रश्नं तत्फलं च कथयन्ति ते पृच्छकस्य कपटजाले पतित्वा प्रताडिता भवन्ति । वास्तविक-जिज्ञासामूलकप्रश्नानां समाधानस्य अन्वेषणाय शास्त्रीयरीतिः प्रश्नविद्या । मनोरञ्जन-बुद्धिविलास-हास्य-विनोदादिभ्योऽस्य शास्त्रस्य प्रयोगोऽस्य दुरुपयोग एव । प्रश्नतन्त्रप्रणेतुः आचार्यनीलकण्ठस्य मतानुसारं क्षुद्र-कपटि-धूर्त-श्रद्धाहीनादीनामुपहासकर्तुश्च प्रश्ने प्रश्नफले वा नैव विचारः करणीयः ।[५] मनोवाक्कर्मसु भेदत्वाद् एतेषां प्रश्ननिर्णयो नैव यथार्थो भवितुं शक्नोति ।

पृच्छकस्य मनसि धातुमूलजीवेषु कस्य चिन्ता इति निर्णयार्थं प्रश्नग्रन्थेषु विस्तृतरूपेण विवेचनं वर्तते । अनेके सन्ति तत्र योगाः । तेषु च केषाञ्चिद् योगानामुल्लेख अधः क्रियते—

१. 'मेष-कर्क-तुला-मकर-राशयो धातुसंज्ञकाः । वृष-सिंह-वृश्चिक-कुंभ-राशयो मूलसंज्ञकाः । मिथुन-कन्या-धनु मीन राशयो जीवसंज्ञकाः । प्रश्नलग्ने सबलराशेरनुसारं धातुमूलजीवानां चिन्तास्तीति कथनीया ।'[६]

२. चन्द्र-भौम-शनि राहवो धातुप्रतिनिधयः । सूर्यशुक्रौ मूलप्रतिनिधी । गुरुबुधौ जीवप्रतिनिधी । परं कर्कराशिस्थ-चन्द्रोमूलप्रतिनिधिः, स्वराशिस्थशनिः लतादिप्रतिनिधिः जायते । अन्यथा च द्वावेव धातुप्रतिनिधी । एवमेव स्वराशिस्थ— बुधो धातुप्रतिनिधिः अन्यराशिस्थश्च जीवप्रतिनिधिः । अनेन प्रकारेण प्रश्नलग्ने सबलग्रहस्य लग्नेशस्य वाऽनुसारं धातु-मूल-जीव-विषयक-प्रश्नानां विचारः करणीयः ।[७]

---

१. ताजिकनीलकण्ठी— प्रश्नतन्त्र-श्लो- ८
२. मूकप्रश्नविचारः— अ-२-पृ ३२
३. मूकप्रश्नविचारः— अ-२-पृ ३२
४. ताजिकनीलकण्ठी— प्रश्नतन्त्र-श्लो-१०
५. ताजिकनीलकण्ठी— प्रश्नतन्त्र-श्लो-५,७
६. दैवज्ञवल्लभा — अ-१०-श्लो १२,१३
७. मूकप्रश्नविचारः— अ-२-पृ-३५

३. प्रश्नकुण्डल्यां यदि कश्चिद् ग्रहः प्रथम- पञ्चम-नवम-भावेषु कुत्रापि स्वनवमांशे स्थित्वा स्वनवमांशं पश्यति तदा पृच्छकमनसि धातुचिन्ता जायते । यदि ग्रहः कस्यचिदन्यग्रहस्य नवमांशे स्थित्वा लग्नपञ्चमनवम— भावेषु विद्यमानं भूत्वा स्वनवमांशं पश्यति तदा जीवविषयकचिन्ता जायते । यदि ग्रहः कस्यचिदन्यग्रहस्य नवमांशे स्थित्वा उक्तभावेषु भूत्वा अन्यग्रहस्य नवमांशं पश्यति तदा प्रश्नकर्तुर्मनसि मूलविषयकचिन्ता भवति ।[१]

४. प्रश्नलग्ने विषमराशौ प्रथमे-चतुर्थे-सप्तमे-वा नवमांशे धातुचिन्ता । द्वितीये पञ्चमेऽष्टमे वा नवमांशे मूलचिन्ता । तृतीये षष्ठे नवमे वा नवमांशे जीवचिन्ता ज्ञायते । एवं प्रश्नलग्ने समराशौ प्रथमे चतुर्थे सप्तमे वा नव- मांशे जीवचिन्ता द्वितीये पञ्चमेऽष्टमे वा नवमांशे मूलचिन्ता, तृतीये षष्ठे नवमे वा नवमांशे धातुचिन्ता विजानीयात् ।[२]

५. प्रश्नकुण्डल्यां सर्वाधिक—सबलग्रहेणापि धातुमूलजीवविषयकचिन्तानिर्णयो जायते । यथा— यदि सूर्यो भौमो वा बलवान् तदा धातुचिन्ता, यदि बुधः शनिर्वा बलयुक्तः तदा मूलचिन्ता, यदि चन्द्रो गुरुः शुक्रो वा बलवान् तदा जीवचिन्ता विद्यते ।[३]

एतेभ्यो योगेभ्योऽतिरिक्तं प्रश्नशास्त्राणामाचार्यैः मूकप्रश्नप्रसंगे धातुमूलजीवविषयकचिन्ता निर्णयार्थं कश्चित् कथिताः । यथा —

१. पृच्छकं संख्यां पृष्ट्वा तां द्विगुणं कृत्वा तत्रैकं संयोजयेत् । त्रिभिर्भागं कुर्यात् । एकस्मिन् शेषे जीवचिन्ता, द्वयोः शेषयोः धातुचिन्ता, शून्येऽवशिष्टे च मूलचिन्ता कथनीया ।[४]

२. आगमनकाले यदि प्रश्नकर्ता ऊर्ध्वं पश्यति तदा जीवचिन्ता, यदि अधः पश्यति तदा मूलचिन्ता, यदि सम्मुखं पश्यति तदा धातुचिन्ता कथनीया ।[५]

३. प्रश्नकर्तुः प्रश्नकाले पूर्वं प्रतिमुखे धातुचिन्ता, दक्षिणं प्रतिमुखे मूलचिन्ता, पश्चिमं प्रतिमुखे जीवचिन्ता तथोत्तरं प्रतिमुखे धातुमूलजीवविषयको मिश्रितप्रश्नो जायते ।[६]

४. प्रश्नकर्तुः प्रश्नकाले मुखबाहु-शिरः स्पर्शे जीवचिन्ता, हृदयोदरकटिस्पर्शे धातुचिन्ता, वस्ति-गुप्ताङ्ग-जङ्घा-पादस्पर्शे च मूलचिन्ता कथनीया ।[७]

---

१. षट्पञ्चाशिका — अ-१-श्लो-६ दैवज्ञवल्लभा-अ-१०-श्लो-९
२. षट्पञ्चाशिका — अ-१-श्लो — ७ दैवज्ञवल्लभा-अ-१०-श्लो-१०
३. मूकप्रश्नविचारः— अ-२-पृ-३६
४. प्रश्नचण्डेश्वर — अ-३-श्लो — ३,४
५. मूकप्रश्नविचारः — अ-२-पृ-३७
६. मूकप्रश्नविचारः — अ-२-पृ-३७,३८
७. मूकप्रश्नविचारः — अ-२-पृ-३७,३८

५. प्रश्नकर्तु: प्रश्नकाले पेयपदार्थस्य निकटतायां जीवचिन्ता, खाद्यस्य अन्नस्य वा पदार्थस्य समीपतायां मूलचिन्ता तथाऽग्निसमीपतायां धातुचिन्ता कथनीया ।[१]

मूकप्रश्नविषये धातु — मूल-जीव-सम्बन्धि वर्गीकरणानुसारं निर्णयप्रक्रियायां गम्भीरतां कठिनतां चावलोक्य मध्यकालीनैः आचार्यैः ग्रहाणां भावानां चाधारेण मूकप्रश्ननिर्णयाय प्रयासो विहितः । प्रश्नशास्त्रस्य विविधमहत्त्वपूर्णग्रन्थेषु सिद्धान्तस्यास्य प्रयोगो दृश्यते ।

(क) ग्रहसिद्धान्तः

सिद्धान्तस्यास्यानुसारं प्रश्नकुण्डलीं निर्माय सर्वप्रथमं मूकप्रश्नस्य प्रतिनिधिग्रहस्य विचारः क्रियते । भावेषु ग्रहस्थित्यनुसारं मूकप्रश्नस्य निर्णयः क्रियते । मूकप्रश्नस्य प्रतिनिधिः एतेषु कश्चिदेको भवति —

१. चन्द्र लग्नेशयोर्यो बलवान् स मूकप्रश्नस्य प्रतिनिधित्वं करोति ।[२]

बलविचारः स्थानबल-कालबल-चेष्टाबल-नैसर्गिकबल-दृष्टिबलानुसारं भवति ।[३]

२. चन्द्र लग्नेशयोः निर्बलतायां चतुर्थेशः मूकप्रश्नप्रतिनिधिर्जायते ।[४]

अत्रेदं ध्यातव्यं — चतुर्थेशो नीचराशिगतः, अस्तंगतोऽथवा युद्धे पराजितो भवति तदाऽस्य सिद्धान्तस्यानुसारं मूकप्रश्ननिर्णयो न करणीयः ।

तत्र तु भावसिद्धान्तानुसारं मूकप्रश्नविचारः कर्तव्यः । सिद्धान्तेऽस्मिन् ग्रहस्वरूपस्य ज्ञानमावश्यकम् ।[५]

(ख) भावसिद्धान्तः

१. बलवतो लग्नेशाद् लाभेशाद् वा चन्द्रो यस्मिन् स्थाने, तद्भाव—सम्बन्धी प्रश्नः प्रश्नकर्तुर्मनसि तिष्ठति ।[६]

२. लग्नेश-लाभेशाभ्यां चन्द्रे सबले चन्द्राद् लग्नेशो यस्मिन् स्थाने, तद्भाव-सम्बन्धी प्रश्नः पृच्छकस्य चेतसि जायते ।[७]

३. चतुर्थेश-लाभेश-चन्द्राणां निर्बलतायां प्रश्नकुण्डल्याम् उच्चराशिगतः सर्वेभ्यो वा बलवान् ग्रहो लग्नाद् यस्मिन् स्थाने तद्भावसम्बन्धी प्रश्नो जायते ।[८]

---

१. केरलीप्रश्नरत्न — मूकप्रश्नप्रकरण — श्लो— ९
२. मूकप्रश्नवचारः — अ-२-पृ - ७८
३. बृहज्जातकम् — ग्रप्र.अ — २ —श्लो १९ तः २३
४. मूकप्रश्नविचारः - अ-५-पृ-७९
५. ताजिकनीलकण्ठी— प्रश्नतन्त्र - अ १ श्लो २४ तः ३१
६. मूकप्रश्नविचारः — अ-६-पृ-१००
७. मूकप्रश्नविचारः — अ-६-पृ-१००
८. मूकप्रश्नविचारः — अ-५-पृ-१००

BVP-246

४. यदि चन्द्र एव लग्नेशो लाभेशो वा तदा स लग्नाद् यस्मिन् भावे, तद्भावसम्बन्धी चिन्ता कथनीया ।[१]

यो यो भावो निज स्वामिना शुभेन वा ग्रहेण दृष्टो युक्तो वा भवति तस्य तस्य भावस्य वृद्धिर्जायते । यश्च भाव: पापग्रहेण युक्तो दृष्टो वा जायते तस्य भावस्य हानि: सञ्जायते । प्रश्नलग्ने यदि शुभग्रहो, निजवर्ग: शीर्षोदयराशिर्वा स्यात्तदा कार्यसिद्धिर्जायते । एतद्विपरीते चासफलता सम्भाव्यते । मिश्रितग्रहेषु यत्नेन कार्यसिद्धिरिति वक्तव्यम् । लग्नेशो लग्नभावं कार्येशश्च कार्यभावं पश्येद् अथवा लग्नेश: कार्येशं कार्येशश्च लग्नेशं पश्येत् किंवा लग्नेश: कार्यभावं कार्येशश्च लग्नभावं पश्येत्, तत्र च चन्द्रदृष्टौ पूर्णरूपेण कार्यसिद्धि: । चन्द्रदृष्टिराहित्येन चाल्पाकार्यसिद्धिरिति ।[२]

मूकप्रश्नविचारनिर्णये, प्रश्नकाले लग्न-लग्नेशयो: बलविचार: करणीय: । एतयोर्यो बलवान्, तस्माच्चन्द्रो यावद्—भाव-दूरे स्यात्, लग्नात् तावद्-भाव-दूरे तद्भाव-सम्बन्धिचिन्ता मानवमनसि कथनीया । यदि लग्न—लग्नेशौ निर्बलौ, चन्द्रश्च बलवान् तदा चन्द्रात् लग्नेशो यावद्— भाव — दूरे, लग्नेशात् तावद् भावदूरे यो भावस्तेन सम्बन्धी प्रश्न: कथनीय: । चन्द्रस्यापि निर्बलतायां प्रश्नकुण्डल्यां यो बलवान् ग्रह: तद्भावसम्बन्धी प्रश्नो जायते ।[३]

मूकप्रश्नविचारे सम्यग् विचारानन्तरमेव भावविचारसन्दर्भे शुभाशुभफलं ज्ञातव्यम् ।[४]

सामान्यतया एकस्मिन् काले एक एव प्रश्नो विचारणीय: । परं यदि कश्चित्प्रष्टा विवशतावशाद् विशेषपरिस्थितिवशाद् वा एकस्मिन्नेव काले लग्ने वा बहून् प्रश्नान् पृच्छेत्तदा दैवज्ञ: प्रथमप्रश्नस्य लग्नेन, द्वितीयस्य चन्द्रेण, तृतीयस्य सूर्येण, चतुर्थस्य बृहस्पतिना विचारं कुर्यात् । बुधशुक्रयोर्यो बलवान् तेन च पञ्चमप्रश्नस्य विचार: करणीय: ।[५]

मुष्टिकाप्रश्नविचार:—

अत्यन्तचमत्कारपूर्णो जायते मुष्टिकाप्रश्न: । अत्र पृच्छक: स्वमुष्टिकावस्तुविषये पृच्छति । यद्यपि प्रश्नेनानेन मानवस्य सुख-दु:ख लाभ-हानि-प्रगति अवनति-भाग्यादीनां न कोऽपि सम्बन्ध:, न चैवं विधप्रश्नानां मानवजीवने कश्चित्प्रभाव एव । तथापि शास्त्रस्यास्य प्रत्यक्षचमत्कारप्रदर्शनार्थम्, जनानां शास्त्रेऽस्मिन् रुचि - श्रद्धा - विश्वासोपपादनार्थं च प्राचीनकालादेव मूकप्रश्नसन्दर्भे मुष्टिकाप्रश्नविचार: क्रियते । प्रश्नकुण्डल्यां चन्द्रो यस्या राशेर्नवमांशे भवति, तद्राशिद्वारा प्रश्नकर्तु: मुष्टिकायां विद्यमानवस्तुनो ज्ञानं सम्भाव्यते । प्रश्नलग्नस्य राशेरनुसारं मुष्टिकायां विद्यमानवस्तुनो वर्णज्ञानं जायते ।[६]

१. मूकप्रश्नविचार:-अ-५-पृ-१००
२. ताजिकनीलकण्ठी— भा-प्र-अ-२ श्लो- १ त:४
३. प्रश्नज्ञान (आर्यसप्तति) — पृ-९०,९१
४. ताजिकनीलकण्ठी— प्रश्नतन्त्र — अ – १ श्लो ३२ त:४३
५. ता.नी.क.— प्रश्नतन्त्र — अ-१-श्लो ११,१२
६. मूकप्रश्नविचार:- अ.- ४ - पृ.७४,७७

अस्माकं प्राचीनैः आचार्यैः मूकप्रश्नप्रकरणे मानसिकप्रश्ननिर्णय एव एकमात्रं लक्ष्यं मतम् । परं न केवलं प्रश्नकर्तुः जिज्ञासापूर्ति निजप्रश्नज्ञानेनैव संभवति । प्रायेण दृश्यते यत् पृच्छको स्वकीयमानसिकं प्रश्नं ज्ञात्वा तस्य शुभाशुभफलज्ञानाय जायते उत्कंठितः । अतो मानसिकप्रश्नस्य निर्णयानन्तरं ज्ञानानन्तरं वा तद्विषये शुभाशुफल-कथनमपि दैवज्ञस्य कृते आवश्यकम् । प्रश्नशास्त्रस्यैकमात्रं प्रयोजनमपि पृष्टप्रश्नस्य विषये शुभाशुभपरिणामज्ञानं वर्तते । अत एवं प्रश्नशास्त्रेषु विविधप्रश्नानां फलज्ञानाय विविधयोगाः वर्णिताः सन्ति । प्रश्नानां शुभाशुभफल-ज्ञानाय डॉ शुकदेवचतुर्वेदी प्रणीतो मूकप्रश्नवचारः, ताजिकनीलकण्ठी, भुवनदीपकः, आचार्य भट्टोत्पलकृतप्रश्न-ज्ञानम्-उत्तमश्रेण्याः सटीकग्रन्थाः सन्ति ।

वस्तुतः मूकप्रश्नस्य तत्फलस्य च वास्तविकरूपेण कथनमेकः चमत्कार एव । एतदर्थं पवित्रतैकाग्रतादीनां शास्त्रस्य गहनचिन्तनस्य च परमावश्यकता जातये । तदैव दैवज्ञो दैवज्ञतां लभते ।

'अप्रत्यक्षाणि शास्त्राणि, विवादास्तेषु केवलम् ।
प्रत्यक्षं ज्यौतिषं शास्त्रं, चन्द्रार्कौ यत्र साक्षिणौ ॥'

खग्रासचिन्तनम्

श्री भोजराजशर्मा

खगोलविद: ज्योतिषशास्त्रीयवैज्ञानिकाश्च ग्रहनक्षत्राणां दृश्य एवं सूक्ष्मगणितप्रक्रियया गतिक्रमं विनिश्चित्य भूतभविष्यद् वर्तमानकालिकं परिवर्तनं निर्दिशन्ति। केषाञ्चिन्मते सूर्यस्य स्थिरताम् इतर-ग्रहाणाञ्च तत्परित: चंक्रमणमुपदिशन्ति। भूमण्डलमिदमपि, ताराग्रहसंकुलेषु महत्त्वपूर्णं विद्यते। स्थूलदृष्ट्या सूर्याचन्द्रमसो, विशालताऽनुभूयते। परं एतदस्माकं भ्रम एव। दूरदर्शकयन्त्रै: गतिक्रमनिर्देशकैश्च कुजज्ञादीनां सुदूरतरतां प्रचुरविस्तरतां च प्रमाणी क्रियते। कालगतिक्रमे सति व्याघाते संघट्टन-विघट्टनादीनां च उल्कापातविक्षेपादीनि दरीदृश्यन्तेऽस्माभि:। बहूनि च चर्मचक्षुषमगोचरत्वान्नैव द्रष्टुं पार्यते। न चानुभवोऽपि सुदूरत्वात् कर्त्तुं शक्यते 'ऋषयो मन्त्रद्रष्टार: न तु कर्त्तार:' इति वैदिकार्षसिद्धान्त: सुसिद्धम् भवति। प्राक्तनै: खगोलविद्भि: ऋषिमहर्षिभि: दृष्ट्याप्रभावेन वाऽखिल-खेटानां स्वरूपोच्छ्राय विस्तारं गाम्भीर्यं ज्योतिषशास्त्रीयऽऽकरग्रन्थेषु सुनिबद्धम्। केषांचन ध्रुव-संज्ञकानां खेटानां एकत्रैव स्थिरत्वमपि निर्धारितम्। परमधिकांश तु ग्रहनक्षत्रादीनां संचरणशीलतामेव प्रतिपादयांश्चक्रुस्तै विद्वद्तल्लजै:।

एवमेव चन्द्रसूर्यादीनां गति व्याघातत्वात् छायाग्रहाणां सन्निपातेन वा सुप्रसिद्धबहुश्रुतनाम्ना चन्द्रग्रहणं सूर्यग्रहणमित्यादिकं परिचीयते, किन्तु अन्येषामपि ग्रहाणां (अन्त: सम्पातेन) अन्तरनिपातेन विविधग्रहणादीनि जायन्ते अत्र च देशकालगतिसापेक्षतया पूर्णग्रहणं, ग्रस्तास्तग्रहणं, खण्डग्रासेत्यादिकं प्रभावो नैव मनुते। इत्ये तत् एकस्मिन्नेव देशे, एकस्मिन्नेव प्रान्ते, एकस्मिन्नेव काले च नियतसीमातो बहिर्दर्शनं प्रभावश्च नैव जायते। ग्रहणकालिकग्रहणानां प्रभावपरिणामो विविधराशिवर्गे तत्फलं च निर्दिश्यते नान्यत्र। अतएव ज्योतिष-शास्त्रे ग्रहणादीनां महत्त्वमालोच्य तत्फलादिकं नियतशीर्षकानुगतो विषयोऽयं मयाऽत्र प्रस्तुत:।

ग्रहण-वैविध्यं च

ब्रह्माण्डे यत्वस्तु दृश्यते तत् वस्तु पिण्डेऽपि विद्यते। यथा — ब्रह्माण्डे सूर्यचन्द्रौ विद्येते तथैव पिण्डेऽपि स्त: जाबालोपनिषदि चतुर्थखण्डे योगिपुरुषस्य कृते शरीरे विद्यमानचन्द्रग्रहणस्य स्वरूपं इत्थं निरूपितम्।[१]

इडाया: कुण्डलीस्थानं यदा प्राण: समागत:।
सोमग्रहणमित्युक्तं तदा तत्त्वविदां वर:॥

---

१. जाबालोपनिषद् ४ खण्डश्लोक ४६१

तत्रैव तस्मिन् एव प्रसंगे सूर्यग्रहणविषयेऽपि वृत्तमेतत् निरूपितम् —

यदापिंगलया प्राणः कुण्डलीस्थानमागतः ।
तदा तदा भवेत् सूर्यग्रहणं मुनिपुंगव ॥

सांस्कृतिनाम्नः योगीराजस्य गुरुः महायोगी दत्तात्रेयः स्वशिष्यं सांकृतिम् अष्टाङ्गयोगम् उपदिशति । तस्मिन्नेव योगोपदेशप्रसंगे इडा, कुण्डली, पिंगलाभिधानाः नाडीनां वर्णनमस्ति । कन्दमध्ये सुषुम्ना नाडी वर्तते । यं परितः ७२००० नाडयः सन्ति । तासु १४ चतुर्दशनाडयः मुख्याः सन्ति । पृष्ठभागे मध्यस्थिता या अस्थिरूपा वीणादण्डवत् सा मेरुदण्डवद अस्ति तस्मात् मस्तकपर्यन्तां जायमानां नाडीं सुषुम्नां कथयन्ति । सुषुम्ना वामभागे इडा नाडी वर्तते तथा दक्षिणभागे पिंगला नाडी वर्तते । नाभिकेन्द्रात् अंगुलद्वयम् अधोभागे कुण्डलीनाड़ी अस्ति । इडा नाड्याः प्राणाः कुण्डली इत्यस्याः स्थाने गच्छन्ति तदा चन्द्रग्रहणं भवति । यदा च पिंगलातः कुण्डलीस्थाने प्राणाः गच्छन्ति तदा सूर्यग्रहणं भवति । योगिनः इममेव वृत्तान्तं सूर्यचन्द्रग्रहणं कथयन्ति ।

ग्रहणानां पौराणिकस्वरूपवर्णनम्

श्रीमद्भागवतस्थ अष्टमस्कन्धे नवमाध्याये २४ तमे श्लोकादारभ्य षड्विंशतिश्लोकं यावत् ग्रहणविषये एवं निरूपितम् —[१]

देवलिंगप्रतिच्छन्नः स्वर्भानुर्देव संसदि ।
प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः ॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः ।
हरिस्तस्य कबन्धस्तु सुधयाप्लावितोऽपतत् ॥
शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ।
यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ॥

विष्णुः यदा मोहिनीरूपं धृत्वां देवान् अमृतपानं कर्तुमारम्भे तदा राहुः देवस्वरूपं धृत्वां तेषां पंक्तिमध्ये उपाविशत्, तदानीम्, सूर्यचन्द्रौ विष्णुमबोधयतां संसूचिते चन्द्रभानुभ्यां विष्णुः स्वसुदर्शनचक्रेण राहोः शिरः चिच्छेद । अनेन प्रकारेण अमृतेन परिपूर्णः वक्षः केतु नाम्ना प्रसिद्धिमगात् शिरश्च राहुनाम्ना प्रसिद्धिमगात् । विष्णुना सः दैत्यः ग्रहः कथितः । अनेन विरोधेन सः ग्रहः पौर्णमास्यां चन्द्रं प्रति धावति तथा अमायां सूर्याभिमुखं धावति । पुराणेषु ग्रहणस्य एतदेवस्वरूपम् निरुपितम् ।

१. श्रीमद्भागवतम्,८/९/२४-२६

ज्योतिषशास्त्रदृष्ट्या ग्रहणम्

ग्रहणावसरे भूभा चन्द्रम् आच्छादयति । यदा च सूर्यग्रहणं भवति तदा चन्द्रः सूर्यम् आच्छादयति । यथा "सिद्धान्तशिरोमणौ पर्वसम्भवाधिकारे श्रीभास्कराचार्यः निरूपयति भूभा विधुं विधुरिणं ग्रहणेपि धत्ते"[१] इममेव व्याख्यानं सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारे उक्तम् ।

छादको भास्करस्येन्दुरधः स्थोघनवदभवेत् ।
भूभायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ ॥

निम्नगश्चन्द्रः जलदैरिव सूर्यम् आच्छायति । प्राङ्मुखश्चन्द्रः भूभायाम् प्रविशति एतावता भूभा चन्द्रम् आच्छादयति । एतद् विशेषेण ध्यातव्यमस्ति यद् भूभां एवं "सूर्यसिद्धान्त" चन्द्रग्रहणाधिकारे पञ्चमे श्लोके "तम" नाम्ना कथितम् । "विशोध्य लब्धं सूच्यां तमो लिप्तस्तु पूर्ववत्" ।

अमरकोशेऽपि "तम" राहुः प्रोक्तः
"तमस्तु राहुः स्वर्भानुः सैंहिकोविधुन्तुदः" ।

पृथिव्याः छायायाः अधिष्ठाता राहु अस्ति । एतत् प्रसंगं सिद्धान्तशिरोमणिग्रन्थेनापि सुस्पष्टं भवति । अस्मिन् प्रसंगे श्रीभास्कराचार्यः व्याख्यापयति —

राहुः कुभामण्डलगः शशांकं
शशांकगश्छादयतीबबिम्बम् ।

तमोमयः शम्भुवरप्रदानात्
सर्वागमानामविरुद्धमेतत् ॥

पृथिव्याः छायायाः अधिष्ठाता राहुः चन्द्रं पिधत्ते अतः "सिद्धान्तशिरोमणौ" चन्द्रग्रहणाधिकारे "अगुः च तदोक्तवत्"[२] एतत् पद्यांशं "अगुः" अर्थात् राहुरपि ग्रहणस्य स्पर्शं करोति ।

कूर्मपुराणे पूर्वार्धभागे ४१ तमे अध्याये स्पष्टीकृतम् यत् धरित्रयाः छायया राहो अन्धकारमयं मण्डलम् जायते यथा —

उद्धृत्य पृथिवीच्छायां निर्मितो मण्डलाकृतिः ।
स्वर्भानोस्तु वृहत् स्थानं तृतीयं तमोमयम् ॥

सूर्याचन्द्रमसो ग्रहणं अमापूर्णातिथावेव कथमिति ?

ग्रहणं कदा कथं चेति

१. सिद्धान्तशिरोमणिः पर्वसम्भवाधिकारः श्लोकः९
२. सि.शि.ग.च. ग्रहणश्लोकः २

सूर्यसिद्धान्तचन्द्रग्रहणाधिकारे षष्ठश्लोके भूभा सूर्यात् षड्राशिरन्तराले परिक्रामति । तथा पौर्णमास्यां च चन्द्रः सूर्यात् षड्राशिरन्तराले भ्रमति ।

"भानोर्भार्धे महीच्छाया तत्तुल्येऽर्के समेऽपि वा ।"

अनेन कारणेन भूभा चन्द्रं पिधत्ते परं च षड्राशि अन्तराले जायमानेऽपि यस्यां पौर्णमास्यां सूर्यः तथा चन्द्र उभयोः अंश, कला, विकलाः धरित्री समाः भवन्ति तस्यामेव पौर्णमास्यां चन्द्रग्रहणं भवति । अमावस्यायाः अपरनाम सूर्येन्दुसंगम अस्ति । अर्थात् सूर्यचन्द्रौ खस्थं स्वकक्षायां विद्यमानौ अपि अमायां एकराशौ स्थितौ सन् सम्मिलितौ भवतः इत्यर्थः । एतादृशः संगमः प्रति अमायां भवतीत्यर्थः । "अमावस्या" शब्दस्य व्युत्पत्तिलभ्योऽर्थः अयमेव तेनापि एतदवगम्यते यत् सूर्यचन्द्रौ अमायाम् एकराशौ स्थितौ भवतः । यथा —

"अमया सह वसतः चन्द्राकौं अस्यामिति अमावास्या"

अस्यार्थस्तु पूर्णः एव चिन्तनीयमिदमस्ति यद् यस्याम् अमायां सूर्यस्य चन्द्रस्य च अंश कला विकलाः समानाः भवेयुः तस्यामेव अमायां सूर्यग्रहणं भवति । इमं विषयं सूर्यसिद्धान्तस्य चन्द्रग्रहणाधिकारे व्याख्यापयति ग्रन्थकार :—

तुल्यौ राश्यादिभिः स्यातामावास्यान्तकालिकौ ।
सूर्येन्दू पौर्णमास्यते भार्धे भागादिभिः समौ ॥[१]

ग्रहणकाले शशिसूर्ययोः विवर्णभावत्वम्

एतत्तु सूर्यसिद्धान्तस्य छेद्यकाधिकारे सुस्पष्टम् । यथा —

अर्धादूने सधूम्रं स्यात् कृष्णमर्धाधिके भवेत् ।
विमुञ्चतः कृष्णताम्रं कपिलं सकलग्रहे ॥[२]

अर्थात् अर्धभागात् न्यूनः चन्द्रस्य ग्रासमानं स्यात् तदा सधूम्रमिव अर्धभागादधिकः ग्रासमानं स्यात्तदा कृष्णवर्णः; चतुर्थांशभागादधिके ग्रासमाने सति कृष्णताम्रवर्णः एवं च निखिले ग्रासमानं जायमाने विधोः वर्णः कपिलः भवति । पृथिव्याः छाया कृष्णवर्णास्ति तथा चन्द्रश्च पीतवर्णः एतावता पर्णद्वयसंमेलनेन ग्रासस्य न्यूनाधिक्यं भवति तेन कारणेन चन्द्रस्य कृष्णरक्तपीतवर्णाः भवन्ति । चन्द्रस्तु जलगोलकोऽस्ति भायां चन्द्रस्य दृश्यबिम्बं सर्वदैव कृष्णवर्णः भवति । सूर्यग्रहणावसरे सूर्यवर्णोऽपि सर्वदैव कृष्णवर्णः भवति; कियदेव भागस्य ग्रासं स्यात् अत्र चन्द्रवत् ग्रासमानभागस्य न्यूनाधिकस्य अनिवार्यता नास्ति । त्रिजटायाः उक्तिरेषा —

"छायावैगुण्यमात्रं तु शंके दुःखमुपसितिम् ।"[३]

१. सूर्यसिद्धान्तचन्द्रग्रहण श्लो.७

२. सूर्यसिद्धान्त छेयकाधिकार श्लो.२३

३. सुन्दरकाण्डम् सर्ग २९/५८

सीतायाः दुःखोपस्थिति छायावैगुण्यमात्र ग्रहणावसरे चन्द्रस्य छायावैगुण्यवदिव। अनेन वृत्तान्तेन ग्रहणावसरे भूभायाः परिपुष्टिरेव जायते।

काव्यदृष्ट्या ग्रहणम् —

यं कालिदासं इतिहासकाराः सहस्रद्वयवर्षादधिकं प्राचीनं मन्यन्ते तेनैव कालिदासेन रघुवंशकाव्ये लिखितम् (१४/७) यत् पृथिव्याः छायायाः चन्द्रे प्रपतनं सुस्पष्टम् —

अवैमि चैनामनधेति किन्तु
लोकापवादो बलवान् मतो मे।
छाया हि भूमेः शशिनो मलत्वा—
दारोपिता शुद्धिमतः प्रजाभिः ॥[१]

यदा रामः चतुर्दशवर्षाणि वने यापयित्वा अयोध्यां प्रति आजगाम तदा सीता विषये लोकापवादमाकर्ण्य कथयति यत् अहं एतदवैमि सीता निष्कलंकास्ति परं च लोकापवादो हि बलवान् मतो मे यतः चन्द्रोपरि भूभा एव पतति परन्तु जनाः तां छायां चन्द्रस्य मलीमसमभिधत्ते।

एतद्विषयकं ज्ञानं तु कालिदासोऽपि अवैति स्म। विज्ञानिकैः अस्मिन् विषये न कापि नवीनाविष्कृतिः कृता।

ग्रहणकाले स्थानतीर्थादीनां प्राधान्यम्

पुराणेषु चन्द्रग्रहणस्य महत्त्वं वाराणस्याम् अधिकमस्ति इति वर्णनमस्ति। तथा च सूर्यग्रहणस्याधिकं महत्त्वं कुरुक्षेत्रेऽस्ति एतदेव कारणं यत् श्रीकृष्णस्य जनकः वसुदेवः सूर्यग्रहणावसरे कुरुक्षेत्रे आजगाम तथा सः तत्र गत्त्वा यज्ञं कारयामास। एतदेव वृत्तान्तं श्रीमद्भागवतः दशमस्कन्धे उत्तरार्धे सुस्पष्टं लिखितमस्ति।

धर्मशास्त्रदृष्ट्या ग्रहणविमर्शः

धर्मशास्त्रेषु वर्णनमस्ति यत् ग्रहणकाले जपदानस्नानहवनादिभिः बहुफलं भवति। इममेव विषयं भास्कराचार्यः समर्थयति। धर्मसिन्धौ वर्णनमस्ति यत् ग्रहणावसरे (प्रारम्भकाले) स्नानं विधेयम्; ग्रहणमध्यकाले हवनं विधेयम् ग्रहणसमाप्तिकाले दानं कर्तव्यम् तथा च ग्रहणसमाप्तिकाले पुनः स्नानमाचरेत्। यदि सूर्यग्रहणं रविवासरे चन्द्रग्रहणं च सोमवासरे स्यात्तदा तं ग्रहणं चूड़ामणि नामकं ग्रहणं कथयन्ति। इदृशे ग्रहणे जपदानस्नानहवनादिकानां पूर्ववर्णितग्रहाणामपेक्षया विशेषमहत्त्वमस्ति।

---

१. रघुवंशः १७/७

तन्त्रशास्त्रदृष्ट्या ग्रहणविचारः

शारदातिलके; द्वितीयपटलस्य दीक्षाप्रकरणस्य पदार्थदर्शव्याख्यायां रुद्रयामलं ग्रन्थमुद्दिश्य उद्धृतम्। यथा—

सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्वणोः।
मन्त्रदीक्षां प्रकुर्वाणो मासबर्षादीन न शोधयेत्॥

अगस्त्यसंहितायाम् अपि लिखितमस्ति

सूर्यग्रहणकालेन समोऽन्यो नास्ति कश्चन।
तत्र तद् यत् कृतं सर्वमनन्तफलदं भवेत्॥
सिद्धिर्भवति मन्त्रस्य बिनाऽऽयासेन वेगतः।
कर्तव्यं सर्वयत्नेन मन्त्रसिद्धिरभीप्सुभिः॥

तीर्थेषु तथा सूर्यचन्द्रग्रहणावसरे मंत्रदीक्षां प्राप्तुं कापि विचारणा न कार्या यतो हि सूर्यग्रहणसदृशं कोप्यवसरो नास्ति। एषु श्लोकेषु मंत्रशब्देन यंत्रसिद्धेरपि वर्णनम् अवधेयम् पुनश्च सारसंक्षेपेण वर्णयति यत् ग्रहणकाले मंत्रजापेन तथा मंत्रलेखनेन विलक्षणा सिद्धिः जायते।

एतदतिरिक्तम् अस्मिन्नवसरे रुद्राक्षमालायाः धारणेन पापानाम् नाशः भवति। (पापादयः नश्यन्ति) जालोपनिषदि ४४ तमे श्लोके लिखितमस्ति यत्—

ग्रहणे विषुवे चैवमयने सङ्क्रमेऽपि च।
दर्शेषु पूर्णेषु दिवसेषु च।
रुद्राक्षधारणात् सद्यः सर्वमापैः प्रमुच्यते।

गणपत्युपनिषदिवृत्तमेतत् निरूपितं यत् सूर्यग्रहणे महानद्यां गंगायां; यमुनायां सरस्वती प्रभृतिषु नदीषु किं वा प्रतिमासन्निधौ मंत्रजपकर्मणा तन्मन्त्रं सिद्धयति।

तथाहि तमेव प्रतिपादयति —

"सूर्यग्रहणे महानद्यां प्रतिमासं निधौ वा जप्त्वा स सिद्धमन्त्रो भवति"[१]

अस्माद्धेतोः सूर्यचन्द्रग्रहणावसरे मंत्रयंत्रादीन् लिखेत् तेन सिद्धिभर्वति सुनिश्चिता।

ग्रहणावसरे दर्भप्रयोगस्य माहात्म्यम्

ग्रहणावसरे विधानतः जलादिषु आदिशब्देन दुग्धतक्रादिष्वपि कुशायाः पातनं/प्रक्षेपणं कुर्यात् यतो हि कुशाप्रक्षेपेण ग्रहणकाले ये परमाणवः अशुद्धाः जायन्ते। तेषां कुशापातित वस्तूनामुपरि कुप्रभावो नैव जायते एतत्

१. गणपत्युपनिषद् मन्त्र-८

आंग्लचिकित्सकानामपि मतमस्ति अनुभवञ्चाप्यस्ति तेषाम्। धर्मशास्त्रदृष्ट्या तु सुसम्मतमेतत्। अतः निर्णयसिन्धौ मन्वर्थमुक्तावल्याः वचनमुधृत्य कुशायाः महत्त्वं प्रतिपादितम्। यथा —

वारितक्रारनालादितिलदर्भैर्न दुष्यति"।

ग्रहणावसरे तक्रं, जलम् अन्नपानादिकम् आरनालादिषु कुशायाः पातनेन नैव दुष्यन्ति। अस्माद्धेतोः कुशासनोपरि उपविश्य योगमन्त्रजपादिनां विधानमस्ति।[1] कुशासनोपरि उपवेशनेन अशुद्धपरमाणुनां सम्पर्कः सर्वथा नैव जायते। मनश्च स्थिरः बुद्धिस्तु निर्मला तिष्ठति, प्रमादश्च नश्यति। कुशायाः महत्त्वं महाभाष्यस्य तृतीये आह्निके —"वृद्धिरादैच्" १-१-१ सूत्रस्य व्याख्यायाम् निर्दिशति —

प्रमाणभूतो आचार्यो दर्भपवित्रपाणिः सूत्राणि प्रणयति स्म इत्यादि अर्थात् प्रामाणिकः आचार्यः पाणौ कुशायाः पवित्रीं धृत्वा पवित्रस्थाने कुशासनोपरि पूर्वाभिमुखम् उपविष्टः सन् सूत्राणि रचयति। अतः कस्यापि सूत्रस्य कोऽपि वर्णः अनर्थं नैव भजते "वृद्धिरादैच" सूत्रं किं विसंगतिं प्राप्तुं शक्यते? प्रतिदिनं क्रियमाणानि जपतपादि एतदतिरिक्तं मया श्रुतं दृष्टञ्च यत् जायायाः उदरे भ्रूणस्योपस्थितेः सम्भावनायां प्रसूतिकालं यावत् प्रतिदिनं पात्रे जलं निधाय सूर्याभिमुखं भूत्वा दर्भेण जलं आलोडयन्। यः नरः आदित्यहृदयं स्तोत्रं पठति तस्य पुत्रो जायते।

वैज्ञानिकाः कथयन्ति यत् पृथिव्याः छाया पतनेन चन्द्रग्रहणं भवति। एतत्तेषां कथनं सुसंगतमस्ति। यथार्थेन पृथिव्याः छाया पतनेन चन्द्रग्रहणं जायते तथा चन्द्रेण सूर्यस्यपिधानं जायमाने सति सूर्यग्रहणम् भवति इति सिद्धान्तः अस्माकम् ज्योतिः शास्त्रवेत्तारः प्रमाणैरेव साधितम्।

वैज्ञानिकानां सिद्धान्तास्तु पृथक् भूताः सन्ति।

पूर्ववैज्ञानिकाः खं नैव मन्यन्ते स्म किन्त्वधुना "ईश्वर" नाम्नां तं (आकाशं) मन्यन्ते। भारतीयग्रन्थेषु श्रुतिस्मृतिपुराणदर्शनशास्त्रादिषु आकाशम् अमन्यन्तः। न्यायशास्त्रे प्रतिपदे दृढप्रमाणैः आकाशं स्पष्टीकृतम्। आकाशोऽपि पञ्चमहाभूतात्मकः।

केचन वैज्ञानिकाः आत्माम् अपि भारम् अमन्यन् किन्त्वधुना एषा धारणातत्याज। दिव्यदृष्टिमहर्षिभिः सर्वा वार्ताः योगबलेन प्रत्यक्षीकृत्वा अरचयन्। एतदर्थं ग्रहणस्य स्वरूपमपि अस्माभिः भारतीयशास्त्राणाम् आधारेण लिखितम्।

---

१. श्रीमद्भगवद्गीता ६/११

व्याकरणं तपसामुत्तमं तपः

डॉ. वि.के. शैलजा

यानि लोके तपस्त्वेनाभिख्यातानि तेषां मध्ये व्याकरणम् उत्तमं तपः भवतीति । अधःशयनम्, भूमिशायिता, उदवासः, चान्द्रायणमित्यादीनि सर्वाणि कर्माणि अदृष्टफलहेतुत्वात् तपस्त्वेनाभिख्यातानि । तपो हि दुःखात्मकम् । व्याकरणाध्ययनञ्च भूयिष्णु दुःखसाध्यमित्युत्तमं तपः । "एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवती" ति वचनेन च व्याकरणस्य उत्तमत्वं बोध्यते । व्याकरणं दृष्टादृष्टविशेषफलहेतुवाद् अभिख्याततमं तपः । व्याकरणस्य दृष्टं प्रयोजनं पदपदार्थबोधः । अदृष्टं फलं व्याकरणज्ञानेन वेदार्थानां सम्यक् अवगमः तद्द्वारा मोक्षप्राप्तिश्च ।

शब्दस्य प्रयोगविषयः महत्तमः । सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः, साङ्गाः सरहस्याः बहुधा भिन्नाः, एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिबाहृवृच्यम्, नवधाऽऽथर्वणो वेदः, वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतच्छब्दस्य प्रयोगविषयः । एवं लौकिकाः वैदिकाश्च शब्दाः बहवः सन्ति । श्रूयते पुरा किल देवगुरुः बृहस्पतिः देवेन्द्राय शब्दानां प्रतिपदपाठं प्रोवाच । दिव्यवर्षसहस्रानन्तरमपि नान्तं जगाम । इदानीन्तकाले सर्वशब्दानां पठने अल्पायुष्मान् मनुष्यः बुद्धिप्रभावे न्यूनतमः अतीवासमर्थः । अतः लघूपायेन शब्दानां ज्ञानार्थमाचार्याः व्याकरणमरचयन् । सुविदितमेव विदितवेदितव्यानां विविधविद्यामानसानां यद् अखिलमपि भारतीयं ज्ञानं वेदमूलकमेव । तत्र षडङ्गेषु विस्तृताया वेदसम्पदोऽन्यतमं रत्नं व्याकरणशास्त्रम् । व्याकरणं वेदानां वेद इतिप्रसिद्धम् । यास्काचार्यात् पूर्वमपि व्याकरणशास्त्रपरम्परा आसीत् । तत्र पाणिनीयं व्याकरणमेव प्रसिद्धम् आसीत् । "मुखं व्याकरणं प्रोक्तम्" इत्यादिना व्याकरणस्य प्राधान्यमवगम्यते । यथा सर्वाङ्गसुन्दरेऽपि शरीरे विकृतमुखस्य यत्स्वरूपं तन्नतिरोहितं कस्यापि स चेतसः । सैव व्याकरणज्ञानविहीनस्यापि विदुषः स्थितिः । 'त्रिमुनिव्याकरणम्' इति प्रसिद्ध्या पाणिनिकात्यायनपतञ्जलि-महोदयानां ग्रहणम् ।

सर्वप्रथमं ब्रह्मणो मनसि विचारो बभूव; यद्—'एकोऽहं बहुस्याम्' इति । तदेव सृष्टेः कारणम् । ब्रह्मैव विद्यान्तराणामेव व्याकरणविद्यायाः प्रवर्तकस्तदनन्तरं गार्ग्यगालवशाकटायनशाकल्यप्रभृतयस्तदनु पाणिनिकात्यायनपतञ्जलयः शास्त्रमिदं प्रथयामासुः । पूर्वाचार्याणां ज्ञाननिक्षेपः सम्प्रति भारतीयानां किमुत सर्वेषां मानवानाममूल्यो निधिः । भाषाशास्त्रस्य व्याकरणं प्रदीपः, शब्दब्रह्मोपासकानाम् अपरः कल्पवृक्षः ।

तत्र व्याकरणं नाम सूत्रमिति केषाञ्चिन्मतम् । लक्ष्याणां साधुशब्दानां प्राप्त्युपायभूतं लक्षणरूपं सूत्रं व्याकरणमिति यावत् । यतो हि, व्याकरणस्य सूत्ररूपत्वेन सूत्रभिन्नस्य व्याकरणस्याभावेदेन व्याकरणसूत्रयोर भेदे

विधीयमाना षष्ठी न स्यात्। तदुक्तं वार्तिककारेण—"सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते" इति। न सूत्रादेव शब्दानां प्रतिपत्तिः, अपि तु व्याख्यानाच्च। व्याख्यानञ्च न केवलं सूत्रं, किन्तु पदच्छेदः, उदाहरणं, प्रत्युदाहरणं, वाक्याध्याहारः इत्येतत् समुदितम्।

शब्दः व्याकरणमित्यपरः पक्षः। लक्षणभूतं व्याकरणं मा भूत्; किन्तु लक्ष्यभूतः शब्दः व्याकरणम् इति यावत्। तथा सति, व्याकरणमिति शब्दे करणाधिकरणयोश्चेति ल्युट् प्रत्ययः भवति। शब्दः व्याकरणस्य करणं न भवति। किन्तु सूत्रमेव। किञ्च व्याकरणमधीते विदन्ति वा वैयाकरणाः इत्यत्र भावार्थकतद्धितप्रत्ययः न युज्यते। किञ्च पाणिनिना प्रोक्तं पाणिनीयम्। पाणिन्यादिभिः सूत्राण्येव प्रोक्तानि। व्याकरणान् शब्दान् प्रतिपद्यामहे इत्यादि व्यवहारेण शब्दैरपि शब्दाः व्याक्रियन्ते। तद्यथा—गौरित्युक्ते सर्वे सन्देहाः निवर्तन्ते, नाश्वो न गर्दभ इति। तस्माद् व्याकरणं शब्दान् प्रतिपद्यामहे इत्यादि व्यवहाराणामुत्पत्तिर्न। व्याकरणे भवो योगः वैयाकरणः। पाणिनिना प्रोक्तं प्राणिनीयम् इत्यादीनामसिध्यापत्तेः। तस्मान् न केवलं शब्दः व्याकरणं नापि सूत्रं, किन्तु लक्ष्यलक्षणे व्याकरणम्। लक्ष्यः साधुशब्दः लक्षणं सूत्रम्। एतत् समुदितं व्याकरणं भवति। नन्वस्मिन् पक्षे लक्ष्यलक्षणरूपस्य समुदायस्यैव व्याकरणशब्दार्थत्वेन केवले लक्ष्ये केवले लक्षणे वा व्याकरणशब्दस्य व्यवहारानुपपत्तिः। समुदायेषु प्रवृत्ताः शब्दाः अवयवेष्वपि प्रवर्तन्ते। यथा पूर्वे पाञ्चालाः उत्तरे पञ्चालाः। तस्मात् लक्ष्यलक्षणे व्याकरणमिति।

सूत्रं व्याकरणमिति पक्षेऽपि दोषो नास्तीति महाभाष्यकारेण प्रतिपादितम्। तस्मिन् पक्षे व्याकरणस्य सूत्रमिति व्यवहारः व्यपदेशिवद्भावेनोपपादयितुं शक्यते। तथा च केवलं सूत्रादेव शब्दानां प्रतिपत्तिः। किन्तु व्याख्यानात् इत्यादि दोषः परिहर्तुं शक्यते। सूत्रात् व्याख्यानस्य भेदो नास्तीत्यतः भाष्ये पक्षद्वयस्यापि साधुत्वं प्रतिपादितम्॥

ब्रह्मप्राप्त्यर्थं वेदस्य सम्यक्ज्ञानमावश्यकम्। तदर्थमेतद् व्याकरणं मुख्यम् एव। षट्सु वेदाङ्गेषु व्याकरणमेव परमप्रधानम्। वेदार्थज्ञानाय निरुक्तम्, छन्दानां विविच्य ज्ञानाय छन्दः, वर्णानामुच्चारणविषयक- बोधाय शिक्षा, कर्मणां प्रयोगज्ञानाय कल्पः तिथिनक्षत्रादीनामवगमाय ज्योतिषशास्त्रञ्चापेक्षितम्। किन्तु, वेदस्य स्वरूपज्ञानाय व्याकरणमवश्यमेव। व्याकरणं विना वेदमन्त्राणां निष्कृष्य ज्ञानं नोपलभ्यते। यथा—"स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत" इति मन्त्रे स्थूला चासौ पृषती च स्थूलपृषतीति वा, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति वा विग्रहः इति निर्णयः व्याकरणज्ञानेनैव कर्तुं शक्यम्।

'रक्षोहागमलघ्वसन्देहाः व्याकरण ज्ञानस्य मुख्यप्रयोजनानि' इति महाभाष्ये पस्पशाह्निके उक्तम्। लोपागमवर्णविकारज्ञ एव सम्यक् वेदान् परिपालयितुं समर्थः। तद्वत् भिन्नभिन्नविभक्तिषु मन्त्रान् विपरिणम्य प्रयोक्तुं वैयाकरण एव शक्नोति। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। वेदाध्ययने षडङ्गेषु मुख्यं व्याकरणम्। एवं लघूपायेन कृत्स्नानां शब्दानां ज्ञानार्थमपि व्याकरणमवश्यं ज्ञातव्यम्। वेदमन्त्राणां क्लृप्तरूपेणावगमनार्थमपि व्याकरणाध्ययनमावश्यकम्।

अन्यानि चानुषङ्गिकप्रयोजनानि महाभाष्ये उक्तानि। "चत्वारि शृङ्गास्त्रयोऽस्य पादा" इत्यादि श्लोकेन महाभाष्यकारेण ऋग्वेदीयमन्त्रं व्याकरणदृशा व्याख्यातवता महता देवेन नः साम्यं यथा स्यादित्यवध्येयं व्याकरणम्

इति निरूपितम् । एवं "चत्वारि वाक्परिमिता....." इत्यादि मन्त्रस्य चत्वारि पदजातानि नामाख्यातोपसर्गता निपाश्च व्याख्याता: ।

ब्रह्मात्मक: पर: शब्दात्मक: अपश्चेति प्रणव: द्विधा । शब्दब्रह्मप्राप्त्युपायभूतस्य वेदस्य प्रधानाङ्गत्वेन अध्येतृणां व्याकरणाध्ययने प्रेरणार्थं महाभाष्यकार: भर्तृहरिमहोदयश्च व्याकरणं प्रशंसते । यथा—

"आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तप: ।
प्रथमं च्छन्दसामङ्गं प्राहुर्व्याकरणं बुधा: ।।" इति

भर्तृहरिमहोदयै: स्वग्रन्थे वाक्यपदीये उक्तम्—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत: ।।" इति

अनया वाक्यपदीयकारिकया शब्दब्रह्म एव अकारादिविविधवर्णरूपेण विवर्तते इत्युक्तम् । तत्र विवर्तो नाम अतत्त्वतोऽन्यथाभाव: । शब्दा एव अर्थप्रवृत्तितत्त्वानां निबन्धनम् । शब्दानां तत्त्वावबोध: व्याकरणादृते भवितुं नार्हति । तच्च व्याकरणं मोक्षस्य अथवा अपवर्गस्य कारणम् । पापमुत्पद्यमानापशब्दरूपवाङ्मलानां चिकित्सकं भवति व्याकरणम् । तच्च सर्वविद्यानां मध्ये पवित्रतमम् एव । तच्च साधुशब्दान् विविच्य ग्राहयति इत्यत: सर्वेऽपि व्याकरणमादृतवन्त: । तदुच्यते—"सामर्थ्यजुषा पवित्रं महर्षयो व्याकरणं निराहु:" इति । अपभ्रंशप्रयोगाभावाय व्याकरणमपेक्षते । साधुशब्दप्रयोगाच्च अभिव्यक्तधर्मविशेषे महान्तं शब्दात्मानमभिसंभवन् अपगतेन्द्रियतामथवा वैकरण्यं प्राप्नोति । साधुशब्दज्ञानपूर्वकं परां वा प्रकृतिं प्रतिपद्येत । यत: साधूनां प्रयोगाद् ज्ञानाद्वा सर्वमवाप्यते । शब्दस्य स्वरूपं यत् तत्त्वरूपं तत्र यो भेद: तस्यासत्यतया तत्त्वाभेदज्ञानम् । आयुर्वेद: यथा शरीरस्थदोषाणां निवारणं करोति तद्वत् व्याकरणं वाङ्मलानां चिकित्सितं करोति । व्याकरणज्ञो हि प्रत्यवायहेतुभूतानपभ्रंशान् प्रयुङ्क्ते । तदुच्यते महाभाष्ये—

"यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्केधो न तज्ज्वलति कर्हिचित् ।।" इति ।

"आप: पवित्रं परमं पृथिव्यामपां पवित्रञ्च मन्त्रा: ।
तेषाञ्च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहु: ।।"

अभिधानपक्षे अर्थसमवेता या जातय: सर्वा: शब्दा: जातिनिबन्धना: तत्प्रतिपाद्यतया तद्वत् सर्वा: विद्या: व्याकरणाधीना: । तदधीनत्वात् तदर्थप्रतिपत्ते: । एवमिदं व्याकरणं मोक्षस्य या अन्तरालावस्था: तत्प्राप्तौ सोपानतुल्यत्वात् सोपानान्येव । तत्र च व्याकरणं प्रथमं पर्व, यतोऽस्मात् वागधिगम: सञ्जायते । अतस्तदुपासनं ततो ब्रह्माधिगम: । एवञ्चैतद् व्याकरणं मुमुक्षूणामपक्रान्तजिह्मत्वेऽपि राजमार्ग: । व्याकरणाश्रयणेन प्रणवस्य ब्रह्माधिगम: । तदुक्तं वाक्यपदीये—

"यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते ।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते ।।" इति ।

एवं वेदं सनिबन्धनां स्मृतिञ्चाश्रित्य शिष्टैः शब्दानाम् अनुशासनमारभ्यते, तन्मतेन व्याकरणं तावन्स्मृतिः । व्याकरणस्य साधुत्वज्ञानविषयत्वम् । इदं व्याकरणं शिशूनां पारम्पर्येण स्मृतिनिबन्धनमस्ति इत्यतः व्याकरणस्य स्मृतिशास्त्रता ।।

व्याकरणं खलु शब्दसाधुत्वव्यवस्थापकं शास्त्रं भवति । साधुशब्दात् असाधुशब्दाच्च समानरूपेण अर्थज्ञानोत्पत्या शिष्टेभ्यः व्याकरणागमेन साधुशब्दप्रयोगेण धर्मः असाधुशब्दप्रयोगेणाधर्मश्च समुत्पद्यते । व्याकरणेन नियमद्वयमुच्यते । साधुशब्दा एव प्रयोक्तव्या नासाधवः इत्येकः प्रयोगनियमः, गवादय एव साधवः न गाव्यादय इत्यपरः साधुस्वरूपनियमश्च सिद्ध्यति । किन्तु सर्वशब्दैः व्यवहर्तुं शक्येत तदानीं नियमद्वयोऽपि निर्मूलः । अनादिवाचकत्वरूपस्य पुण्यजनकतावच्छेदकधर्मविशेषस्वरूपस्य वा व्याकरणाभिव्यङ्ग्यस्य साधुत्वासाधुत्वशब्दव्यावृत्तस्य सम्भवेन साधुशब्दत्वम् । तादृशं साधुत्वमेव उपलक्षणीकृत्य साधूनेव प्रयुञ्जीत नासाधूनिति वेदस्य कल्पयितुं शक्यते चेति समूलत्वात् धर्मप्रयोजनिकेयं साधुत्वव्यवस्था नानर्थिका भवति ।।

यथैषां तत्र सामर्थ्यं धर्मेऽप्येवं प्रतीयताम् ।
साधूनां साधुभिस्तस्माद् वाच्यमभ्युदयार्थिभिः ।।

इह तावत् समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते—"शब्देनैवार्थोऽभिधेयः नापशब्देने" ति । एवं क्रियमाणमभ्युदयकारि भवतीति पस्पशाह्निके महाभाष्यकारेण उक्तम्, "लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" इति शब्दसाधुत्वज्ञानविषयिणी च व्याकरणस्मृतिर्विद्योतते । उक्तञ्च वाक्यपदीये—

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः" इति ।

एवमेव 'अश्वगोप्रभृतयः शब्दाः' साधवो विषयान्तरे निमित्तभेदात् सर्वत्र साधुत्वञ्च व्यवस्थापितम् । अपभ्रंशा गाव्यादयोऽपि साधूनां विषये प्रयुज्यमानाः साधुत्वानुमानेन प्रत्ययोत्पत्तिहेतवो भवन्ति । एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यन्ते तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ।

इदं व्याकरणं पश्यन्तीमध्यमावैखरीरूपायाः त्रय्याः वाचः परमं स्थानं विद्यते । तत्र व्यावहारिकासु सर्वासु वागवस्थासु व्यवस्थितः साध्वसाधुत्वे विभागः पुरुषसंस्कारहेतुः । परन्तु पश्यन्तीरूपमनपभ्रंशमसङ्कीर्णं लोकव्यवहारातीतं तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन वा शब्दपूर्वेण योगेनाधिगमः' ।

लाघवेन प्रकृतिप्रत्ययकल्पनया पदानि वाक्यानि चान्वाख्यायन्ते व्याकरणेन । यद्यपि वाक्यस्फोटो वर्णस्फोटो वा वास्तवः तस्यैव लोके अर्थबोधकत्वात् तेनैवार्थाकाङ्क्षापूर्तेश्च न पदस्फोटो वर्णस्फोटो वा, लोके वृक्ष इत्युक्ते तन्मात्रेण अर्थाकाङ्क्षापूर्त्यभावादव्यवस्थितत्वाच्च । एवं वाक्यार्थ एव वास्तवो न पदार्थः, नास्याव्यवस्थितत्वेनासत्यत्वात् । तथाऽपि प्रतिवाक्यं शक्तिग्रहस्य साधुत्वबोधनस्य च लघूपायेनाशक्यत्वात् वाक्यार्थेभ्यः पदार्थान् तेभ्यश्च प्रकृतिप्रत्ययार्थानपोद्धृत्य वाक्येभ्यः पदानि, पदेभ्यश्च प्रकृतिप्रत्ययान् प्रकृत्यर्थे प्रकृतेः,

प्रत्ययार्थे प्रत्ययस्य च शक्तिः। साधुत्वञ्च व्याकरणेन साध्यन्ते। तद्द्वारा पदार्थे पदस्य वाक्यार्थे च वाक्यस्य शक्तिः साधुत्वञ्च॥

अन्वाख्यानलाघवाच्च प्रकृतिप्रत्ययकल्पनं न उभयोरेव अन्वाख्यात्येकत्वम्। तदन्वाख्यानद्वारा पदवाक्यान्वाख्यानस्यैव शास्त्रकृत् तात्पर्यविषयत्वात् इति अन्वाख्यानशब्देन पदवाक्ययोर्ग्रहणम्।

"उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥"

इति कारिकया व्याकरणं पदानां निष्कृष्य ज्ञानार्थमुपाय एव। तच्च प्रकृतिप्रत्ययादिविभागं कृत्वा विशिष्टार्थान् उद्घोषयति। शब्दवेत्तार एव शब्दान् विदन्ति। वस्तुतः शब्दसंस्काररूपा परमात्मनः सिद्धिर्भवति। शब्दसंस्कारप्रवृत्तितत्त्वज्ञश्च शब्दब्रह्मामृतमश्नुते।

एवंविधं व्याकरणाख्यं लक्षणं भगवान् पाणिनिः सामान्यविशेषकवद् कृतम्। लक्षणप्रपञ्चाभ्यां कृत्स्नस्य शब्दब्रह्मणो लघूपायेन समधिगमनिमित्तम्। सामान्यविशेषवद् लक्षणप्रणयनञ्च उत्सर्गापवादविधिप्रतिषेधनिपातानिर्दशलिङ्गनियमरूपैः सप्तभिः सामान्यविशेषप्रकारैः। तत्र ण्वुल्तृपचौ इत्युत्सर्गः - 'कर्मण्यण्' इत्यपवादश्च। विधिप्रतिषेधौ अपरः प्रकारः तद्यथा 'पद्यानि' इति विधिः, 'अतदर्थे' इति प्रतिषेधः। विधिनिपातने यथा 'एचोऽयवायावः' इति अयादेशविधायको विधिः, "क्षय्यजय्यौ शक्यार्थे" इति निपातनरूपः विशेषः। विध्यन्तिदेशौ चतुर्थः— "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सामान्यसूत्रम् — 'अन्तादिवच्च' इत्यतिदेशरूपो विशेषः। 'काण्डे' इत्यादौ एकादेशविशिष्टे पूर्वान्तत्वेन प्रातिपदिकत्वसम्पादको विशेषः। स्थान्यादेशौ पञ्चमः। यथा 'हन्' धातुः स्थानी सामान्यरूपः, 'वध' इत्यादेशो विशेषरूपः, 'हनो वध लिङि' इति नियतविधायकत्वात्। लिङ्गेऽपि सामान्यविशेषरूपः षष्ठः। 'रात्रह्नाः पुंसि इति सामान्यम्' अहोरात्रे च छन्दसि इति विशेषः। विधिनियमौ सप्तमः। "पूर्वत्रासिद्धम्" इति सामान्यरूपो विधिः, "नलोपः सुप्स्वरसंज्ञा तुग्विधिषु कृति" इति विशेषरूपो नियमः। एवं भगवान् पाणिनिः सामान्यविशेषरूपाणि सूत्राणि अरचयत्। वर्णेनाप्यनर्थकेन न भवितव्यम्। अनर्थकत्वन्नाम बोध्यार्थराहित्यम्। किञ्चित् दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत् सर्वथा अनर्थकं न किञ्चित् वर्तते। यथैवेदमप्युच्छिन्नं चन्द्रतारकादि। एवमस्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्ताऽस्ति एवमेव वेदपारम्पर्येण स्मर्यमाणः। सोऽयमक्षरसमाम्नायः पुष्पितः फलितः चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः। तत्र पुष्पितत्वं तन्मूलकं शब्दशास्त्रद्वारेण। शब्दप्रयोगेण च फलितत्वम्।

पाणिनीयव्याकरणम् 'अइउण्' इत्यादि चतुर्दश माहेश्वरसूत्रमूलकम्। चतुर्दशसूत्राणामक्षरसमाम्नाय इति व्यवहारः। आम्नायसमाम्नायशब्दयोः वेदस्य प्रसिद्धिः। किन्तु माहेश्वरादागतानां चतुर्दशसूत्राणामपि श्रुतित्वम्। एतच्च आनुपूर्वीका श्रुतिरेव। पाणिनीयव्याकरणस्य श्रुतिमूलत्वाद् वेदाङ्गत्वम्। एवञ्च व्याकरणं 'वेदानां वेद' इत्यभिधीयते।

संस्कृतभाषायाः सङ्कोचस्य प्रधानं कारणं वर्तते वर्तमानकालिकोऽस्माकं पठनपाठनस्य प्रकारः। इदानीन्तनकाले पठनपाठनसरणिः सर्वथा परप्रेरिता। अनेन क्रमेण कदापि कोऽपि ज्ञानशेवधिं स्ववशीकर्तुं नैव

प्रभविष्यति। साहित्यादिविषयं कथमपि स्ववशीकर्तुं नैव प्रभविष्यति। साहित्यादिविषयान् कथमपि पिपठिषुवः प्रसरत्पदा दृश्यन्ते किन्तु व्याकरणज्ञानक्षेत्रे पठनपाठनदशा ततोऽपि चिन्तनीया। अद्य व्याकरणज्ञानस्य दुर्बोधतां कठिनताञ्च पुरस्कृत्य तस्य स्वरूपं पूर्वापेक्षयाऽतिजटिलं कृतमनया वैज्ञानिकया पाठनपद्धत्या अत्र विषये सुभाषितम्—

"केचिद् भग्नाः सुद्ध्युपास्यप्रयोगे,
केचिद् भग्नाः तद्धितान्तप्रयोगे।
केचिद् भग्नाः नामधातुप्रयोगे
सर्वे भग्ना यङ्लुगन्तप्रयोगे॥" इति।

एवं दुर्ज्ञेयव्याकरणाध्ययनं कठिनं तपः एव। अन्यतपोऽपेक्षया अस्य उत्तमत्वमस्त्येव। व्याकरणाशास्त्रं ज्ञानस्य महान् शेवधिः। यदाश्रित्य भारतीया कमपि लोकोत्तरं गौरवमनुभवन्ति। सहस्राब्दीतः पश्चादपि वयं तेन गौरवान्विता इति सर्वदैव अनुभवामः। भाषाशास्त्रस्याधिपत्यमपि भारतीयानां तन्मूलकमेव। मेधाशक्तेर्विकासस्य व्याकरणशास्त्रम् अन्यतमं साधनमिति निश्चप्रचम्।

ज्यौतिश्शास्त्रे भास्करीयवैशिष्ट्यम्

डॉ. देवीप्रसादत्रिपाठी

भारतीयानां ज्ञानागारा: वेदा एव सन्ति । वेदस्य प्रमुखाङ्गस्य ज्योतिषशास्त्रस्य वैदिककालादेव यज्ञादि-कर्मसम्पादनार्थङ्कालस्य निर्धारणमेव प्रमुखो विषयोऽस्ति । अभीष्टकार्यसिद्ध्यर्थङ्कालनिर्धारणन्तथा च तस्मिन्नेव काले दिग्देशग्रहताराणान्निर्धारणमेको गूढतमो विषयोऽस्ति । विषयेऽस्मिन्नस्माकमाचार्याबहुकालादेव संलग्ना आसन् । तेषां सततसाधनया एवानेकाकानां विषयाणां वैज्ञानिकोपपत्यात्मकानि विवेचनानि प्राप्तान्यभवन् । यदास्माकमाचार्या: भूभ्रमणगुरुत्वाकर्षण-ग्रहकक्षा-भूभे: समतानिराकरण-जात्यत्रिभुजवृत्तफल-दीर्घवृत्त-चलनकलन-अनन्तावधारणा, गोलपृष्ठफल-ग्रहणादीनामनेकानां विषयाणामनुसंधानं कृत्वानुसंधानकार्ये संलग्ना आसन्, तदैव भारतेतर-यूरोपादिदेशेषु एतेषां विषयाणां ज्ञानन्नासीत् । विशेषरूपेणास्माकन्देशे भास्कराचार्यं यावत् गूढतमानां विषयाणामनुसन्धानकार्यं सम्यग् रूपेण प्रचलितमासीदिति । मुख्यत आधुनिकविज्ञानस्य प्रारम्भो “निकोलस कोपर्निकस” (१४७३-१५४३ ई०) महोदयादर्थामच्चतुर्दशख्रीष्टाब्दस्यानन्तरमभूत् । तस्मिन् समये भारतेतर-देशेषु वास्तविकवैज्ञानिकरूपेणोक्तानां विषयाणां ज्ञानस्य पक्षधरा: के के जना: सन्तीति तु “जार्दान ब्रूनो” महोदयस्य दहनेन स्पष्टं प्रतीयते । अस्माकं देशे तदानीं पूर्वं का स्थितिरासीदिति तु भास्कराचार्यस्य सिद्धान्तशिरोमणिग्रन्थेन स्पष्टं प्रतीयते । विशेषरूपेण तत्र भास्कराचार्यैर्ग्रहगणितप्रसङ्गेऽनेकविषयाणां समुचिता व्याख्या विधेया । यथा-अनन्तस्य रहस्यम्, दीर्घवृत्तस्य कल्पना, गुरुत्वाकर्षणशक्तेश्चर्चा, उदयान्तरादि ।

श्रीधरश्रीपतिमहावीरभास्करै: सर्वैराचार्यै: संकलनव्यवकलनाद्यष्टपरिकर्मणां व्यवहार: सामान्यरूपेण विहितम्, परन्तु केवलं शून्यपरिकर्माष्टके भागहारप्रक्रियायां भास्कराचार्य: स्वपूर्ववर्त्याचार्येभ्यो पृथगवलोक्यते । पूर्ववर्तिसर्वैराचार्यै: शून्येन विभक्तराशेर्मानं शून्यमेव कल्पितम्, किन्त्वाचार्यभास्करोऽस्य राशेर्मानं “ख-हर” इति स्वीकुर्वन्नन्ते स्वीकृतवान् । किन्नाम शून्यम्? न्यूनात्न्यूनतरमेव शून्यम् । अर्थात् यो राशि: न्यूनान्न्यूनतरं प्रति गच्छन् शून्यं शून्यासनं वा भवति स एव राशि: शून्यमिति । यदि शून्यसमसंख्यया यस्मिन् कस्मिन्नपि राशौ भागो दीयते तदा लब्धेर्मानं क्रमश: महत्तरमेव भवति । कस्यापि भिन्नराशे: हरमानं यदि न्यूनान्न्यूनतरं भवति तर्हि तस्य लब्धेर्मानमुत्तरोत्तरमधिकम्भविष्यतीति । अस्यैव संज्ञा ‘अनन्त’ इति । अस्माकमाचार्येषु भास्कर: प्रथमो गणितज्ञोऽस्ति । येन संख्यासु शून्यस्य परमाल्पत्वं स्वीकृत्यानन्तस्यावधारणा स्फुटीकृता । अनेन सिद्ध्यति यद् भास्कर: “अवकलन” गणितस्य (कैलकुलसगणितस्य) मूलसिद्धान्तानां ज्ञाता आसीत् । सम्प्रति कलनगणितस्याविष्कार: भास्कराद् षट्शतवर्षेभ्योऽनन्तरं “न्यूटन” “लाइवनिटज” “महोदयौ” अकुरुतामिति प्रचलितमस्ति

परन्त्वस्य गणितस्य मूलसिद्धान्तानामाविष्कर्ता तु वास्तविकरूपेण भास्कर एवासीत् । अस्माकं शास्त्रेषु शून्यानन्तयोः व्याख्या **"अणोरणीयान् महतोमहीयान्"** इत्यनेन भवति ।

भास्कराचार्यैः "खगुणश्चिन्त्यं शेषविधौ" इत्यनेन सूत्रेण शून्यं शून्यस्यासन्नमेवास्तीत्यर्थः कृतः । अत्राचार्यस्य प्रयासः सर्वथा श्लाघनीयः । खहरोऽनन्तो वा इत्यस्य सन्दर्भे स्वयमेव भास्करैरुक्तम्—

अस्मिन् विकारः खहरे न राशावपि प्रविष्टेष्वपि निःसृतेषु ।
बहुष्वपि स्याल्लयसृष्टिकालेऽनन्तेऽच्युते भूतगणेषु यद्वत ।।[1]

अस्याशयोऽस्ति यद् यथा प्रलयकाले सर्वेभूतगणा अनन्तेऽच्युते प्रविशन्ति तथा च सृष्टिकाले निःसरन्ति तथापि तत्र कोऽपि विकारो न भवति तथैव "ख-हर" राशवपि वृहत्तमराशेः संकलनव्यवकलनाभ्यां कोऽपि विकारो नागच्छति । अतः स्पष्टमस्ति यत्—

पूर्णमदः पूर्णमिदं पूर्णाद् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।[2]

ग्रहाणां नीचोच्चमानेन तु स्पष्टमेव भवति यद् भारतीयाचार्याणां दीर्घवृत्तस्य ज्ञानमासीत् । भास्करस्य परिधिव्यासयोस्तथा च ज्याचापयोः सम्बन्धेन त्वनेके सन्दर्भा उपलभ्यन्ते । यथा—

वृक्षाद्धस्तशतोच्छ्रयाच्छतयुगे वापीं कपिः कोऽप्यगा
दुत्तीर्याथ परो द्रुतं श्रुतिपथेनोड्डीय किञ्चिद्द्रुमात् ।
जातैवं समता तमोर्यदि गतावुड्डीयमानं कियद्-
विद्वंश्चेत् सुपरिश्रमोऽस्ति गणिते क्षिप्रं तदाऽऽचक्ष्व मे ।।[3]

अस्य उदाहरणस्य सूत्रेण स्पष्टं प्रतीतिर्भवति यदाचार्यं दीर्घवृत्तस्य ज्ञानं सम्यक्तयासीदिति । यथा—

द्विनिघ्नतालोच्छ्रितिसंयुतं यत् सरोऽन्तरं तेन विभाजितायाः ।
तालोच्छ्रितेस्तालसरोऽनतरघ्न्या उड्डीयमानं खलु लभ्यते तत् ।।[4]

गणितागताः ग्रहाः मध्यमाः दृष्ट्युपलब्धाश्च स्फुटाः भवन्ति । प्राचीनाचार्यैः कक्षावृत्तप्रतिवृत्तयोः साहचर्येण ग्रहाणां भ्रमणन्तथा च मन्दस्पष्टयोः भेदेन तेषां पृथक्-पृथक् स्थानं प्रतिपादितम् । एतेन सहैव तैरुद्घोषितं यद् ग्रहाणां कक्षाणां केन्द्रं भूमौ नास्ति तथा च न ग्रहाणां कक्षा भूमेः समानान्तरा । यथा — **"यस्मिन् वृत्ते भ्रमति खचरो मनास्य मध्यं कुमध्ये"**[5] अर्थादप्रत्यक्षरूपेण पूर्वाचार्यैरपि ग्रहकक्षायाः दीर्घवृत्तत्वं स्वीकृतम् । आधुनिकैः

---

१. बीजगणित श्लो.६
२. ईशावाश्योपनिषद्
३. लीलावती क्षेत्रव्यवहारः उदा.९
४. लीलावती क्षेत्रव्यवहारः सूत्रम् १३
५. सि.शि.ज्यो.श्लो.७

ग्रहाणां कक्षाणां स्वरूपं दीर्घवृत्ताकारं प्रतिपादितम्। केपलरमहोदयेन ग्रहगतिसिद्धान्तविवेचनप्रसङ्गे ग्रहाणां गतिसम्बन्धिनस्त्रयो नियमाः प्रतिपादिताः। एवमेव गतिसिद्धान्तस्य परिष्कारः न्यूटनमहोदयेनापि कृतः। कोपर्निकशमहोदयेन सूर्यकेन्द्रितग्रहभ्रमणस्य सिद्धान्ता आविष्कृताः। अत्रैव भारतीयपाश्चात्यसिद्धान्तयोर्मध्ये इदमेव प्रमुखमन्तरं यत् भारतीयाः ग्रहाणां भूकेन्द्रिकगणनां कुर्वन्ति तथा च ग्रहकक्षा प्रसङ्गे दीर्घवृत्ताकारायाः कक्षायास्तत्र कल्पना नास्ति परं कक्षाप्रतिवृत्तयोः कल्पनया दीर्घवृत्तस्य सार्थकत्वमपि सिद्ध्यति। कक्षायाः वृत्तत्वं स्वीकारेऽप्युच्चनीचयोः संगतिर्न जायते तथा च मध्यमस्फुटग्रहयोरन्तरमपि न सम्यक् प्रतिभाति। ग्रहाः प्रतिवृत्ते भ्रमन्ति प्रतिवृत्तस्य केन्द्रं भूमौ नास्ति, भूमौ कक्षावृत्तस्य केन्द्रमस्ति। अनयोः द्वयोः वृत्तयोः साहचर्येणैव दीर्घवृत्तत्वं सिद्ध्यतीति।

प्रायशः सर्वेषां पदार्थानां कश्चन आधारोऽस्माभिर्दृश्यते। इयं पृथिवी कुत्र स्थिरा वर्तते, अस्या आधारश्च क इति स्वाभाविकी जिज्ञासा भवति। अस्याः समाधानं पुराणेषु वर्तते यदियं पृथिवी शेषनागस्य सहस्रफणानामुपरि स्थिता वर्तते, परमत्रापि जिज्ञासा समुद्भवति यत् शेषनागस्याधारः कः? शेषः कच्छपस्योपरि कच्छपस्याधारः जलम्, जलस्याधारः कः? एतमाधारपरम्परा प्रचलतीति। पौराणिकानामाख्यानमभिधया न गृह्यते तत्र रहस्यं वर्तते। तत्रैवं कल्प्यते शेषः सूर्यः, सूर्यः सहस्रकिरणैः युक्तः सूर्यस्य सहस्ररश्मयः एवाधारः।

वस्तुतः ज्योतिश्शास्त्रे भूमेराधारकल्पना एवं नास्ति तत्र स्पष्टमेवोल्लिखितं वर्तते यत् भूमिः निराधारा आकाशे वर्तते। यद्यस्याधारः कश्चित् कल्प्यते तर्हि तस्याप्याधारः कल्पीयः। एवमनन्ताधारकल्पनायामनवस्था-दोषो भवति। यद्यन्तिमाधारे काचित् विशिष्टा शक्तिः कल्प्यते तर्हि सा विशिष्टा शक्तिः पृथिव्यामेव कथं न कल्पनीया। अत इयम्भूः निराधारा आकाशे स्वशक्त्या तिष्ठति। भुव आकर्षणप्रभावादेव खस्थाः गुरुपदार्थाः भूमावाकृष्टाः भवन्ति। यथा—

आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत्पततीव भाति समे समन्तात् क्व पतत्वियं खे॥[1]

अस्माकं दृष्ट्यायमेवाचार्य आकर्षणप्रभावस्य प्रथम आविष्कारकः। यस्मिन् समयेऽनेनास्याः शक्तेः ज्ञानमाविष्कृतं तस्मिन् समये पाश्चात्यदेशेष्वाकर्षणशक्तेश्चर्चाऽपि नासीत्। महदाश्चर्यमाविष्कृतमनेन, अस्मात् पञ्चशतवर्षानन्तरं सप्तदशशताब्द्यां "सर आइजक न्यूटन" महोदयेनाप्यस्याकर्षणशक्तेश्चर्चां कृत्वा स्वसिद्धान्तानां स्थापना कृता। मूलसिद्धान्तः भास्करस्य, परमस्य श्रेयः न्यूटनं प्रतिगच्छति। भुवमधिकृत्य भास्करस्य ज्ञानं तदानीन्तने कालेऽतीवश्लाघनीयमासीदिति।

उदयान्तरमपि भास्कराचार्यस्य महत्त्वपूर्णमाविष्कारमस्ति। भुजांशविषुवांशयोरन्तरमुदयान्तरम्भवतीति। उदयान्तरकर्म भास्कराचार्यस्य गणितीयप्रतिभामालोकयति। इदानीं सर्वैः वैज्ञानिकाः खगोलज्ञा ज्योतिर्विदश्च सादरं कथयन्ते यद् व्यवहारोपयोगिन "उदयानन्तरस्य" अन्वेषको भास्कर एवास्ति। भुजान्तरोदुयान्तरयोः

१. सिद्धान्तशिरोमणि गो. कुव. श्लो. ६

परस्परं संस्कारेण वेलान्तरं भवति। सम्प्रति वेलान्तरं कालसमीकरणनाम्ना (Equation of time) जनाः जानन्ति। भुजान्तरसंस्कारः भास्कराचार्यात् पूर्वमप्यासीत्। एकोनषष्ट्युत्तरमष्टादशशततमे (१८५९) ख्रीष्टाब्दे "रायल एस्ट्रोनामिकल सोसायटी-लन्दन" इत्यस्या मुखपत्रे (जर्नल इति) डॉ. स्पोट वुड महोदयेन भास्करस्य गणितीयप्रतिभायाः प्रशंसा कृता।[१] तैरुक्तं यद् — भास्कराचार्यस्य गणितीयविवेचनस्य सूक्ष्मता उच्चतमा आसीत् गणितज्योतिश्शास्त्रे येषां सिद्धान्तानां स्थापना तैः कृता, तेषान्तुलनाधुनिकगणितीयसिद्धान्तैः सह भवितुं शक्यते।

१. भास्कराचार्य पृ.७५

उत्कलस्य ज्योतिर्विद्याविकासे भूमिका

श्री गोकुलानन्दरा उतराय:

जनन्यै सर्वभाषाणां पुजितायै सुरैरपि ।
संस्कृतरूपिणीदेव्यै सरस्वत्यै नमो नमः ।।

तदाश्रिता वयं सा हि शाश्वता स्थिररूपिणी
संप्रति सैव शोभते क्व गताः प्राकृतादयः ?

जायन्ते च म्रियन्ते च भाषानित्यमहर्निशम्
संस्कृतसदृशी भाषा न भूतो न भविष्यति ।।

तत्र तावन्महती लोकोक्तिर्विद्यते यद्भिन्नाः सप्तमुखे वाणी जलं सप्तकूले तथा । एवं सप्तमुखगता वाणी स्वमार्गतः काचिद्विकृतैव भवति । अतो भारतीयानामादिवाणी संस्कृतं विभिन्न जातिमुखेन प्रचलिता नानाविध-रूपेण परिणता स्वमहिम्ना शोभते । एवं या भाषोत्कलीयैरोडिआ जात्या वा कथिता सा 'ओडिआ' भाषेति । तथैव बङ्गाङ्‌गलादयो भाषाः प्राच्यपाश्चात्यानां स्वजातिनाम्ना भवन्ति परन्तु मूलतः सा कथिता संस्कृत भाषैव ।

एवमपि तेषां सर्वेषां जातीनां संस्कृतं प्रति नानाविधान्यवदानानि विद्यन्ते । तत्रोत्कलस्य कला स्थापत्ययोः सानुपूर्विकं साहित्यगणितज्योतिविज्ञानखलोगशास्त्रेष्वपि महती परम्परा प्रचालति । पौराणिकसाहित्येषु चमत्का-रेषु मन्दिरेषु ओडिशीनृत्ये छान्दोग्यादिषूपनिषत्सु कालिदासस्यामरकृतिषु पञ्चतन्त्रगीतगोविन्दनैषधचरितैका-वलीकाव्यप्रकाशदीपिकासाहित्यपदर्पणस्वतीग्रहचक्रसिद्धान्तदर्पणादिषु च तेषां मुद्राः कोऽपि लब्धुं शक्यः ।

यद्यपि कलिङ्गसाम्राज्यस्य शक्तिः सुष्ठुरूपेण महाभारते कलिङ्गराजस्य युद्धादि घटनासु मगधराज-खारवेलस्य दिग्विजयधर्मपरिवर्तनयोर्महामेघबाहनखारबेलस्यानुपमकृतिष्वपि दृश्यते तथापि यदाकदा घटितां घटनावलीं विहाय प्रथमजन्मेजयस्याभ्युत्थानं यावत्प्राचीनोत्कलस्य धारावाहिकमिति वृन्तमितिहासो न दर्शयति । तथाप्युत्कलस्य महती संस्कृतिरशोकस्य लिपिभिः खण्होदयगिरयोः शिलास्थापत्यैः सुच्चैर्मन्दिरैश्च विदेश्याक्र-मणादधोगतिं यावन्नियमितरूपेण सूचिता कथ्यते ।

प्राचीनैः स्थापत्यैर्यद्यप्युत्कलेषु ज्योतिर्विज्ञानस्य प्रगतेः परिपूर्णा विवरणी न लभ्यते तथापि कश्चिदा-लोको लभ्यत एव । ख्रिष्टीये पञ्चमशतके निर्मितेषु मन्दिरेषु द्वारशीर्षेषु ग्रहाणां मुद्रणं न लक्ष्यते । षष्ठशताब्द्यां निर्मितेषु मन्दिरेषु केतुं विहायाष्टग्रहाणां स्थापत्यं दृश्यते । दशमशताब्देरनन्तरं सर्वेषां नवग्रहाणां दर्शनं लभ्यते ।

एवं चित्रं कोणार्के परिपूर्णतां प्राप्नोति यत्र चन्द्रशुक्रयोः स्थाने स्त्रीमूर्तिद्वयं परिदृश्यते । कोणार्कोऽन्ततो महाभारतकालतः उत्कलेषु ज्योतिर्विज्ञानस्य स्थितिं प्रमाणयति । कलिङ्गाख्यं प्राचीनोत्कलं ग्रहराजस्य सूर्यस्य जन्मस्थानं-कलिङ्गदेशे जात इति सर्वे पुरोहिताः पठन्ति ।

एतत्सुविदितमेव यत्सकला अष्टादशमहापुराणा एकस्याः पुराणसंहिताया अष्टादशविभागा एव वर्तन्ते । तेषु ब्रह्मपुराणं यत्पुराणेषु सर्वमतेन प्रथममग्रगण्यञ्च प्रभोर्जगन्नाथस्य प्रार्थनया प्रारभ्यते । अतः समस्तानि महापुराणानि सहोत्कलस्य विस्तृतवर्णनाभिर्निसंदेहो व्यज्यते तानि प्रणितान्युत्कलीयर्षिणेति । तान्यपि लोकप्रसिद्धविश्वासं द्रढयन्ति यत्कृष्णद्वैपायनो व्यासः पराशरर्षे स्व ख्यातिधन्यः पुत्रो राउलकेलान्तिके वेदब्यासेत्यधुना प्रथितस्थले जातः । एवं विधे सति नारदाग्निपुराणयोरन्येषां च चमत्काराशति-शायिनो ज्योतिषभागा निश्चियत उत्कलीयप्रज्ञाप्रौढस्य कृतयः ।

